
श्रौत-यज्ञ-मीमांसा

[संस्कृत तथा हिन्दी]



श्रौत-यज्ञ-मीमांसा

[संस्कृत तथा हिन्दी]

दू.:0542-2420414
चौखम्भा संस्कृत भवन
संस्कृत-आयुर्वेद एवं इन्डोलाजिकल ग्रन्थों के प्रकाशक एवं विक्रेता
पोस्ट बाक्स नं० 1160
चौक (बैंक ऑफ बड़ौदा बिल्डिंग, मित्रा सिनेमा के सामने)
वाराणसी-221 001 (भारत)

युधिष्ठिर मीमांसक

फोन (0542)2420414
चौखम्भा संस्कृत भवन
चौक, वाराणसी - १

प्रकाशक—

श्रीमती सावित्रीदेवी बागड़िया ट्रस्ट
१७० जी. ब्लाक, न्यू अलीपुर
कलकत्ता

ग्रन्थ मिलने का पता—

रामलाल कपूर ट्रस्ट
बहालगढ़ (पिन १३१०२१)
(सोनीपत-हरयाणा)

प्रथम बार—६००
संवत् २०४४
जुलाई, सन १९८७
मूल्य—[illegible]००

४०/-

मुद्रक—

श्री शान्तिस्वरूप कपूर
रामलाल कपूर ट्रस्ट प्रेस
बहालगढ़ सोनीपत-हरयाणा

स म र्प ण

कर्त्तव्य-परायणा, ममता की प्रतिमूर्ति,
सरल एवं सात्त्विक नानी जी



जन्म—सं० १९७३ निधन—सं० २०४३, पौष शु० ११

श्रीमती यशोदादेवी जी

को
पुण्य-स्मृति में
समर्पित

बिमला बागड़िया

नानी जी (यशोदादेवी जी) को श्रद्धाञ्जलि

मैं नानी जी यशोदादेवी जी के सम्बन्ध में क्या लिखूं, किन शब्दों में अपने उद्‌गार प्रकट करूं, यह मेरी समझ में नहीं आता। वे तो प्यार और ममता की जीती जागती प्रतिमूर्ति थीं। उनमें विविध भावों की प्रधानता थी। श्रीकृष्ण जी की माता 'यशोदा' में तो एक भाव की ही प्रधानता थी और वह था वात्सल्य का भाव। हमारी नानी जी में तो सारे ही भाव थे। उनका धर्मपत्नी का जो रूप था, वह शायद ही कहीं दृष्टिगोचर होगा। पति के गौरव से वह अपने को अत्यन्त गौरवशालिनी समझती थीं। उनकी पुस्तकों से भी उनको इतना प्यार था कि वे उनको भी अपने आंचल से पोंछती रहती थीं। नाना जी की सेवा में उन्होंने कभी दिन को दिन वा रात को रात नहीं समझा। सब प्रकार की सेवा एवं गृहस्थ के अन्य कार्यों को करती हुईं भी सदा तरोताजा ही नजर आती थीं। चौबीसों घण्टे सब की सेवाओं में तत्पर रहने वाली नानी जी को कई रोग भी थे, परन्तु इतनी जल्दी वे हमें यों छोड़ कर चली जायेंगी, यह विश्वास ही हमें नहीं होता था।

यद्यपि मेरे साथ उनका सम्बन्ध ११-१२ वर्षों का ही था और ४-५ बार मिलने का ही मुझे सौभाग्य मिला, तथापि ऐसा लगता था कि पता नहीं कितने जन्मों में मैं इनके साथ रह चुकी हूं। कोई बात पूछने पर वे बहुत अच्छी सलाह थोड़े से शब्दों में देती थीं। हमेशा उनका मुस्कराता प्यार भरा चेहरा, लगता है आखों के सामने से हटता ही नहीं है। **वसुधैव कुटुम्बकम्** की भावना तो उनमें कूट-कूट कर भरी थी, किसी को भी वे पराया नहीं समझती थीं।

कर्तव्य-परायणा, ममता की मूर्त्ति, सरल और सात्त्विक नानी जी को मेरी यही श्रद्धाञ्जलि समर्पित है। भगवान् उन की आत्मा को शान्ति प्रदान करेंगे। वे मुक्ति का आनन्द ले रही होंगी।

धन्य हैं वे लोग तथा मैं भी, जिन को ऐसी पत्नी, माता तथा नानी जी मिलीं।

आप की नातिन
विमला बागड़िया

लेखक के दो शब्द

स्व० श्रेष्ठिवर्य श्री मोहनलाल जी बागड़िया के नाना जी श्री विन्ध्य-वासिनीप्रसाद जी अग्रवाल का मेरे प्रति बड़े भाई के समान स्नेह था। मैं जब तक काशी में रहा, तब तक जब भी वे गुरुवर श्री ब्रह्मदत्त जी जिज्ञासु से मिलने आते थे, उन से भेंट होती ही रहती थी। उस के पश्चात् जब मैं अजमेर चला गया, तब भी वे एक बार मुझ से मिलने अजमेर आये और २०-२५ दिन मेरे पास रहे।

श्री विन्ध्यवासिनी प्रसाद जी कलकत्ता में प्राय: श्री मोहनलाल जी के घर पर रहते थे। उन्हीं के सत्संग से श्री बागड़िया जी का पूरा परिवार वैदिक धर्म में दीक्षित हो गया। जब भी श्री विन्ध्यवासिनी प्रसाद जी श्री मोहनलाल जी के गृह पर रहते थे, तब प्रसंगवश बात-चीत में श्री पूज्य गुरु-वर का और मेरा वर्णन करते रहते थे। इस प्रकार इस बागड़िया परिवार के साथ मेरा परोक्षरूप में सम्बन्ध बन चुका था, परन्तु प्रत्यक्ष सम्बन्ध सन् १९७६ में मेरे सपत्नीक कलकत्ता जाने पर हुआ। आर्य समाज विधान सरणि के साप्ताहिक अधिवेशन में मेरा व्याख्यान था। श्री मोहनलाल जी उसमें आये हुए थे। व्याख्यान के पश्चात् हम दोनों को वे अपने घर पर ले गये। उस बार आपके घर पर केवल दो ढाई घण्टे ही रहना हुआ, परन्तु उसके पश्चात् श्री मोहनलाल जी और श्रीमती विमलादेवी जी का हमारे प्रति मान्यभाव उत्तरोत्तर बढ़ता गया।

इस सम्बन्ध की परिणति हुई श्री मोहनलाल जी बागड़िया द्वारा अपनी मातु श्री की स्मृति में संस्थापित ट्रस्ट द्वारा वैदिक धर्म के प्रचार प्रसार के लिये मेरी सम्मति से वैदिकधर्म सम्बन्धी प्राचीन और नवीन ग्रन्थों के प्रकाशन कार्य को आरम्भ करने में। लगभग १०वर्ष के स्वल्प समय में ही आपके ट्रस्ट के द्वारा संस्कृत और हिन्दी के महत्त्वपूर्ण १० ग्रन्थ छप चुके हैं। ११वां ग्रन्थ आप के हाथों में पहुंच रहा है।

श्री मोहनलाल जी और उनकी धर्मपत्नी श्रीमती विमलादेवी जी ने हमें अपने स्वर्गीय नाना जी श्री विन्धवासिनी प्रसाद जी का मानार्ह पद दिया। इस प्रकार हम दोनों इनके नाना नानी के रूप में परिवार के अङ्ग बन गये।

सब कार्य सुचारु रूप से चल रहा था कि अचानक इस परिवार पर अनिष्ट की घोर घटायें उमड़ पड़ीं। श्री बागड़िया जी के श्वसुर, श्रीमती विमला-देवी जी के पिता श्री माननीय रामेश्वर लाल जी अग्रवाल का मार्गशीर्ष वदी ६, संवत् २०४१ (=१४-११-८४) को स्वर्गवास हो गया। इसके ६ मास के भीतर-ही अकस्मात् श्री मोहनलाल जी बागड़िया का वै० कृ० १, सं० २०४२ (=५-५-८५) को युवावस्था में ही निधन हो गया। और पौष सु० ११ सं० २०४३ (१० जनवरी १९८७) को इनकी नानी जी अर्थात् मेरी धर्मपत्नी यशोदादेवी भी दिवंगत हो गई। नानी जी के स्वर्गवास की सूचना पाकर श्रीमती विमलादेवी जी ने लिखा था—'दैव दुर्विपाक से तीन वर्ष में ही मेरे पिताजी पतिदेव और नानी जी का स्वर्गवास हो गया। हमारे ट्रस्ट की जो अगली पुस्तक छपे उसे नानी जी की स्मृति में छापना चाहती हूं।'

श्रीमती विमलादेवी जी की नानी जी (मेरी धर्मपत्नी) की वैदिक यज्ञों में बड़ी श्रद्धा थी। घर पर भी प्रायः प्रतिदिन अग्निहोत्र किया करती थीं और महाराष्ट्र आदि में जहां जहां सोमयाग आदि बड़े-बड़े यज्ञ होते थे, उन में मेरे साथ जाती थीं और प्रत्येक कर्म को बड़े ध्यान वा श्रद्धा के साथ देखती थीं। इस दृष्टि से मैंने श्रीमती विमलादेवी जी को लिखा कि आप की नानी जी को वैदिक यज्ञानुष्ठानों के प्रति गहरी आस्था थी, अतः उनकी स्मृति में यज्ञ विषयक ही कोई ग्रन्थ प्रकाशित करना उचित होगा।

ऋषि दयानन्द सम्मत **अग्निहोत्र से लेकर अश्वमेधान्त श्रौत यज्ञों** के सम्बन्ध में आर्यसमाज में बहुत उपेक्षा का भाव है। इन वैदिक यज्ञों में मध्य-काल में पशुयाग आदि कुछ अवैदिक अंश भी प्रविष्ट हो गये हैं। अतः इन श्रौत यज्ञों के वास्तविक स्वरूप को समझाने के लिये मैंने **श्रौत-यज्ञ-मीमांसा** लिखी। आर्यसमाज से बाहर के विद्वानों, विशेष करके दाक्षिणात्य विद्वानों के लिये इसे संस्कृत भाषा में लिखा और साथ में संस्कृत न जानने वालों के लिये हिन्दी भाषा में भी संकलित किया है। इस प्रकार यह ग्रन्थ सभी के लिये उपयोगी बनाया है।

यद्यपि श्रौत-यज्ञ-मीमांसा का हिन्दी में सं० २०३४ में छपे 'मीमांसा-शाबर-भाष्य' की 'आर्षमत-विमर्शिनी' हिन्दी व्याख्या के प्रथम भाग में संकलन किया था, परन्तु गत १० वर्षों में इस में बहुत कुछ परिवर्धन परिवर्तन और संशोधन हुआ। अतः हिन्दी भाग भी जो इस में छापा है वह पहले की

अपेक्षा अधिक परिमार्जित है। संस्कृत भाग तो विगत ४-५ मासों में लिखा गया है।

अब यह ग्रन्थ श्रीमती विमलादेवी जी की इच्छानुसार उनके 'श्रीमती बागड़िया ट्रस्ट' की ओर से उनके द्वारा अपनी माननीय नानी श्रीमती यशोदा-देवी की स्मृति में प्रकाशित किया जा रहा है।

यह बड़े सौभाग्य की बात है कि उनके पतिदेव श्री मोहनलाल जी बागड़िया ने वैदिक धर्म के प्रचार प्रसार के लिये जो प्राचीन वा नवीन ग्रन्थों के प्रकाशन का कार्य आरम्भ किया था, उनके स्वर्गवास हो जाने के पश्चात् भी अपने पतिदेव द्वारा प्रारब्ध कार्य को सुचारु रूप से चलाने के लिये तत्पर हैं। इस कार्य के लिये समस्त वैदिक धर्म प्रेमी जनता की ओर से धन्यवादार्ह हैं।

मैं इस परम उपयोगी कार्य के लिये, श्रीमती विमलादेवी जी एवं उनके पुत्रों के लिये शुभाशी: प्रदान करता हूं। और परमात्मा से प्रार्थना करता हूं कि उनके समस्त परिवार को समृद्धि प्रदान करें, एवं धर्म जाति एवं देश की सेवा के प्रति उनकी रुचि उत्तरोत्तर बढ़ती रहे।

युधिष्ठिर मीमांसक

'श्रीमती सावित्रीदेवी बागड़िया ट्रस्ट' संस्थया
दशवर्ष-परिमिते अल्प-समये प्रकाशिताः

अत्यन्तं महत्त्वपूर्णा ग्रन्थाः

१. गोपथब्राह्मणम् (मूलमात्रम्) शुद्धतमं संस्करणम्। सम्पादकः—डा० विजयपालः। मुद्रणकालः—सन् १९८०।

२. ऋषि दयानन्द के शास्त्रार्थ और प्रवचन--अस्मिन् ग्रन्थे दयानन्द-सरस्वीस्वामिनः केचन शास्त्रार्थाः, पूर्णे-मुम्बईनगरयोः कृतानां प्रवचनानां संग्रहो वर्तते। मुद्रणकालः—सन् १९८२।

३. निरुक्त-श्लोकवार्तिकम्—ग्रन्थकारः केरलनिवासी नीलकण्ठो गार्ग्यः। अस्य एक एव कोशोऽतिजीर्णस्तालपत्रलिखितो वर्तते। सं०—डा० श्री विजयपालः। मुद्रणकालः—सन् १९८२।

४. ध्यानयोग-प्रकाश (हिन्दी)—लेखकः—योगिराजः स्वामी लक्ष्मणानन्दः। पातञ्जलयोगशास्त्रानुसारिहिन्दीभाषायां लिखितं सुगमं पुस्तकम्। मुद्रणकालः—सन् १९८३।

५. ANTHOLOGY OF VEDIC HYMNS—लेखकः—स्वामी भूमानन्दः सरस्वती। वेदविषयकोऽत्युपयोगी ग्रन्थः। सन् १९८४।

६. कात्यायनीय-ऋक्सर्वानुक्रमणी—षड्गुरुशिष्य-विरचितया कृत्स्नया वृत्त्या संहिता। सम्पादकः—डा० श्री विजयपालः। मुद्रणकालः—सन् १९८५।

७. वैदिक-जीवन—(हिन्दी)—लेखकः—विश्वनाथो विद्यालङ्कारः। अथर्ववेदमनुसृत्य वैदिक-जीवन-निदर्शको ग्रन्थः। मुद्रणकालः—सन् १९८५।

८. सूर्य-सिद्धान्तः—पं० उदयनारायण सिंह विरचितया हिन्दीव्याख्यया विस्तृतया भूमिकया च समन्वितः। मुद्रणकालः—सन् १९८६।

९. वैदिक-गृहस्थाश्रम (हिन्दी)—लेखकः—विश्वनाथो विद्यालङ्कारः। अथर्ववेदमनुसृत्य लिखितो वैदिक-गृहस्थाश्रम-सम्बन्धी श्रेष्ठतमो ग्रन्थः। मुद्रणकालः—सन् १९८६।

१०. उणादिकोशः—श्रीमद्दयानन्दसरस्वती स्वामिना विरचितया वृत्त्या अनेकविधैश्च परिशिष्टैः सहितः। सम्पादकः--युधिष्ठिरो मीमांसकः। सन् १९८७।

पुस्तक-प्राप्ति-स्थानम्—
रामलाल कपूर ट्रस्ट, बहालगढ़
(सोनीपत—हरयाणा) पिन् १३१०२१

श्रौत-यज्ञ-मीमांसाया विषय-सूची

यज्ञशब्दस्यार्थः (३), द्रव्य-यज्ञस्य लक्षणं तद्भेदाश्च (४), द्रव्य-यज्ञानां भेदाः (५), श्रौतस्मार्तभेदेन द्वौ विभागौ (५), श्रौतस्मार्तानां त्रयो विभागाः (६), काम्यानां त्रयो भेदाः (७), नित्यकाम्ययोः समानत्वेऽप्यनुष्ठाने भेदः (७), पुनस्तेषां द्रव्यभेदात् त्रयो भेदाः (८), पाकयज्ञादीनां त्रयाणां सप्त-सप्त भेदाः (८), कात्यायनश्रौतसूत्रे निर्दिष्टाः प्रमुखाः यज्ञाः (१०)।

श्रौतयज्ञानां प्रकृति-विकृति-भेदः (१०), प्रकृति-यागस्य लक्षणम् (१०), विकृति-यागस्य लक्षणम् (१२), प्रकृति-विकृतियागस्य लक्षणम् (१३), प्रकृति-विकृतिलक्षणरहिता यागाः (१४), यज्ञानां प्रकृति-विकृतित्वे मत-भेदः (१५), प्रकृतावूहो भवति न वा ? (१६)।

द्रव्ययज्ञानां प्रकल्पना-प्रयोजनम् (१६), द्रव्ययज्ञानां प्रकल्पनाया आधारः (१८), द्रव्ययज्ञानाम् आधिदैविकसृष्टियज्ञैस्तुलना—१. वेदिनिर्माणस्य पृथिवी-सर्गस्य च तुलना (१९), २. सोमयागस्य वृष्टियज्ञस्य च साम्यम् (२३), ३. अग्निचयने पुष्करपर्णनिधानविधे रहस्यम् (२३), ४. सृष्टि-यज्ञानां द्रव्य-यज्ञानां च देवतानां साम्यम् (२५), ५. त्रयाणां लोकानां यज्ञैः साम्यम् (२५)।

यज्ञानां प्रादुर्भावस्य कालः (२७), यज्ञानां क्रमशो विकासः (२८), यज्ञानां द्वौ भेदौ—प्रत्ना नूतनाश्च (२९), प्रारम्भिका यज्ञाः (२९), प्रारम्भिक-यज्ञेषु आडम्बरराहित्यं सात्त्विकता च (२९)।

स्वामिदयानन्दसरस्वतीसम्मता यज्ञ-प्रक्रिया (३३)।

याज्ञिकप्रक्रियायां परिवर्तनं, नूतनानां च यज्ञानां प्रकल्पना (३५)।

याज्ञिकप्रक्रियानुसारी वेदार्थः (३५), यज्ञानां प्रादुर्भावस्योत्तरकाले याज्ञिकप्रक्रियाया वेदार्थे प्रभावः (३७), काल्पनिका विनियोगाः (३८)।

काल्पनिकमन्त्राणां रचना (४१), याज्ञिकवादस्य मन्त्रानर्थक्यवादे परिणतिः (४२)।

श्रौतपशुयाग-मीमांसा (४४)

वेदविहिताः पशुयज्ञाः सृष्टियज्ञरूपाः (४५), आधिदैविकपदार्थेभ्यः 'पशु'शब्दस्य व्यवहारः (४८), यज्ञसम्बन्धि-आख्यानम् (५०)।

ऐतिहासिका देवा असुराश्च (५२), पृथिव्याः प्रथमशासका आसुराः (५२), असुरैर्वर्णाश्रम-मर्यादाया यज्ञानां च प्रवर्तनम् (५३), उक्तानाम् असुराणां विवेचना (५४)।

आलभते-आलभेत-पदयोः सम्बन्धे विचारः (५५), आ-लभ, आ-लम्भ इति द्वौ स्वतन्त्रौ धातू (५७), लभलम्भयोर्भिन्नार्थत्वम् (५९), 'घ्नन्ति' पदस्य प्रयोगः, तस्यार्थश्च (६१), मेध-शब्दार्थ-विचारः (६१)।

अग्निपशोरालभनं तेन यजनं च (६१), वायुपशोरालभनं तेन यजनं च (६४), सूर्यपशोरालभनं तेन यजनं च (६५)।

वशाया अवेरालभनम् (६८), अवेरनेकवारम् आलभनम् (६९)।

प्रसिद्धाः पशुयागाः (७०)

पुरुषमेधे पुरुषालभनम् (७१), यूपेषु नियुक्तानां पुरुषाणामुत्सर्जनम् (७२), पुरुषमेधस्य प्रयोजनम् (७२), पुरुषमेधस्य निर्वचनम् (७३), [पुरुषयागे] अनुबन्ध्याया गोरालम्भनम् (७४), आधिदैविकपक्षे [गोशब्द-स्यार्थः] (७५), अधिदैवतं सृष्टियज्ञो वा (७६)।

अश्वमेधस्याश्वः, तस्य चालभनम् (७६)

अश्वमेधस्य संक्षेपेण परिचयः (७६), अश्वमेधविषये विचारः (७७), अश्वः (७८), अश्वस्य रशना (७८), राज्ञः चतस्रः पत्न्यः (७८), [एकपत्नीव्रतपरायणा रामादयः कथमश्वमेधं चक्रुः ? (७९)], अश्वस्यैक-वर्षमितं परिभ्रमणम् (७९), विजितेभ्यो राजस्य उपहाराणां ग्रहणम् (८०), ऋग्वेदीयान्यश्वमेधसूक्तानि (८०)।

गोमेधस्य गौः, तस्याश्चालभनम् ८२

गवामयनस्य गाव आदित्याः (८२), अनुबन्ध्या-वशा-अनड्वाहीशब्दा-नाम् अर्थः (८२-८३), कलौ गवालम्भनस्य प्रतिषेधः (८३), गोः स्थाने आमिक्षया पयस्यया घृतेन वा कर्मसमापनम् (८३), अन्येषां पशूनामा-लम्भनानन्तरं गवालम्भनं प्रवृत्तम् (८३)।

अविमेधस्य अविः, तस्याश्चालभनम् ८४

अजमेधस्य अजः,तस्य चालम्भनम् ८४
पशुयज्ञसंबन्धिनि एकार्थवादे विचारः ८५
पशुयागेषु पशुपुरोडाशस्य विधानम् ८६
पश्वालम्भनाभावे यज्ञस्य पूर्तिः ८७
अभ्युपगमसिद्धान्तेन पशुयागेषु विचारः ९०
वैष्णवसम्प्रदाये पशुयागः ९१
आदिमानवा निरामिषभोजिनः ९३
मांसाहारस्यारम्भः ९४
यज्ञेषु पशुहिंसायाः प्रवृत्तिः ९६
गवालम्भनाद् अष्टानवतिरोगाणामुत्पत्तिः (९७), गवालम्भनस्य प्रथमः प्रवर्तकः (९८), पृषध्र इति कस्य नहुषो नाम ? (९९)।
यज्ञेषु पश्वालम्भविधायकभ्रान्तेर्द्वे कारणे १००
वेदेषु पशुहिंसाया विधानमस्तीति भ्रमः (१००), अजशब्दस्यार्थे भ्रमः (१००), अजशब्दस्यार्थः (१००), पुरुष-अश्व-गो-अविशब्दानामर्थेषु भ्रान्तिः (१०१)।
उपसंहारः १०२
भवन्ति चात्र श्लोकाः १०४
दाक्षायणादीनां गुणतधिकरणस्य पर्यालोचना १०७

श्रौतयज्ञ-मीमांसायाः संशोधन-पत्रम्

पृष्ठम्	पङ्क्ति	अशुद्धः	शुद्धः
१३	९	तस्याङ्गता	तस्याङ्गभूता
२६	१	यत्रगतै०	यज्ञगतै०
,,	१०	द्युस्थानीयो यजमानो	पृथिवीस्थानीयो यजमानो
३२	२३	वेत्ययोर्मीमांसा	वेत्यनयोर्मीमांसा
४९	२०	पुरुषाध्यायः पुरुषसूक्त-स्थेषु	पुरुषाध्याय-पुरुषसूक्तस्थेषु
५१	१३	मध्यमूले	मध्यभूते
,,	१५	आसुरप्रवृत्तानां	आसुरप्रवृत्तीनां
६८	५	प्रस्तूयमाणे	प्रस्तूयमाने
,,	१०	मेघ	मेघ
,,	१३	तमसाऽवृतकरणं	तमसाऽऽवृतकरणं
७०	११	तेचोऽग्ना	तेजोऽग्ना
७३	१८	ब्रह्मक्षत्रादयः	उत्तरेषां ब्रह्मक्षत्रादयः
७९	१२	कटुः	क्रतुः
८१	५	स्मारकानि	स्मारकाणि
८२	५	अश्वमेधयो०	पुरुषमेधाश्वमेधयो०
८९	२०	सम्पादितम्	सम्पादितः
९१	२	विक्रमोर्वशी-अभि०	विक्रमोर्वशीय-अभि०
९२	३	पशुयागसम्बन्ध	पशुयागसंबन्धे
,,	७	आलते	आलभते
,,	१७	तस्याश्चिालम्भनम्	तस्याश्चालम्भनम्
९६	१९	तैरुक्तो	तैरुक्तं
,,	२६	एतत्पृष्ठस्था ३ तृतीया टिप्पणी अग्रिमपृष्ठस्य २१ एकविंशत्यां पङ्क्तौ पठितस्य 'पृषध्रो' पदस्य विज्ञेया।	
१०७	११	'वेदार्थकल्पद्रुम'	'वेदार्थपारिजात'
,,	१२	सहायकेन	तत्सहायकेन वा
१७९	३	मैत्रायणी	तैत्तिरीय

———

श्रौत-यज्ञ-मीमांसा

श्रौत-यज्ञ-मीमांसा

श्रौतयज्ञानां मीमांसाकरणात् प्राग् 'यज्ञ'शब्दविषये विचार आवश्यकः। तेन यज्ञस्य श्रौतकर्मव्यतिरिक्तस्य तस्य समस्तस्य प्रयोगक्षेत्रस्य परिज्ञानं भविष्यति, यत्र यत्र यज्ञशब्दः प्रयुज्यते, अथवा प्रयोगाभावेऽपि तस्य क्षेत्रे समायाति।

यज्ञ-शब्दस्यार्थः—यज्ञशब्दो **यज देवपूजासंगतिकरणदानेषु** (पा० धातु० (१।७२८) इति देवपूजाद्यर्थकाद् 'यज' धातोः **यजयाचयतविच्छप्रच्छरक्षो नङ्** (अष्टा० ३।३।९०) इति पाणिनीयलक्षणाद् भावे नङ् प्रत्ययो भूत्वा प्रसिद्ध्यति। **'देवपूजा'** पदे देवेति पूर्वपदं **दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमद-स्वप्नकान्तिगतिषु** (पा० धातु० ४।१) इति क्रीडाद्यनेकार्थकाद् दिवु धातोः निष्पद्यते—**दीव्यतीति देवः**। धातोरनेकार्थकत्वाद् देवशब्दोऽपि बह्वर्थः। पूजेति नाम सत्कारः=यथायोग्यं व्यवहारः। देवपदवाच्यं प्राकृतं जडतत्त्वं स्याद् यदि वा चेतनतत्त्वम्, सर्वैः सह यथायोग्यं व्यवहरणं **देवपूजेत्युच्यते**। प्राकृतानाम् अग्नि-जल-वाय्वादीनां पदार्थानां प्राणिमात्रस्य कल्याणायोचित उपयोगो देवपूजा ज्ञेया। अग्निना कस्यचिद् गृहस्य दाहः, कस्यचित् क्षेत्रस्य जलप्रवाहमवरुध्या-न्यक्षेत्रे जलाभावोत्पादनम्, नद्यादिषु मलादीनां प्रवाहणम्, वायुं विविधदोषैर्-दूषयित्वा प्राणिनां जीवन-संकटोत्पादनम् इत्येवंरूपो व्यवहारो **देव-अपूजा** भवति। **सगतिकरणम्**—प्राकृतानां पदार्थानां यथोचितमात्रासु तथा संयोगकरणं, येन प्राणिनां कल्याणम्, उत्कर्षो वा स्यात्, श्रेष्ठानां धर्मात्मनां विदुषां सङ्गश्च। अनेन संगतिकरणेन शिल्पविज्ञानमपि यज्ञपदेन व्यवह्रियते। **दानम्**—स्वयमुपार्जितस्य धन-सम्पत्ति-विद्यादीनां प्राणिमात्रस्य कल्याणायोत्सर्जनम्। एवं च यज्ञशब्दस्य प्रयोगक्षेत्रमतिविस्तृतं वर्तते। अनयैव दृष्ट्या दयानन्दसरस्वतीस्वामिना यजुर्वेदभाष्ये लिखितम्—

धात्वर्थाद् यज्ञार्थस्त्रिविधो भवति—विद्या-ज्ञान-धर्मानुष्ठान-वृद्धानां देवानां विदुषाम् ऐहिकपारलौकिक-सुख-सम्पादनाय सत्करणम्, सम्यक् पदार्थगुणसंमेल-विरोधज्ञानसंगत्या शिल्पविद्याप्रत्यक्षीकरणं नित्यविद्वत्समागमानुष्ठानं [च]; विद्यासुखधर्मादिशुभगुणानां[1] नित्यं दानकरणम्॥ यजुर्भाष्य १।२॥

---

१. अत्र 'शुभविद्यासुखधर्मादिगुणानाम्' इति मुद्रितेऽपपाठः।

यजुर्भिर्यज्यन्ति (निरुक्त १३।७) इति वचनानुसारं यजुर्भिर्यस्य यज्ञकर्मणो निरूपणं क्रियते, तस्य निर्देशो यजुर्वेदस्योपक्रमे **श्रेष्ठतमाय कर्मणे** (१।१) इत्यनेन श्रेष्ठतमकर्मरूपेण कृतः, उपसंहारे च **कुर्वन्नेवेह कर्माणि** (४०।२) इत्यत्र निष्कामकर्मरूपेण संकेतितः। इत्थं च संसारस्य समस्तानि शुभकर्माणि, यानि व्यक्तिभेदैः, देश-काल-परिस्थितिभेदैश्च स्वस्य प्राणिमात्रस्य च कल्याणाय कर्तव्यरूपाणि सन्ति, तेषां समस्तानां यज्ञरूपकर्मणामेव यजुर्वेदे वर्णनं वर्तते। एतच्च यजुर्वेदस्योपक्रमोपसंहाराभ्यां विस्पष्टं विज्ञायते। शतपथब्राह्मणं द्रव्यमययज्ञानां प्रतिपादकमिति कृत्वा तत्र **यज्ञो वै श्रेष्ठतमं कर्म**[1] इत्येवं मन्त्रोक्तं सामान्यं 'श्रेष्ठतमं कर्म' द्रव्ययज्ञमात्रविशेषेऽवरुद्धम्।

सम्भाव्यते यज्ञशब्दस्य धात्वर्थानुसारिणोऽर्थस्य व्यापकतामभिलक्ष्यैव भगवद्गीतायां (४।२८) यज्ञानां **द्रव्ययज्ञ-तपोयज्ञ-योगयज्ञ-स्वाध्याययज्ञ-ज्ञानयज्ञ**-रूपा विविधा भेदा निदर्शिताः। अनया दृष्ट्या गीतायाश्चतुर्थाध्यायस्य एकोनत्रिंशत्तमाच्छ्लोकादारभ्य त्रयस्त्रिंशत्संख्यापर्यन्ताः पञ्च श्लोका विशेषरूपेण द्रष्टुमर्हाः सन्ति। अत एव लोके यत् किञ्चिदपि लोकोपकारकं कर्म क्रियते, तेन सह यज्ञशब्दस्य प्रयोगो दृश्यते।

इत्थं वेदे श्रुतस्य यज्ञशब्दस्य व्यापकमर्थम् इङ्गित्वा प्रतिपाद्यभूतानां श्रौतयज्ञानां सम्बन्धे विचार्यते।

द्रव्य-यज्ञस्य लक्षणं तद्भेदाश्च

प्रतिपाद्यरूपस्य द्रव्ययज्ञस्य लक्षणं कात्यायनश्रौतसूत्रे **द्रव्यं देवता त्यागः** (१।२।२) इत्येवं निरूपितम्। अस्येदं तात्पर्यम्—यस्मिन् कर्मणि द्रव्यस्य देवतायास्त्यागस्य च सहभावो भवति तत्कर्म यज्ञ इत्युच्यते। तेन **देवतोद्देशेन द्रव्यस्य त्यागो**[2] **यज्ञः** इत्युक्तं भवति। यत इमे श्रौतयज्ञाः केनापि द्रव्यविशेषेण

---

१. शत० १।७।१।५।। केचन विद्वांसः 'यज्ञो वै श्रेष्ठतमं कर्म' इत्यस्य 'यज्ञो नाम श्रेष्ठतमं कर्म' अर्थात् यज्ञेन सर्वाणि श्रेष्ठतमानि कर्माण्युच्यन्ते इत्यर्थम् आचक्षते। तच्चिन्त्यम्। अत्र हि मन्त्रस्थे 'श्रेष्ठतमाय कर्मणे' इति पदे व्याख्येये स्तः, 'यज्ञः' इति तयोर्व्याख्यापदमिति प्रकरणेऽस्मिन् स्पष्टम्। अत एतादृशां ब्राह्मणवचनानामर्थपरिज्ञानाय व्याख्येयोंऽशः पूर्वं विज्ञातव्यः। अन्यथा प्रतिवाक्यं विपरीताभिप्रायस्य संभावना भवितुं शक्नोति।

२. त्यागस्यार्थः **'स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनम्'** अत्राभिप्रेतः।

क्रियन्तेऽतो गीतायाम् (४।२८)एते 'द्रव्ययज्ञाः' कथिताः। वयमपीहान्ययज्ञानां व्यावृत्त्यै एषां निर्देशो द्रव्ययज्ञशब्देनैव करिष्यामः।

यद्यपि यज्ञेषु देवतोद्देशेन हविषस्त्यागः प्रायेणाग्नौ क्रियते, तथापि यज्ञस्योक्तपरिभाषायां त्याग-स्थानस्यानिर्देशात् **देवतोद्देशेन द्रव्यस्य त्यागः** इत्येव यज्ञपदार्थो ज्ञेयः। अतएव सोमयागेषु अवभृथेष्टौ जले होम क्रियते—**अप्सु जुहोति** (कात्या० श्रौत १०।८।२६), सोमक्रयाय या सोमक्रयणी गौः, तस्याः सोम-क्रयार्थं नीयमानाया भूमौ यत्र सप्तमं पदं पतति, तस्मिन्नेव स्थाने घृताहुतिर्दीयते—**सप्तमे पदे जुहोति** (तै० सं० ६।१।८।१)। इत्थमेव वृषोत्सर्गयज्ञे प्रजापतिदेवतायै वृषभे विशिष्टमङ्कनं कृत्वा तस्य त्यागमात्रम्=उत्सर्गमात्रं भवति।

द्रव्य-यज्ञानां भेदाः

ये खलु यज्ञा मन्त्र-ब्राह्मण-श्रौत-गृह्य-धर्मसूत्रादिषु विधीयन्ते तेषामनेकधा विभाग उपलभ्यते। तेषामिह क्रमशो निर्देशः क्रियते—

श्रौत-स्मार्तभेदेन द्वौ विभागौ—येषां यज्ञानां साक्षात् श्रुतिषु[1] विधानमुपलभ्यते ते श्रौतयज्ञा उच्यन्ते। येषां विधानं गृह्य-धर्मसूत्रेषु क्रियते ते स्मार्तयज्ञा इत्याख्यायन्ते। गृह्यसूत्रेषु प्राधान्येन गृहस्थोपयोगीनि संस्कारादिकर्माणि विधीयन्ते। धर्मसूत्रेषु मानवसमाजस्य गुण-कर्म-स्वभावादिविभागशो विशिष्टानि कर्माणि निरूप्यन्ते। यतो गृह्यसूत्र-धर्मसूत्रोक्तानां कर्मणां श्रुतौ साक्षाद् विधानं नोपलभ्यते अत ऋषिभिः श्रुतीनामन्यार्थपरेभ्यो वचनेभ्य एषां कर्मणां

अत एव **तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम्** (यजुः ४०।१) इति श्रुतेरर्थः—'तेन चराचरस्य जगत ईशा यद् भोग्यपदार्थः कस्मैचित् प्रदत्तः, तस्यैवोपभोगः कार्यः, नान्यस्य धनस्य=भोग्यपदार्थस्याभिलाषां कुरु' इत्येवं द्रष्टव्यः।

१. यथा याज्ञिकानां मते मन्त्रब्राह्मणयोर्वेदसंज्ञाऽऽम्नायसंज्ञा च पारिभाषिकी, तथैव श्रुतिसंज्ञाऽपि विनियोगविधायकयोर्मन्त्रब्राह्मणयोः पारिभाषिकी। यथा—**'इत उत्तरं श्रुतिरूपा मन्त्रा आश्वमेधिकानां पशूनां द्रव्यदेवता-सम्बन्धस्याभिधायिनः·····।'** शुक्लयजुषश्चतुर्विंशतितमाध्यायस्य आरम्भे उव्वटभाष्यं द्रष्टव्यम्।

संकेतम् उपलभ्य[1] विधानं क्रियते अर्थात् स्मर्यते। अत एव गृह्यसूत्रधर्मसूत्रेषु स्मृतिपदमुपयुज्यते। श्रुतिस्मृतिविरोधे न स्मृतिः प्रमाणम् इति समेषां वैदिकानां मतम्। तदुक्तं भगवता जैमिनिना—**विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमानम्** (मी० १।३।३) इति।

श्रौतस्मार्तानां त्रयो विभागाः—श्रौतस्मार्तयज्ञानां पुनः प्रत्येकं **नित्य-काम्य-नैमित्तिकभेदेन** त्रयो विभागा भवन्ति।

नित्याः—ते यज्ञा नित्या उच्यन्ते येषां यथाकालं नियमतो यथाविधानं कर्तव्यत्वमुच्यते। याज्ञिकानां मतानुसारं नित्ययज्ञाः फलभावनां विना क्रियन्ते, अतस्तेषां किञ्चिल्लौकिकं फलं न स्वीक्रियते, परन्तु तेषामकरणे प्रत्यवायो भवति। अस्मन्मते तु नैत्यकानि[2] कर्माणि यतो निष्कामभावनयाऽर्थात् कर्तव्य-बुद्धया क्रियन्ते, अतस्तेषां फलम् आत्मशुद्धि-पूर्वकं मोक्षप्राप्तिः शक्यते वक्तुम्। अत्र याज्ञिकानामपि मतभेदस्य नास्त्यवकाशः।

अग्निहोत्रादारभ्य सोमान्ताः (=अग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि अग्निष्टोमश्च) नित्ययज्ञाः प्रकीर्तिताः। द्र०—आप० श्रौत १।१।१ सूत्रस्य धूर्त-स्वामिनो भाष्यं तस्या वृत्तिश्च (मैसूर संस्क० भाग १, पृष्ठ ५), तथा आप० धर्म० २।२१।७ सूत्रस्य हरदत्तीया व्याख्या। महाभारते शान्तिपर्वणि (२६९। २०) अग्निहोत्रं दर्शपूर्णमासौ, चातुर्मास्यानि च त्रयो यज्ञाः प्राचीना उक्ताः—

दर्शं च पौर्णमासं च अग्निहोत्रं च धीमतः।
चातुर्मास्यानि चैवासन् तेषु धर्मः सनातनः॥

नैमित्तिकाः—एते यज्ञा भूकम्पातिवृष्ट्यनावृष्टिगृहदाहादिषु निमित्तेषु प्रयुज्यन्ते।

काम्याः—ये यज्ञा लौकिकफलानाम् अवाप्त्यै तत्तत्कामनापूर्वकं क्रियन्ते,

---

१. मीमांसकाः एतस्मिन्नर्थे 'दर्शनम्' '**लिङ्गदर्शनम्**' इति वा पदस्य व्यवहारं कुर्वन्ति। यथा—प्रपाः प्रवर्तयितव्याः, तडागानि खनितव्यानि इति स्मार्तकर्मणोर्विधानस्य प्रामाण्यार्थं मीमांसाभाष्यकार आह—'तथा च दर्शनम्—धन्वन्निव प्रपा असि (ऋ० १०।४।१) इति। तथा स्थलयोदकं परिगृह्णन्ति (तै० सं० १।६।१०।५) इति च' (द्र०—मी० भा० १।३।२); लिङ्गदर्शन-पदस्य प्रयोगो मीमांसासूत्रेषु बहुत्रोपलभ्यते।

२. द्र०—नैत्यके नास्त्यनध्यायः। मनु० २।१०६॥ अन्येषां मते 'नैत्यिक' शब्दः।

ते काम्या उच्यन्ते । यतो लौकिक्यः कामना बहुविधा भवन्ति, अतस्तेषामवाप्त्यै शाखा-ब्राह्मण-श्रौत-गृह्य-धर्मसूत्रादिषु बहूनां काम्यानां यज्ञानां विधानमुपलभ्यते । एषां काम्यकर्मणां विस्तारस्त्रेतायुगे समभवत्—**तानि त्रेतायां बहुधा सन्ततानि** (मुण्डकोप० १।२।१) ।

काम्यानां त्रयो भेदाः—काम्या यज्ञास्त्रिविधाः सन्ति । तत्र केचन एतादृशाः सन्ति येषां कामनाविशेषाय स्वतन्त्रं विधानमुपलभ्यते । यथा—**वैश्वदेवीं सांग्रहणीं निर्वपेद् ग्रामकामः**[1] (तै० सं० २।३।६।२) । अपरे काम्या यज्ञा एतादृशाः सन्ति, ये नित्यविहिताः सन्तोऽपि स्वल्पभेदेन तेषु काम्यत्वमुक्तम् । यथा नित्यस्य पयसा सम्पाद्यमानस्याग्निहोत्रस्यैव इन्द्रियकामनया दध्ना विधानमुक्तम्—**दध्नेन्द्रियकामस्य** (तै० ब्रा० २।१।५।६) । कतिपयान्येतादृंश्यपि कर्माणि सन्ति ये नित्यविहिताः सन्तस्तेनैव रूपेण कामनाविशेषेभ्योऽपि क्रियन्ते । यथा—**वसन्ते वसन्ते ज्योतिषा यजेत** (मी० ३।३।१६ भाष्य उदधृतम्) । अत्र **वसन्ते वसन्ते** इति द्विर्वचनं नित्यार्थम् (द्र०—**नित्यवीप्सयोः** अष्टा० ८।१।४) इदमेव कर्म **स्वर्गकामो ज्योतिष्टोमेन यजेत । एककामः सर्वकामो वा । युगपत् कामयेताहारपृथक्त्वे वा** (आप० श्रौत १०।२।१) ।

नित्यकाम्ययोः समानत्वेऽप्यनुष्ठाने भेदः—नित्यकाम्यकर्मयोः समानत्वेऽपि उभयोरनुष्ठानेऽस्त्येको भेदः । यथा—काम्यकर्मणोऽनुष्ठानं सर्वाङ्गपूर्णं कर्तव्यं भवति । यतः सर्वाङ्गपूर्णं कर्मैव फलस्य साधकं भवति, परन्तु नैत्यककर्मणः सर्वाङ्गपूर्णानुष्ठानस्य विधानेऽपि यदि कयाचिद् दैव्या बाधया सर्वाङ्गपूर्णकर्मणोऽनुष्ठानेऽशक्तिः स्याच्चेद् यावद्भिरङ्गैः सह प्रधानं कर्म सम्पद्येत, तावतैव तस्य कर्तव्यता पूर्यते । अतस्तत्र प्रयोगविधिरशक्यान् अङ्गान् नानुष्ठाने संगृह्णाति । एतस्मादेव कारणात् कतिपयाङ्गानां परित्यागेऽपि दोषो न भवति । एतस्मिन् विषये मीमांसाया **'नित्ये यथाशक्त्यनुष्ठातुरप्यधिकाराधिकरणम्'** (६।३।१-७) द्रष्टव्यम् ।

नित्यकर्मसम्बन्धे उक्ताधिकरणेनेदमपि विस्पष्टं भवति यन्नित्यकर्मणामनुष्ठाने विकलाङ्गानामप्यधिकारोऽस्ति । यथा—अन्धः पुरुषो यजमानेन क्रियमाणमाज्यावेक्षणं कर्म कर्तुं न शक्तः, शिष्टं याजमानं कर्म तु कर्तुं शक्नोत्येव । एवमेव पङ्गुर्विष्णुक्रमानुष्ठानव्यतिरिक्तं कर्म तु कर्तुं शक्नोत्येव । एतस्मात्

---

१. एतस्या इष्टेर्या विषये न्यायमञ्जर्यां जयन्तभट्टेनोक्तम्—'तथाह्यस्मत्पितामह एव ग्रामकामः सांग्रहणीं कृतवान्, स इष्टिसमाप्तिसमनन्तरमेव गौरमूलकं ग्राममवाप' । न्यायमञ्जरी, पृष्ठ २७४ ।

कारणाद् अङ्गहीनानां श्रौतकर्मण्यनधिकारनिदर्शकानां वचनानां (यथा—द्र०—कात्या० श्रौत १।१।५) तात्पर्यं काम्यकर्मविषयकमेव ज्ञेयम् ।

पुनस्तेषां द्रव्यभेदात् त्रयो भेदाः—उक्तानां त्रिविधानां श्रौतयज्ञानां यज्ञीय पदार्थानां भेदात् पुनस्त्रयो भेदा भवन्ति । एतेषु प्रथमास्ते यज्ञाः सन्ति येषां द्रव्यं मानवीया भोज्यरूपाः पदार्थाः सन्ति । यथा—व्रीहयो यवास्तिला गोधूमाः पयोदधि घृतादयः । एते द्रव्या अग्नौ पक्त्वैव यज्ञेषु प्रयुज्यन्ते अतस्ते **पाकयज्ञा** इत्युच्यन्ते । अपरे ते यज्ञाः सन्ति येषु सोमस्तत्स्थानीया पूतिका वा प्रयुज्यते । एते **सोमयज्ञा** उच्यन्ते । अन्ये ते यज्ञाः, येषां द्रव्यं विविधाः पशवो भवन्ति । एते **पशुबन्धनाम्ना** व्यवह्रियन्ते (केचन 'पशुयज्ञ'नाम्नापि व्यवहरन्ति) । एतेषां पशुबन्धनाम्नि यद् रहस्यं वर्तते, तदुपरिष्टाद् यथास्थानं स्पष्टीभविष्यति ।

पाकयज्ञादीनां त्रयाणां सप्त-सप्त भेदाः—गोपथब्राह्मणे (१।१।१२) पैप्पलादसंहितायाः (५।२८।१) **अग्निर्यज्ञं त्रिविधं सप्ततन्तुम्** इति मन्त्रांशमुद्धृत्योक्तम्—

अथाप्येष प्राक्रीडितः श्लोकः प्रत्यभिवदति—

सप्त सुत्याः सप्त च पाकयज्ञा इति ।

गोपथब्राह्मण इह श्लोकस्य द्वितीयं चरणं नष्टम् । यतोह्यत्र सप्त सुत्याः सप्त पाकयज्ञा एव परिगणिताः । मन्त्रानुसारम् एकसप्तकमिह त्रुटितम् । गोपथब्राह्मण एवाऽन्यत्र (१।५।२५) अयं पाठ इत्थमुपलभ्यते—

सप्त सुत्याः सप्त च पाकयज्ञाः
हविर्यज्ञाः सप्त तथैकविंशतिः ।
सर्वे ते यज्ञा अङ्गिरसोऽपि यन्ति
नूतना यानृषयः सृजन्ति ये च सृष्टाः पुराणैः ॥

उक्तानां त्रयाणामपि सप्तकानां गोपथब्राह्मण (१।५।२३) एवेत्थं नामनिर्देशः समुपलभ्यते—

सायंप्रातर्होमौ स्थालीपाको नवश्च यः ।
बलिश्च पितृयज्ञश्चाष्टका सप्तमः पशुरित्येते पाकयज्ञाः ।
अग्न्याधेयमग्निहोत्रं पौर्णमास्यमावास्ये ।
नवेष्टिश्चातुर्मास्यानि पशुबन्धोऽत्र सप्तम इत्येते हविर्यज्ञाः ।

अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यषोडशिमांस्ततः ।
वाजपेयोऽतिरात्राप्तोर्यामात्र सप्तम इत्येते सुत्याः ।

एतद्विभागानुसारम्—

पाकयज्ञाः—सायंहोमः प्रातर्होमः, नवः स्थालीपाकः, बलिवैश्वदेवः, पितृयज्ञः, अष्टका पशुश्च ।

हविर्यज्ञाः—अग्न्याधेयम्, अग्निहोत्रम्, पौर्णमासेष्टिः, आमावास्येष्टिः, नवसस्येष्टिः, चातुर्मास्यानि, पशुबन्धश्च ।

सुत्याः=सोमयागाः—अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, अप्तोर्यामश्च ।

गोपथब्राह्मणे पाकयज्ञा हविर्यज्ञाश्च पार्थक्येनोक्ताः । अस्माभिस्तु हविर्यज्ञेष्वपि हविर्द्रव्यस्य पाकविधानात् सामान्येनोभयोः पाकयज्ञरूपेणैव भेदः प्रदर्शितः । गोपथब्राह्मणोक्तानां सप्तपाकयज्ञानां सम्बन्धः गृह्यसूत्रैः सह वर्तते । एते च गृह्योक्ता यज्ञाः स्मार्ता उच्यन्ते इत्युक्तं प्राक् । अवशिष्टानां सप्तहविर्यज्ञानां सप्तसोमयागानां च सम्बन्धो मन्त्रब्राह्मणैः सहास्तीति कृत्वा एते श्रौतयज्ञा[1] अभिधीयन्ते । एषु एकविंशतियज्ञेषु पशुयज्ञा अप्युक्ताः । एतेषां विषयेऽग्रे यथावसरं विचारः करिष्यते ।

वस्तुतो गोपथब्राह्मणोक्ता गणना पैप्पलादसंहितायाः (५।२८।१) **अग्निर्यज्ञं त्रिवृतं सप्त तन्तुम्** इति मन्त्रांशस्य व्याख्यानरूपेण कृता । वस्तुतः परिगणितेभ्यः सप्तपाकयज्ञेभ्योऽतिरिक्ता अप्यनेके पाकयज्ञा गृह्यसूत्रेषूपलभ्यन्ते । हविर्यज्ञानां सोमयज्ञानां चापि बहवो भेदाः शाखा-ब्राह्मण-श्रौतसूत्रेषु निर्दिश्यन्ते । दयानन्दसरस्वतीस्वामिना यत्र क्वचिदपि यज्ञानां समुल्लेखः कृतस्तत्र सर्वत्र **अग्निहोत्रादारभ्याश्वमेधपर्यन्ताः** इत्येवं निर्दिष्टाः[2] । अश्वमेधान्तशब्दस्य प्रयोगे

---

१. श्रुत्या साक्षाद् विधानाद् इमे श्रौतयज्ञा उच्यन्ते ।

२. यथा—'परन्त्वेतैर्वेदमन्त्रैः कर्मकाण्डविनियोजितैर्यत्र यत्राग्निहोत्राद्यश्वमेधान्ते.....।' ऋग्वेदादिभाष्यभूमिका, प्रतिज्ञाविषय ३८८ तमे पृष्ठे (रामलाल कपूर ट्रस्ट संस्क० २) । 'वर्गद्वयस्थैर्नवभिर्मन्त्रैरग्निहोत्राद्यश्वमेधपर्यन्तेषु .....।' ऋग्वेदभाष्यनिदर्शनाङ्के प्रथमसूक्तान्ते । (दयानन्दीयलघुग्रन्थसंग्रह, पृष्ठ १६३, रा० ला० क० ट्र० सं०)। 'जो अग्निहोत्र से लेकर अश्वमेधपर्यन्त .....।' आर्योद्देश्यरत्नमाला, संख्या ४७ (द० ल० ग्रन्थसंग्रह, पृष्ठ ५७६)।

कारणमिदं प्रतीयते यच्छतपथब्राह्मणे कात्यायनश्रौतसूत्रे चाश्वमेधस्य विधानं सर्वान्ति उपलभ्यते। वस्तुतो यज्ञानां विस्तारोऽग्निहोत्रादारभ्य सहस्रसंवत्सर-साध्ययज्ञपर्यन्तं वर्तते। शाखा-ब्राह्मण-श्रौतसूत्रेष्वेषामग्निहोत्रादारभ्य सहस्रसंवत्सर-साध्य-क्रतुपर्यन्तानां यज्ञानां विधिविधानमुपलभ्यते। उदाहरणार्थमिह कात्यायनश्रौतसूत्रे निर्दिष्टानां प्रमुखयज्ञानां निर्देशः क्रियते—

१. अग्न्याधानम् (अ० ४)
२. अग्निहोत्रम् (अ० ४)
३. दर्शपूर्णमासौ (अ० २-३-४)
४. दाक्षायणयागः (अ० ४)
५. आग्रयणेष्टिः (अ० ४)
६. दर्विहोमः, क्रैडिनीयेष्टिः, आदित्येष्टिः, मित्रविन्देष्टिः (अ० ५)
७. चातुर्मास्यानि (अ० ५)
८. निरूढपशुबन्धः (अ० ६)
९. सोमयागः (अ० ७-११)
१०. एकाहाः (अ० १२,२२)
११. द्वादशाहः (अ० १२)
१२. सत्ररूपो द्वादशाहः (अ० १२)
१३. गवामयनम् (अ० १३)
१४. वाजपेयः (अ० १४)
१५. राजसूयः (अ० १५)
१६. अग्निचयनम् (अ० १६-१७-१८)
१७. सौत्रामणिः (अ० १९)
१८. अश्वमेधः (अ० २०)
१९. पुरुषमेधः (अ० २१)
२०. अभिचार-यागः (अ० २२)
२१. अहीन-अतिरात्रः (अ० २३)
२२. सत्रणि [द्वादशाहादारभ्य सहस्रासंवत्सरान्तानि] (अ० २४)
२३. प्रवर्ग्यः (अ० २६)

अन्यश्रौतसूत्रेषु एतादृशामेव न्यूनाधिकानां यागानां वर्णनमुपलभ्यते।

श्रौत-यज्ञानां प्रकृति-विकृतिभेदः

उक्ताः सर्वेऽपि श्रौतयज्ञाः प्रक्रिया-दृष्ट्या त्रिधा विभज्यन्ते—

१. **प्रकृतियागः**

२. **विकृतियागः**

३. **प्रकृतिविकृत्युभयात्मकः**।

प्रकृतियागस्य लक्षणम्—प्रकृतियागस्य त्रीणि लक्षणानि याज्ञिकैर्मीमांसकैश्च प्रदर्श्यन्ते—

१. यत्र कृत्स्नं क्रियाकलापम्[1] उच्यते सा प्रकृतिः[2]। यथा—दर्शपूर्णमासौ।

२. यतो विकृतिरङ्गानि गृह्णाति सा प्रकृतिः[3]। यथा—दर्शपूर्णमासौ।

३. 'प्रकृतिवद् विकृतिः कर्तव्या' इति चोदकाद् यत्र नाङ्गप्राप्तिः सा प्रकृतिः[4]।

एतानि त्रीण्यपि लक्षणानि स्वल्पभेदेन मीमांसान्यायप्रकाश उप : । एषु प्रथमलक्षणानुसारं गृहमेधीयेष्टिः दर्विहोमश्च प्रकृतियागेऽन्तर्गतौ भवतः[5]। यत इमे कर्मणी यावदुक्ते स्वीक्रियेते। द्वितीयलक्षणानुसारं गृहमेधीयेष्टेर्दर्विहोमतश्च न कापि विकृतिरङ्गानि गृह्णाति, अत नैते प्रकृतियागेऽन्तर्भवतः[6]। तृतीयलक्षणानुसारं गृहमेधीयेष्टिर्दर्विहोमश्च प्रकृतिकर्मणी भवतः।

---

१. कलापशब्दो लिङ्गानुशासनकारैः प्रायेण पुंल्लिङ्गो निर्दिश्यते। तथापि **लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य** (महाभाष्य २।१।३६) इति पतञ्जलिवचनात्, **'सम्बन्धमनुवर्तिष्यते'** इति महाभाष्ये (१।१।१) पुंल्लिङ्गस्य नपुंसके प्रयोगाच्च कलापशब्दस्य पुंस्त्वं प्रायिकं ज्ञेयम्।

२. **'यत्र समग्राङ्गोपदेशः सा प्रकृतिः'** इति मीमांसान्यायप्रकाशकारः (द्र०—**सारविवेचनी** व्याख्यासहित, पृष्ठ ५२, काशी संस्कृतसीरिज, सन् १९२१)। **'प्रकर्षेण** अङ्गोपदेशो यत्र क्रियते सा प्रकृतिः। कृत्स्नाङ्गविषयत्व प्रकर्षः' इति सायणः (वै० सं० भाष्यभूमिका, पृष्ठ ८, पं० १३, वै० सं० मं० पुणे; **वेदभाष्यभूमिकासंग्रहः**, काशी, पृष्ठ ६)।

३. द्र०—मीमांसान्यायप्रकाशः, पूर्वोक्तमेव संस्करणम्, पृष्ठ ४४; पं० ५।

४. द्र०—मीमांसान्यायप्रकाशः, पूर्वोक्तं संस्क०, पृष्ठ ४४, पं० ७।

५. मीमांसाप्रवक्त्रा **विकृतौ प्राकृतस्य विधेर्दर्शनात् पुनः श्रुतिरनर्थिका स्यात्** (१०।७।२४) इति सूत्रेण विकृतौ चोदकेन प्राप्तानां प्राकृतधर्माणां दर्शनात् चोदकवचनेन पुनः प्राप्तिरनर्थिका भवेत् इत्यतो गृहमेधीयेष्टेर्यावदुक्तकर्मता प्रतिपादिता। शब्दान्तरेण गृहमेधीयेष्टिर्विकृतियाग इत्युक्तं भवति। तथापि प्रकृतियागात् प्राप्तानां केषांचिद् धर्माणां श्रुतौ निर्देशस्योपलम्भाद् अत्र तावन्त एव धर्माः परिगृह्यन्ते येऽत्रोपदिष्टाः। सूत्रकारस्यैतद्वचनानुसारं प्रकृतेः प्रथमलक्षणानुसारं गृहमेधीयेष्टिः प्रकृतिकर्मान्तर्गता परिगृह्यते। अत्र २४ तमात् सूत्रात् ३३ तमसूत्रपर्यन्तं कृत्स्नमधिकरणं द्रष्टव्यम्।

६. 'यस्य पर्णमयी जुहूर्भवति इत्यादीनाम् अनारम्याधीतविधीनां प्रकृति-

एषु लक्षणेषु प्रथमं लक्षणं सुगमं दोषरहितं च वर्तते। नवीनमीमांसकैर्द्वितीयलक्षणानुसारं गृहमेधीयेष्टौ पर्णताया अप्राप्तिकारणात् तृतीयं लक्षणमास्थितम्। इद तृतीयं लक्षणं न केवलं क्लिष्टम् अपितु लक्षणान्तर्गतयोः प्रकृतिविकृत्योरन्योन्याश्रयत्वाद् अन्योन्याश्रयदोषदुष्टमप्यस्ति। नहि प्रकृतेर्लक्षणमविज्ञाय विकृतेर्ज्ञानं भवति, अविज्ञाते च विकृतौ **'चोदकाद् यत्र नाङ्गप्राप्तिः'** इति न वक्तुं शक्यते। अयं दोषो द्वितीयलक्षणेऽपि वर्तते। यतस्तत्र प्रकृतिलक्षणे विकृतिपदस्यापि निवेशोऽस्ति—**यतो विकृतिरङ्गानि गृह्णाति सा प्रकृतिः** इति।

विकृतियागस्य लक्षणम्--येषु यागेषु तत्तत्कर्मोपयोगी समस्तः क्रियाकलापो न पठ्यते, कर्मणः पूर्त्यर्थं च य अन्यतः (=प्रकृतेः) क्रियाकलापान् गृह्णन्ति ते विकृतियागा उच्यन्ते। यथा—**दीक्षणीयेष्टिः,**[1] **दाक्षायणेष्टिः मित्रविन्देष्टिः।**

गामित्वं मीमांसकैरास्थीयते। यदि नाम गृहमेधीयेष्टिर्न प्रकृतिः, तर्हि तत्र पर्णतायाः प्राप्तिर्न भवितुं शक्या, इष्यते च। अत एव मीमांसान्यायप्रकाशकारेणोक्तम्—'अत्र विकृतिर्यतोऽङ्गानि गृह्णाति सा प्रकृतिरिति न प्रकृतिशब्देन विवक्षितम्, गृहमेधीये पर्णताया अप्राप्तिप्रसङ्गात्। नहि गृहमेधीयात् काचन विकृतिरङ्गानि गृह्णाति मानाभावात्। किन्तु चोदकाद् यत्राङ्गाप्राप्तिस्तत्कर्म प्रकृतिशब्देन विवक्षितम्। यथा दर्शपूर्णमासौ·····गृहमेधीयादिष्वपि न चोदकादङ्गप्राप्तिः।·····यत्र चोदकाप्रवृत्तिस्तत्रानारभ्याधीतानां सन्निवेशः' इति। मी० न्या० प्र०, पृष्ठ ४४, पूर्वोक्तमेव संस्क०।

आपस्तम्बपरिभाषाप्रकरणस्थस्य **'त्रिभिः कारणैः प्रकृतिर्निवर्तते प्रत्याम्नानात् प्रतिषेधादर्थलोपाच्च'** (४।२) इति सूत्रस्य व्याख्यायां हरदत्तकपर्दिस्वामिनौ'चकारात्' नियम-परिसंख्या-भूतोपदेशानां कारणानामपि संग्रहणं कुरुतः। प्रकृतेः परिसंख्यया गृहमेधीयेष्टौ चोदकात् प्रयाजादीनां प्राप्तावपि पुनः गृहमेधीयेष्टौ आज्यभागस्य विधानं प्रयाजादीनां निवृत्यर्थं मन्वाते। एतत्प्रमाणेन गृहमेधीयेष्टेर्विकृतित्वं बाधितं भवति।

१. स्वामिकरपात्रनाम्ना प्रसिद्धे 'वेदार्थ-पारिजात'नाम्नि ग्रन्थे केनचिन्मीमांसकमन्येन अत्र द्वे विप्रतिपत्ती प्रदर्शिते। तत्र **प्रथमा**—'अस्य क्रतोर्दाक्षायणेष्टिरिति न व्यवहारो मीमांसकेषु, किन्तु दाक्षायणयज्ञ इत्येव व्यवहारः' इति (द्र०—पृष्ठ २०९९)। अत्रोच्यते—लेखकस्य मते 'दाक्षायणयज्ञेन स्वर्गकामो यजेत' इत्येवं विहितो दाक्षायणयज्ञो न दर्शपूर्णमासाभ्यां भिन्नोऽपितु तत्रैव अभ्यासरूपगुणफलविधिः (तत्रैव, पृष्ठ २०९९)। सत्येवं यदि दर्श-

प्रकृति-विकृति-यागस्य लक्षणम्—यो यागः स्वयं विकृतिरूपः सन्नप्यन्यस्य कस्यचिद् यागस्य प्रकृतिभाव गच्छति, स प्रकृति-विकृतिरूपो यागो निगद्यते। यथा—चातुर्मास्यानां **वैश्वदेवं पर्व**। वैश्वदेवं पर्व स्वकर्मपूर्त्यर्थं प्रकृतेः सकाशाद् अङ्गानि समादत्ते। परन्त्विदमेव वैश्वदेवं पर्व चातुर्मास्यानाम् उत्तरपर्वणां प्रकृतिभावमापद्यते। तदुक्तम्—**वैश्वदेवं वरुणप्रघाससाकमेधशुनासीरीयाणाम्** (आप० परि० ३।३६) इति। प्रकृतिरित्युपरिष्टादनुवर्तते।

यतोऽग्निष्टोमे सोमयाग-सम्बन्धी समस्तः पदार्थः साकल्येनोपदिश्यते,अतोऽयमन्येषां सोमयागानां प्रकृतिरुच्यते—**अग्निष्टोम एकाहानां प्रकृतिः** (आप० परि० ४।३)। किन्तु तस्याङ्गता दीक्षणीयेष्टिः, उपसदिष्टिः, आतिथ्येष्टिश्चेत्यादय इष्टयः स्वक्रियाकलापान् दर्शपूर्णमासाभ्यां गृह्णन्ति। अङ्गैः सह क्रियमाण कर्मैव फलप्रदं भवति। इत्थमग्निष्टोमोऽन्यसोमयागानां प्रकृतिः, किन्तु तस्याङ्गरूपा अवान्तरेष्टयः विकृतयः। यथा विकृतिरूपेण स्वीकृतासु इष्टिषु प्रधानकर्मणस्तत्तत्प्रकरणे निर्देशे सत्यप्यङ्गकर्मणां प्रकृतेर्ग्रहणाद् ता विकृतय उच्यन्ते तथैवात्रावान्तरेष्टीनां विकृतिरूपत्वात् विकृतिरूपत्वमप्यस्त्येव।

पूर्णमासयोः दर्शेष्टिः पूर्णमासेष्टिः पदाभ्यां प्रयोगो भवति तर्हि तत्रैव गुणफलविधिरूपेण निर्दिष्टे दाक्षायणयज्ञे इष्टित्वं केन वारयितुं शक्यते ? इष्टेर्लक्षणम् —'इष्टिशब्दः ऋत्विक्चतुष्टयसम्पाद्यसपत्नीकयजमानकर्तृककर्मनाम' (द्र०—श्रौतपदार्थनिर्वचनम्, पृष्ठ १)। इदं च लक्षणं दाक्षायणक्रतावपि समवैति। तेनास्येष्टित्वमेव। इदमन्यद् यल्लेखकस्य मतानुसारं मीमांसकेषु 'दाक्षायणयज्ञ' इत्येव व्यवहारः। सत्यपि तथा व्यवहारे कथं तेन दाक्षायणयागस्य इष्टित्वमपाकर्तुं शक्यते। **द्वितीया**—'दाक्षायणयागः दर्शपूर्णमासयोरेवाभ्यासगुणरूपो न क्रत्वन्तरम्। तेन नायं विकृतियाग' इति। वस्तुतस्तु शबरस्वामी कुमारिलभट्टस्तदनुयायिनो न दाक्षायणयागं क्रत्वन्तरं मन्यन्ते। परन्त्वेषां मतं वैदिकमतविरोधान्न ग्रहीतुं योग्यम्। यथा तु दाक्षायणयज्ञस्य विधानं कौषीतकिब्राह्मणे दृश्यते तथाऽस्य क्रत्वन्तरत्वं विकृतित्वमेव प्रमाणीभवति। कुतूहलवृत्तिकारेण दाक्षायणयागे गुणफलविधेः प्रत्याख्यानं कृत्वाऽस्य यागान्तरत्वं विकृतियागत्वं च सप्रमाणं व्यवस्थापितम्। अस्मिन् विषये विशेषविचारोऽस्य निबन्धस्यान्ते द्रष्टव्यः। तत्र कुतूहलवृत्तिकारस्य मतं तच्छब्देष्वेव विस्तरेणोपस्थापयिष्यते।

उक्तलेखस्य विषये देदार्थपारिजातकारेण लिखितम्—**'म० म० चिन्नस्वामिशास्त्रिचरणा यदि जीवदवस्थायां वर्तेरन् तर्हि नूनं मन्येरन् यन्मया क्षीरप्रदानेन सर्पः पालित इति'** (भाग २, पृष्ठ २१००)। परमोदारचरितानां **यशःकायशरीरेण** वर्तमानानां पूज्यपादाचार्यचरणानां सम्बन्ध इत्थं लेखनं लेखक**स्यैव** मनोविकारं प्रकटयति। आचार्यपादैस्तु स्वयं **यज्ञतत्त्वप्रकाशे** अग्निष्टोमविषय इत्थं प्रत्यपादि—

अत्र बहूनामिष्टिपशूनां सत्यप्यनुष्ठाने तेषामङ्गत्वात् सोमद्रव्यकयागस्यैव प्राधान्याच्च सोमयाग इति व्यवहारः। अग्निष्टोमाख्येन साम्ना समाप्यमानत्वाच्च अग्निष्टोम इति प्रकृतियागो व्यवह्रियते। पृष्ठ ५७।

यत्त्वत्रैव (पृष्ठ २१००) वेदार्थपारिजातकृत् लिखति—**दीक्षणीयादीष्टीनां तदेकदेशत्वं न, किन्तु तदङ्गत्वम्**। अहो लेखकस्य वाचालता! किं हस्तपादादीन्यङ्गानि शरीरस्यैकदेशा न सन्ति? किं हस्ते छिन्ने तस्याङ्गत्वाद् एकदेशाभावात् कश्चिन्मूर्खोऽपि तं शरीरं सर्वदेशसम्पन्नं वक्ष्यति?

अस्तु नामाङ्गैकदेशत्वयोर्भेदः, तदेतद् वक्तव्यम्—यथा नित्या यागा देशकालपरिस्थितिवशाद् कैश्चिदङ्गैर्विहीना अपि सम्पाद्यन्ते कर्मणोऽलोपार्थम्, तथैव किं **वसन्ते वसन्ते ज्योतिषा यजेत** इत्येवं नित्यविहितो ज्योतिष्टोमो दीक्षणीयेष्ट्यादिभिरङ्गैर्विहीनोऽपि शक्यते सम्पादयितुम्? यदि सम्पादयितुं शक्यते **तर्हि** दीक्षादिसंस्कारविरहितोऽपि यजमानः सोमयागेऽधिकृतो भवेत्।

षड्दिनसाध्येऽग्निष्टोमे पञ्चमं दिवसमतिरिच्य **अवशिष्टेषु** पञ्चसु दिव**सेषु** त्विष्टयः पशुयागाश्चैव भवन्ति। अत आचार्यपादैः स्पष्टं लिखितम् **'अत्र बहूनामिष्टिपशूनां सत्यप्यनुष्ठाने तेषामङ्गत्वात् सोमद्रव्यकयागस्यैव प्राधान्याच्च सोमयाग इति व्यवहारः।'**

प्रकृति-विकृतिलक्षणरहिता यागाः—प्रकृतेर्द्वितीयलक्षणानुसारं तु गृहमेधीयेष्टिर्दर्विहोमश्चैवंभूते कर्मणी ये न कुतश्चिद् अङ्गानि गृह्णीतो नाभ्यां किञ्चित् कर्मान्तरमङ्गानि गृह्णाति। अत एते कर्मणी न प्रकृती स्तो नापि विकृती। सत्येवं अनारभ्याधीतानां पर्णतादिविधीनां प्रकृतिगामित्वे नैषां गृहमेधीयेष्टौ प्राप्तिः सम्भवति। अत एव मीमांसान्यायप्रकाशकारेण पर्णतादीनां गृहमेधीयेष्टौ प्राप्त्यर्थं **चोदकाद् यत्र नाङ्गप्राप्तिः सा प्रकृतिः** इति लक्षणं स्वीकृतम्। एतल्लक्षणे स्वीकृते गृहमेधीयेष्टेः प्रकृतित्वं प्राप्नोति। तथा सति मीमांसायाः शाबरभाष्यानुसारं दशमाध्यायस्य सप्तमपादस्य गृहमेधीयेष्टेरपूर्वताविधानाधिकरणे (अधि० ९, सूत्र २४-३३) निर्णीतो न्यायो नोपपद्यते। एतच्च

वेदार्थपारिजातस्य लेखकेनापि स्वीकृतम् । यदाह—तर्ह्यनारभ्याधीतायाः पर्णताया निवेशः कथं गृहमेधीयेष्टौ भवतु ? इति शङ्कायाः समाधानाय **'चोदकाद् यत्र नाङ्गप्राप्तिः लक्षणं प्रकृतियागशब्देन विवक्षितम्'** इति (पृष्ठ २०९७) । सत्येवं **'यत्र कृत्स्नं क्रियाकलापमुच्यते सा प्रकृतिः** इत्येव प्रकृतेर्निर्दुष्टं लक्षणम् ।[1]

१. **हविर्यज्ञानां प्रकृतिः**—समस्तानां हविर्यज्ञानां प्रकृतिः **दर्शपूर्णमासौ** ।

२. **सोमयागानां प्रकृतिः**—समस्तानामेकाहानां प्रकृतिः **अग्निष्टोमः** ।

३. **पशुबन्धानां (पशुयागानां) प्रकृतिः**—संहिताब्राह्मणयोरनुसारं **समस्त**-पशुयागानां प्रकृतिरग्निष्टोमान्तर्गतोऽग्नीषोमीयः पशुयागः । यतस्तत्प्रकरण एव पशुयाग-सम्बन्धी समस्तः क्रियाकलापः पठ्यते । श्रौतसूत्रकारैस्तु पशुयाग-सम्बन्धि समस्तमङ्गजातं निरूढपशुबन्धप्रकरण उच्यते । अतः श्रौतसूत्रकाराणां मते निरूढपशुबन्धः पशुयागानां प्रकृतिः ।

यज्ञानां प्रकृति-विकृतित्वे मतभेदः

अस्माभिर्मीमांसकानां याज्ञिकानां च मतानुसारं प्रकृतिविकृत्योर्यानि लक्षणान्युदाहरणानि चोक्तानि, तानि न साम्प्रतिकमीमांसकैर्याज्ञिकैश्च सर्वथा मान्यानि । अस्य प्रधानं कारणं तेषामेकाङ्गि ज्ञानं सम्प्रदायबद्धता च वर्तते । एतद् अस्माभिर्दाक्षायणेष्टेर्यद्वा दाक्षायणयज्ञस्य प्रकरणे कृतूहलवृत्तिकारमतमुद्धृत्य विस्पष्टीकृतम् ।

वस्तुतस्तु प्रकृति-विकृतिभावे आचार्याणां लक्षणभेदैर्दृष्टिभेदैश्च भेदो द्रष्टुं शक्यते । लक्षणभेदैर्गृहमेधीयेष्टेः प्रकृतित्वं विकृतित्वं च कथंकारं विज्ञायत इति पूर्वत्रोक्तम् । दृष्टिभेदेन दर्विहोमविषयको मतभेद इह प्रस्तूयते । बोधायनगृह्यसूत्रे दर्विहोमं प्रकृत्योक्तम्—

आघारं प्रकृतिं प्राह दर्विहोमस्य बादरिः ।
अग्निहोत्रं तथाऽऽत्रेयः काशकृत्स्नस्त्वपूर्वताम् ॥ १।४।४४॥

अनेन वचनेन बादरिमते दर्विहोमस्य आघारः प्रकृतिः, आत्रेयमते अग्निहोत्रम् । अर्थाद् दर्विहोमो विकृतिरूपः । काशकृत्स्नस्तु दर्विहोमस्य अपूर्वतामाह अर्थान्न स प्रकृतिर्न विकृतिः । इदमेव साम्प्रतिकानां मीमांसकानां मतम् ।

---

१. द्र०—'यत्र समग्राङ्गोपदेशः सा प्रकृतिः इत्येव प्रकृतेर्लक्षणम् ।' वेदार्थपारिजात, पृष्ठ २०९६ ।

प्रकृतावूहो भवति न वा

प्रकृतौ पठितेषु मन्त्रेषूहो न भवतीति साम्प्रतिकानां मीमांसकानां केषाञ्चिद् याज्ञिकानां च मतम्। आपस्तम्बस्तु स्पष्टमाह—**न प्रकृतावूहो विद्यते** (आप० परि० ३।४८)। अस्मन्मते त्वयमौत्सर्गिको नियमः, प्रायिको वा। वस्तुतस्तु क्वचित् प्रकृतिपठितमन्त्रेष्वप्यूहो भवति। यथा—दर्शपूर्णमास-प्रकरणे पुरोडाशस्य द्वे वैकल्पिके द्रव्ये उक्ते—**व्रीहिभिर्यजेत यवैर्वा यजेत**। दर्शपूर्णमासयोः पुरोडाशयोः श्रपणे सम्पन्ने कपालेभ्यस्तावुद्धृत्य पुरोडाशपात्र्यां निधानाय मन्त्रः पठ्यते—**तस्मिन्त्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्य-मानः**। मन्त्रोऽयं पुरोडाशयोर्व्रीहिमयत्वे तु यथावदुपपद्यते, परन्तु यवपक्षे नायं मन्त्रः **'एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं। यत्कर्म क्रियमाणमृग्यजुर्वाऽभिवदति'** (गो०ब्रा०२।२।६) इति विनियोगलक्षणानुसारं वक्तुं शक्यते **व्रीहीणां मेध** शब्द-योर्विरोधात्। एतस्मिन् विषये आपस्तम्बेन तु यवमयपुरोडाशस्य तूष्णीमासा-दनमुक्तम्—**तूष्णीं यवमयम्** (२।११।२)। लिङ्गविरोधाच्चेति तत्र हेतुमाह रुद्रदत्तः। हरदत्तेनापि **न प्रकृतावूहो विद्यते** (आप० परि० ३ ४८) इति सूत्र-व्याख्यानेऽयमेव पक्ष आस्थितः। वस्तुतस्तु मन्त्रस्य निवृत्तिं कृत्वा यवमययोः पुरोडाशयोस्तूष्णीं स्थापनापेक्षया **यवानां मेध** इत्येवमूहकरणं युक्तिसंगतम्। मानवश्रौतसूत्रे (१।२।६।२२) तु **यवानां मेध इति यवानाम्** इति स्पष्टमूहः प्रदर्शितः। भगवता पतञ्जलिनाप्युक्तम्—**न च सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्ति-भिर्वेदे मन्त्राः पठिताः, ते च यज्ञगतेन पुरुषेण यथायथमूहितव्याः** इति (महा-भाष्य पस्पशाह्निके)। एव च **सर्वे विधयः सापवादाः** इति नियमेन यत्र प्रकृतावपि यदि क्वचिल्लिङ्गादिविरोध आपद्येत तर्हि तत्र कर्मणः समृद्धयै यथायथमूहः कर्तव्यः।

सम्प्रति द्रव्यमयानां श्रौतयज्ञानां प्रकल्पनायां को हेतुः, कदा चैषां प्रादुर्भावः समजनि, कथं च तत्र परिवर्धनं परिवर्तनं चाभूदिति संक्षेपतः प्रस्तूयते—

द्रव्ययज्ञानां प्रकल्पना-प्रयोजनम्

सृष्ट्यादौ सत्त्वगुणविशिष्टा योगजशक्ति-संपन्नाः परावरज्ञा ऋषयः स्वीय-दिव्यमानस-शक्त्या अस्य चराचरस्य जगतः परमाणुत आरभ्य परममहद्द्रव्य-पर्यन्तं समस्तं पदार्थजातं हस्तामलकवद् द्रष्टुं समर्था बभूवुः।[1] उत्तरोत्तरं

---

१. साक्षात्कृतधर्माण ऋषयो बभूवुः। निरुक्त १।२०॥ पुरा खलु अपरिमित-शक्तिप्रभावीर्य ..... धर्मसत्त्वशुद्धतेजसः पुरुषा बभूवुः॥ पराशरकृत-

सत्त्वगुणस्य ह्रासाद् रजस्तमोगुणयोर्वृद्ध्या च काम-क्रोध-लोभ-मोहादयः प्रादुर्बभूवुः[1]। तैर्वशीभूता मानवी प्रजा सुखविशेषेच्छया प्राजापत्यान् शाश्वत-नियमान् उल्लङ्घ्य कृत्रिमं जीवनं यापयितुं प्रवृत्ता[2]। यथा यथा आवश्यकता वृद्धिं गतवती तथा तथा जीवन-साधनेषु कृत्रिमता अपि ववर्धे। एतेन सहैव मानवीयानां दिव्यशक्तीनां ह्रासोऽपि समजनि[1]। तासां ह्रासेन सूक्ष्म-दूरस्थ-व्यवहिताः पदार्था अज्ञेया अभूवन्। अतो ब्रह्माण्डस्य पिण्डस्य (=शरीरस्य) च कीदृशी रचनेति ज्ञातुं मानवा असमर्थाः समजायन्त। अत एव आधिभौतिकाधिदैविकाध्यात्मिक-प्रक्रियानुसारी वेदार्थोऽपि दुरूहः समभवत्। एतादृशे काले तात्कालिकैः साक्षात्कृतधर्मभिः परावरज्ञैर्ऋषिभिर्**ब्रह्माण्डस्य पिण्डस्य च रचनां विज्ञापयितुम्, अथ चाधिदैविकस्याध्यात्मिकस्य च प्राचीनवेदार्थस्य सुरक्षायै यज्ञानां प्रकल्पनाऽकारि**। यज्ञानां मूलभूतं प्रयोजनं दैवताध्यात्मयो-र्विज्ञापनमेव वर्तते। एतस्मिन् विषये भगवता यास्केन **वाचं शुश्रुवाँ अफलाम-पुष्पाम्** (ऋ० १०।७१।५) इति ऋक्चरणस्य व्याख्यान उक्तम्—**अर्थं वाचः पुष्पफलमाह याज्ञदैवते पुष्पफले देवताध्यात्मे वा** (निरुक्त १।२) इति। **अथर्ववेदेऽप्युक्तम्—तस्माद्वा ओदनात् त्रयस्त्रिंशतं लोकान् निरमिमीत प्रजा-पतिः। तेषां प्रज्ञानाय** यज्ञान् **असृजत्** (अथर्व० ११।३ (३), ५२, ५३) इति।

भगवतो यास्कस्य मतानुसारं यज्ञदैवतयोः ज्ञानं यथाक्रमं पुष्पफलस्थानीयम् अर्थाद् **यथा** पुष्पाणि फलानां निष्पत्तौ कारणानि भवन्ति, तथैव याज्ञिक-

---

ज्योतिषसंहिताया वचनम्, उत्पलकृतायां बृहत्संहितायाष्टीकायाः १५ शे पृष्ठे उद्धृतम्।

१. (क) तेषां क्रमादपचीयमानसत्त्वानाम् उपचीयमानरजस्तमस्कानां तेजोऽन्तर्दधे॥ पराशरकृतज्योतिषसंहिताया वचनम्, तत्रैव १५ शे पृष्ठे उद्धृतम्।

(ख) 'भ्रंश्यति तु कृतयुगे···लोभः प्रादुरासीत्॥२८॥ ततस्त्रेतायां लोभाद-भिद्रोहः, अभिद्रोहाद् अनृतवचनम्, अनृतवचनात् कामक्रोधमानद्वेषपारुष्याभिधा-तभयतापशोकचिन्तोद्वेगादयः प्रवृत्ताः' ॥२९॥ चरकसंहिता विमानस्थान अ० ३॥

२. ता इमाः प्रजास्तथैवोपजीवन्ति यथैवाभ्यः प्रजापतिर्व्यदधात्। नैव देवा अतिक्रामन्ति न पितरो न पशवः। मनुष्या **एवैकेऽतिक्रामन्ति**। शत० २।४।२।५-६॥

प्रक्रियाया ज्ञानं दैवतज्ञाने (=ब्रह्माण्डविज्ञाने) कारणम् । यदा च दैवतज्ञानं सम्पद्यते,तदा तदेवाध्यात्मज्ञानदृष्ट्या पुष्पस्थानीयं सत् फलस्थानीयमध्यात्मज्ञानं सम्पादयति । अत एव ब्राह्मणग्रन्थेषु बहुत्र याज्ञिकप्रक्रियानुसारं मन्त्रं व्याख्याय **इत्यधियज्ञम्** इत्युक्त्वा **अथाधिदैवतम्, अथाध्यात्मम्** इत्यादिरूपा निर्देशा उपलभ्यन्ते । तेन च अधियज्ञ-अधिदैवत-अध्यात्मप्रक्रियाणां पारस्परिकी समता निदर्शिता भवति । या चाथर्ववेदस्य श्रुतिरुद्धृता तस्यां तु स्पष्टमेव **तेषां (=लोकानां) प्रज्ञानाय यज्ञान् असृजत्** इत्युक्तम् ।

उक्तविवेचनया इदं सुव्यक्तं भवति यद् यज्ञानां प्रकल्पना ब्रह्माण्डस्य पिण्डस्य च सूक्ष्मरचनाया यथावद् विज्ञानायैव प्राचीनैर्ऋषिभिः कृता । अत एव यज्ञकर्मणि प्रमादात् किञ्चिन्मात्रपरिवर्तने सति कर्म फलप्रद न भवति, पात्राणां च यथास्थानं स्थापनाभावे फलप्रदमपूर्वं नोत्पद्यते इत्याद्याः प्रकल्पना याज्ञिकैः क्रियन्ते । अस्यां प्रकल्पनायां य आधारः स इत्थमञ्जसाऽवबोद्धुं शक्यते—पृथिव्याः खगोलस्य च विज्ञानाय तयोर्मानचित्राणि निर्मीयन्ते प्रकाश्यन्ते च । एषु मानचित्रेषु यदि प्रमादवशेन यत्किञ्चिदप्यन्यथाऽङ्कनं भवति चेत् तेन मानचित्राणि भ्रान्तिजनकत्वात् हेयानि सम्पद्यन्ते, अर्थाद् यस्मै प्रयोजनाय तानि मानचित्राणि निर्मीयन्ते न तानि तत्प्रयोजनं पूरयन्ति । अनयैव दृष्ट्या यज्ञीयमपि प्रत्येकं कर्म यथाशास्त्रं सम्पादनीयं भवति पात्राणि च यथास्थानं स्थापनार्हाणि भवन्ति । अन्यथा तत्र कथमपि भेदे सति आधिदैविकजगतो वास्तविकी स्थितिर्न ज्ञातुं शक्यते अर्थात् कर्म सफलं न भवति, यद्वा फलप्रापकम् अदृष्टं नोत्पद्यते ।

इत्थं भूगोल-खगोलयोर्मानचित्राणामिव श्रौतयज्ञा अप्याधिदैविकस्य अध्यात्मं च जगतो विज्ञानाय साधनभूता एव, न तु स्वयं साध्यरूपाः ।

द्रव्ययज्ञानां प्रकल्पनाया आधारः

विराट्पुरुषेण (=ब्रह्मणा) स्वसरूपः[1] शारीरपुरुषस्य (=जीवस्य) शरीररचनायां स्वीयविराट्शरीरस्य (=ब्रह्माण्डस्य) रचनाया अनुकरणं व्यधायि अर्थाद् इदं मानवशरीरमस्य [2]ब्रह्माण्डस्यैवैका लघ्वी प्रतिकृतिरस्ति ।

---

१. द्वा सुपर्णा सयुजा सखाया । ऋग्वेद १।१६४।२० ॥

२. अस्मदीयं मानवशरीरम् अस्मदीयस्य सौरमण्डलस्य प्रतिकृतिः । इत्थमेव अन्यान्यपि पश्वादीनां शरीराणि ब्रह्माण्डस्य अन्येषां सौरमण्डलानाम् अनुकृतिभूतानि ज्ञेयानि ।

अत एव आयुर्वेदीयायाश्चरकसंहितायाः **'पुरुषविचय'**नाम्नि अध्याये (शारीर० अ० २५)। **पुरुषोऽयं लोकसम्मितः** इत्येवं निर्दिश्य पुरुषस्य लोकेन सह विस्तरेण समता प्रदर्शिता। एतन्मूलिकैव **यद् ब्रह्माण्डे तत्पिण्डे** इत्युक्तिर्लोके प्रसिद्धिगता। परावरज्ञैर्ऋषिभिः स्वदिव्ययोगजशक्त्या ब्रह्माण्डस्य पिण्डस्य च रचनासाम्यम् अनुभूय उभयोरपि प्रतिनिधिरूपेण श्रौतयज्ञानां कल्पना कृता। अत एव ब्राह्मणग्रन्थेषु बहुत्र **इत्यधियज्ञम् अथाधिदैवतम् अथाध्यात्मम्** इत्युक्त्वा त्रयाणां पारस्परिकं तुलनात्मकं व्याख्यानमुपलभ्यते। इदमित्थमपि वक्तुं शक्यते—**यथा भूगोलस्य खगोलस्य च विविधानां देशनक्षत्रादिरूपाणां अवयवानां वास्तविकीं स्थितिं ज्ञापयितुं तयोर्मानचित्राणि प्रकल्प्यन्ते, यद्वा कस्याश्चित् परोक्षाया घटनायाः प्रत्यक्षरूपेण निदर्शनाय नाटकानां प्रकल्पना क्रियते, तथव पिण्डब्रह्माण्डयो रचनां परिज्ञापयितुमृषिभिर्यज्ञानां प्रकल्पना कृता।** अर्थाद् यज्ञानां प्रकल्पनाऽपि भूगोलखगोलयोर्मानचित्राणीव वैज्ञानिकतथ्याधार एवाऽभूत्।

अपि च पृथिव्या विविधप्रदेशानां परिज्ञापनाय यथा नगर-मण्डल-प्रान्त-देश-महादेशानां क्रम आश्रीयते, तदर्थं चानेकविधानि मानचित्राणि निर्मीयन्ते, तथैव ब्रह्माण्डस्य पिण्डस्य च स्थूल-सूक्ष्मरचनां क्रमशः परिज्ञापयितुम् **अग्निहोत्र-दर्शपूर्णमास-चातुर्मास्या**दिरूपा विविधा यज्ञाः प्रकल्पिताः। कल्पनादेव यज्ञानां **'कल्प'** इत्येकं नाम। तस्य व्याख्यानानि[1] च कल्पसूत्राणि उच्यन्ते।

विविधानां श्रौतयज्ञानां प्रकल्पना सृष्टिं विज्ञापयितुमेव कृतेति तथ्यं हृदयंगमं कारयितुं द्रव्ययज्ञानां सृष्टियज्ञानां च काचित् समता समुपस्थाप्यते।

द्रव्य-यज्ञानाम् आधिदैविकसृष्टियज्ञैस्तुलना

द्रव्ययज्ञानां सृष्टियज्ञानां च समताप्रदर्शनाय कानिचित् प्रकरणान्युपस्थाप्यन्ते—

१—वेदि-निर्माणस्य पृथिवी-सर्गस्य च तुलना

प्रथमं तावद् वयं श्रौतयज्ञानाम् आधारभूताया वेद्या निर्मिति-प्रक्रियां अग्न्याधान-प्रक्रियां च, यस्याः शाखा-ब्राह्मण-श्रौतसूत्रेषु विस्तरेण विधानमुपलभ्यते, संक्षेपेण निदर्शयामः—

वेदि-निर्माण-प्रक्रिया—सर्वप्रथमं वेदिनिर्माणार्थं यज्ञोपयोगिन्या भूम्या

---

१. यज्ञं व्याख्यास्यामः। कात्या० श्रौत १।२।१॥

निरीक्षणं क्रियते। तदनन्तरं तस्यां भूमौ वेदिनिर्माणाय भूमेरुपरिस्थो भागः खन्यते, येनाशुद्धा मृत्तिका, तत्रस्थानि तृणानि तन्मूलानि च परिहृतानि भवेयुः। ततस्तस्मिन् स्थाने निम्नलिखिताः क्रियाः क्रियन्ते—

१—जलेन भूमिः सिच्यते। ततः

२—वराहविहता मृद् उपकीर्यते। ततः

३—वल्मीकवपा उपकीर्यते। ततः

४—ऊषरभूमेर्मृत्तिका उपकीर्यते। ततः

५—सिकता उपकीर्यन्ते। ततः

६—शर्करा उपकीर्यन्ते। ततः

७. इष्टिकाः स्थाप्यन्ते। ततः

८—सुवर्णं स्थाप्यते।[1] ततः

९—यज्ञीयकाष्ठानि चीयन्ते। ततः

१०—शमीगर्भोत्पन्नस्य अश्वत्थस्य काष्ठाभ्यां निर्मिते द्वे अरणी मन्थयित्वा अग्निमुत्पाद्य वेद्यां निधीयते।

पृथिवी-सर्ग-प्रक्रिया—अग्न्याधाने वेदिनिर्माणस्य या प्रक्रिया उक्ता सैव हिरण्यगर्भाख्यान्महदण्डाद्[2] यदा पृथिव्यादयो लोका निस्सृतास्तदानीं पृथिवी सलिलमयी आसीत्। तस्यास्तत्स्वरूपादारभ्य पृथिव्याः पृष्ठे यदाग्नेः प्रादुर्भावः समजनि तावति महति काले पृथिव्यां विविधानि परिवर्तनान्यभूवन्। पृथिव्या वेदेश्च साम्यं स्वयं श्रुतिर्दर्शयति—**इयं वेदिः परो अन्तः पृथिव्याः** (यजुः २३।६२)। शतपथब्राह्मणे पृथिव्याम् अस्मिन् काले यानि परिवर्तनान्यभूवन् तानि नवधा विभज्येत्थं वर्णितानि—

'स श्रान्तस्तेपानः फेनमसृजत।...स श्रान्तस्तेपानो मृदं शुष्कापमूषं सिकतं शर्करामश्मानम् अयोहिरण्यम् ओषधिवनस्पत्यसृजत। तेनेमां पृथिवीं प्राच्छादयत्।। शत० ६।१।१।१३।।

---

१. **हिरण्यमुपर्येके** (कात्या० श्रौत ४।८।१५)। **सम्भाराणामुपरि हिरण्यनिधानमेके आचार्या इच्छन्ति** इति तद्व्याख्यातारः।

२. हिरण्यगर्भत्वं महदण्डस्य चरमावस्था। तदुक्तं मनुस्मृतौ—तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् (१।९) इति। तदवस्थस्यैव महतोऽण्डस्य द्विधा भावाद् पृथिव्यादयो लोकाः स्वसत्तां प्रापुः। तदाह ऋक्—हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीमुत द्याम् (ऋ० १०।१२१।१) इति।

अत्र यो नवधा सर्ग उक्तः, तस्मिन् फेनस्य अप्प्रधानत्वाद् वेदिनिर्माणस्य या प्रक्रिया पुरस्तादुक्तास्तत्र तस्य निर्देशो न कृतः।

सम्प्रति वैदिकग्रन्थानामाधारेण वेदिनिर्माणस्य पृथिव्याश्च विविधसर्गाणां वर्णनं क्रियते। एतेन यत्पुरस्तादुक्तं तद् यथावत् स्पष्टं भविष्यति।

१—सर्गादौ पृथिवी सलिलमय्यासीत्—**आपो ह वा इदमग्रे सलिलमेवास** (शत० ११।६।१।६)। पृथिव्या इमां दशां निदर्शयितुं वेद्याः स्थाने प्रथमं जलं सिच्यते।

२—अग्निसंयोगात् सलिले फेनोऽजायत। स एव मरुतां संयोगात् घनत्वं[1] प्राप्य मृद्भावं गतः। तदुक्तम्—**स (फेनः) यदोपहन्यते मृदेव भवति** (शत० ६।१।३।३)।

मृद्भावत्वे सूर्यरश्मीनां विशिष्टं महत्त्वं भवति। इमे अङ्गिरसाख्यस्य सूर्यस्य पुत्रभूता अङ्गिरसो रश्मयो वराहा अप्युच्यन्ते। तस्मिन् काले पृथिव्याः स्वरूपं वराहमुखमिवाल्पप्रमाणमासीत्। अत एव वेदिनिर्माणे वराहविहतं मृदुपकीर्यते। तदुक्तं मैत्रायणी-संहितायाम्—**यावद् वै वराहस्य चषालम् तावतीयमग्र आसीत्** (१।६।३) इति। इह **'यावद् वै वराहस्य चषालम्'** इत्युक्तिः पृथिव्याः स्वल्पपरिमाणं द्योतयति।

३—यदा सैव मृत् सूर्यकिरणैः शुष्काऽभूत्, तदा शुष्कापरूपा सृष्टिरजायत। अस्यामवस्थायां मृदोऽधस्तात् जलमासीत्। तदुपरिष्ठः शुष्कापभागो वायुरूपिण इन्द्रस्य[2] योगात् पुष्करपर्णवत् लेलायमान[3] एवासीत्। एतामवस्थां **हन्ताहं पृथिवीमिमां निदधानीह वेह वा** (ऋ० १०।११९।९)

---

१. सोऽग्निमारुतसंयोगाद् घनत्वमुपपद्यते। महा० शान्ति० १८२।१५॥ यथा तप्ते दुग्धे यद्याच्छादनं क्रियते, तर्हि वायुसंयोगाभावात् तदुपरि सन्तानिका न जायते।

२. वायुर्वेन्द्रो वाऽन्तरिक्षस्थानः (निरुक्त ७।५) इति वचनान्नैरुक्तप्रक्रियायामन्तरिक्षस्थानीयवायुदेवतापक्षे मन्त्रपठितानामिन्द्रादिपदानां वाय्वर्थत्वं व्याचक्षते नैरुक्ताः। तथा चाह वररुचिः—'नैरुक्तपक्षेऽपि—इन्द्र दानादिगुण, इन्द्रो मध्यस्थानो वायुरुच्यते। हे इन्द्र वायो !···।' निरुक्तसमुच्चयः,पृष्ठ ८४।

३. सा हेयं पृथिव्यलेलायद् यथा पुष्करपर्णम्। शत० २।१।१।८॥

इत्येषा ऋग् द्योतयति। एतां शुष्कापरूपां पृथिव्या अवस्थां द्योतयितुं वेद्यां वल्मीकवपा उपकीर्यते—**यद् वल्मीकवपामुपकीर्याग्निमाधत्ते** (मै० सं० १। ६।३)।

४—सैव शुष्कापसंज्ञा मृत् सूर्यकिरणैः प्रतप्य ऊषत्वम् (=क्षारत्वम्) अलभत। अत एव वेद्याम् ऊषरभूमेर्मृद् उपकीर्यते। अत एवोक्तम्—**यदूषानुपकीर्याग्निमाधत्ते**। (मै० सं० १।६।३)।

५—तत्पश्चात् सैव ऊषाख्या मृत् सूर्यतेजसा तप्यमाना सिकतात्वमलभत। अत एवोक्तम्—**यत्सिकतामुपकीर्याग्निमाधत्ते** (मै० सं० १।६।३) इति।

६—तदनन्तरं ता एव सिकताः सूर्यतेजसाऽन्तरूष्मणा च तप्यमानाः शर्करात्वमविन्दन्त। सा शर्कराख्या सृष्टिरजायत। अत एवोक्तम्—**यच्छर्करा उपकीर्याग्निमाधत्ते** (मै० सं० १।६।३)।

यदा पृथिव्यां शर्करा उदपद्यन्त तदा यद्वैशिष्ट्यं समजायत, तदपि-वदिकग्रन्थेष्वित्थं प्रदर्श्यते—**शिथिरा वा इयमग्र आसीत्। तां प्रजापतिः शर्कराभिरदृंहत** (मै० सं० १।६।३)। अस्यैवाग्निरूपस्य कस्य (=प्रजापतेः) पृथिवीदृंहणं कर्म ऋग्वेदे इत्थं श्रूयते—**येन द्यौरुग्रा पृथिवी च दृढा** (ऋ० १०।१२१।५) इति।

७—तत्पश्चात् ता एव शर्करा अन्तरूष्मणा तप्यमानाः परस्परमेकीभूय अश्मत्वं गताः। सा अश्माख्या सृष्टिर्बभूव। अत एवोच्यते चयने—**इष्टकाभिरग्निं चिनोति** (तै० सं० ५।६।६।३) इति। नियताकारायां वेद्यां सुगमतायै नियताकारा इष्टका उपधीयन्ते। अश्मनां नियताकारे विपरिणामो विशेषेणायाससाध्य इति कृत्वा अश्मनां स्थाने तत्प्रतिनिधिभूता इष्टका निधीयन्ते।

८—ततस्त एवाश्मानोऽन्तरूष्मणा पच्यमाना लोहादारभ्याऽऽसुवर्णं धातुरूपेण विपरिणामं गताः। तद्रूपाऽयोहिरण्यरूपा सृष्टिः समपद्यत। अत एवोक्तम्—**हिरण्यमुपर्येके** (कात्या० श्रौत ४।८।१५) इति।

९—एवं पृथिव्याः पूर्णत्वेऽपि सा कूर्मपृष्ठवदलोमिकैवासीत्। तत्पश्चात् तत्पृष्ठ ओषधिवनस्पतयोऽजायन्त। पृथिव्या इमामवस्थामेव द्योतयितुं वैदिकग्रन्थेषूक्तम्—

'इयं वाऽलोमिकेवाग्र आसीत्' । ऐ० ब्रा० ५।२३॥

'ओषधिवनस्पतयो वा लोमानि' जै० ब्रा० २।५४॥

'इयं तर्ह्यूषाऽऽसीद् अलोमिका । तेऽब्रुवन् तस्मै कामायालभामहै, यथा-स्यामोषधयो वनस्पतयश्च जायन्त इति' मै० सं० २।५।२॥

अत एव वेद्यां हिरण्यं निधाय काष्ठानि तत्स्थानीया आरण्या गोमया वा स्थाप्यन्ते ।

१०—वनस्पतिषु समुत्पन्नेषु तेषां शाखानां वायुवेगेन परस्परं संघर्षणेन पृथिव्याः पृष्ठे सर्वप्रथमं अग्नेः प्रादुर्भावः समजनि । अत एव वेद उक्तम्—**तस्यास्ते पृथिवि देवयजनि पृष्ठेऽग्निमन्नादमन्नाद्यायादधे** (यजुः ३।५) ।

पृथिव्याः पृष्ठे प्रथममग्नेः प्रादुर्भावः कथमभूद् इत्यस्य परिज्ञापनायैव वेद्यां यस्याग्नेराधानं क्रियते सोऽश्वत्थकाष्ठनिर्मिताभ्याम् अरणीभ्यां मन्थयित्वैवोत्पाद्यते ।

२—सोमयागस्य वृष्टियज्ञस्य च साम्यम्

सोमयागस्य या विधिः शास्त्रेषु समुपलभ्यते, तस्याः वृष्टियज्ञेन सह पूर्णं साम्यं वर्तते । अस्मन्मते तु सोमयागेन वृष्टेरुत्पत्तिः कथं भवति, संवत्सरे च चातुर्मासिकेषु त्रिषु ऋतुषु कथं कियच्च जलं प्रवर्षति इत्यस्मै व्याख्यानं वर्तते । अत्रस्था अग्नीषोमीयः सवनीयः मैत्रावरुणी वशा गौश्चेति त्रयः पशवोऽप्यालभ्यन्ते । ते च पशवो न पार्थिवा अपितु आन्तरिक्षा एव सन्ति । तेषां तत्र यथाकालं समालभनं भवति ।

विषयोऽयं विस्तरमपेक्षते । अत इह संकेतमात्रमेव क्रियते । उभयोः पारस्परिकी तुलना श्रौतयज्ञमीमांसायाः हिन्दीभाषाभागान्ते विस्तरेण निदर्शयिष्यते । अतस्तत्रैव जिज्ञासुभिरवलोकनीयम् ।

३—अग्निचयने पुष्करपर्णनिधानविधे रहस्यम्

अग्निचयनयागो द्युस्थानीयस्य सुपर्णस्य आदित्यस्य सृष्टौ यत्कार्यजातं तन्निदर्शयति । यवाद्योषधीनां प्रादुर्भावे प्राणिनां जीवने च आदित्य एव मुख्यं कारणम् । अत एव चयनभूमिः पूर्वं कृष्यते बीजानि चोप्यन्ते । मुख्यानां पञ्च पशूनां प्रतिनिधिरूपेण तेषां शीर्ष्णां प्रतिकृतयो विधीयन्ते । तदनन्तरम् इष्टकाश्चीयन्ते । वैदिकग्रन्थानामनुशीलनेन विज्ञायते यदा हिरण्यगर्भरूपस्य महदण्डस्य द्विधाभावे पृथिव्यादयो लोका स्वस्थितिमलभन्त तदानीं

द्यावापृथिव्योरन्तरमल्पीय आसीत् । अस्याः स्थितेर्निदर्शनं **जामी सयोनी मिथुना समोकसा** (ऋ० १।१५६।४) इत्यस्यामृचि समुपलभ्यते । अस्या एव व्याख्यानं ब्राह्मणग्रन्थेष्वित्थं क्रियते—

द्यावापृथिवी सहास्ताम् । तै० सं० ५।२।३।३॥ तै० ब्रा० १।१।३।२॥

सह हैवेमावग्रे लोकावासतुः । शत० ७।१।२।२३॥

कालान्तरे समोकसौ द्यावापृथिव्यौ वियुतावभवताम् । तदुक्तं शतपथे—

अग्न आयाहि वीतय इति । तद्वेति भवति वीतय इति । समन्तकमिव ह वा इमे अग्रे लोका आसुरिति उन्मृज्या हैव द्यौरास । शत० १।४।२२॥

एतद्वचनानुसारं द्यावापृथिव्योर्लोकानां वा वीतिभावे अग्निः प्रधानं हेतुरभवत् ।

आदित्यस्य दूरगमनम् अर्थात् स्वकक्षायां तस्य स्थितिः त्रिः कृत्वाऽभूत् । अत एव अग्निचयनयागोऽपि त्रिधा विभज्य संपाद्यते । तत्र प्रथमायां चितौ एकसहस्रमिष्टकाश्चीयन्ते । इयं चितिरूरुदघ्ना भवति । द्वितीयायां चितौ द्विसहस्रमिष्टकाश्चीयन्ते । इयं उरोदघ्ना सम्पद्यते । तृतीयस्यां चितौ त्रिसहस्रमिष्टकाश्चीयन्ते । इयं शीर्षदघ्ना मुखदघ्ना वा भवति ।

अग्निचयनस्य (सुपर्णचितेः) विषये विस्तरेण अन्यत्र प्रतिपादन करिष्यते । अत्रस्थाः केचन विधय इदानीमप्यस्माक रहस्यभूता इव सन्ति ।

पुष्करपर्णनिधानविधिः—अग्निचयने इष्टकाचयनात् प्राक् **तस्मिन् पुष्करपर्णम् अपां पृष्ठमिति** (कात्या० श्रौत १६।२।२५) इत्यनेन पुष्करपर्णस्य निधानं विधीयते । पूर्वत्र वेदिनिर्माणप्रक्रियायां शुष्कापरूपायाः पृथिव्या यन्निदर्शनमकारि, तस्यां स्थितौ अल्पीयस्य पार्थिवभागस्याधस्ताद् जलमासीत् । तदानीं यथा सरोवरे वायुना पुष्करपर्णानि लेलायन्ते तथैव पृथिव्यपि लेलायमाना अभूत् । अत एवोक्तम्—**सा हेयं पृथिव्यलेलायत यथा पुष्करपर्णम्** (शत० २।१।१।८) । अस्याः स्थितेर्निदर्शनार्थं चयने पुष्करपर्णं निधीयते । अग्न्याधानवत् चयने **हिरण्यं निधाय चेतव्यम्** (मी० १।२।१८ भाष्ये) इत्यपि विधीयते । पुष्करपर्णनिधानविषये मत्स्यपुराण उक्तम्—

एतस्मात् कारणात् तज्ज्ञैः पुराणैः परमर्षिभिः ।
यज्ञियैर्वेददृष्टान्तैर्यज्ञे पद्मविधिः स्मृतः ॥
१८६।१६ (मोर संस्क०)।

४—सृष्टि-यज्ञानां द्रव्य-यज्ञानां च देवतानां साम्यम्

मन्त्रा द्विविधाः सन्ति—विज्ञातदेवतका अविज्ञातदेवतकाश्च । नैरुक्त-सम्प्रदायस्याचार्याः प्राधान्येन वेदमन्त्राणां व्याख्यानमाधिदैविकप्रक्रियानुसारं कुर्वन्ति । तत्र नैरुक्तसम्प्रदाये येषां मन्त्राणां देवता विज्ञाताः सन्ति ता देवता आधिदैविकस्य जगतो विशिष्टकर्मकारिणो भौतिकाः सूर्यादयः पदार्थाः सन्तीति निरुक्तशास्त्रस्याध्ययनेन विस्पष्टं भवति । परन्तु येषां मन्त्राणां देवता अविज्ञाताः, तासां देवतानां विज्ञानाय यास्काचार्य आह—**तद् येऽनादिष्ट-देवता मन्त्रास्तेषु देवतोपपरीक्षा । यद्देवतः स यज्ञो वा यज्ञाङ्गं वा तद्देवता भवन्ति** (निरुक्त ७।४) इति । एतद् वचनानुसारम् अनादिष्टदेवतानां मन्त्राणां परिज्ञानं यज्ञप्रक्रियामनुरुध्य कर्तव्यम् । तत्रानादिष्टदेवतो मन्त्रो यज्ञ-प्रक्रियानुसारं कस्मिन् यज्ञे यज्ञाङ्गे वा विनियुक्त इति प्रथमं परिज्ञानं कर्तव्यम् । तथा सति तस्य यज्ञस्य यज्ञाङ्गस्य च या देवता सैव अनादिष्टदेवतकस्य मन्त्रस्य विज्ञेयेति ।

आधिदैविकप्रक्रियानुसारं मन्त्राणां व्याख्यानं कुर्वता यास्केन आधि-दैविकदेवताया विज्ञानायेह यज्ञप्रक्रियाया अनुसरणं कृतम् । एतेनैतद् विस्पष्टं विज्ञायते यद् यज्ञीयानां देवतानां आधिदैविकदेवतानां च साम्यं वर्तत इति । अन्यथाऽधिदैविकप्रक्रियामनुसरन् निरुक्तकारो **यद्देवतः स यज्ञो वा यज्ञाङ्गं वा तद्देवता भवन्ति** इति नावक्ष्यत् ।

५—त्रयाणां लोकानां यज्ञैः साम्यम्

यास्कमुनिः अनादिष्टदेवतानां मन्त्राणां देवता-परीक्षा-प्रकरणम् उप-संहरन्नाह—

'अथैतान्यग्निभक्तीनि—अयं लोकः, प्रातःसवनं, वसन्तः.....। अथैता-नीन्द्रभक्तीनि – अन्तरिक्षलोकः, माध्यन्दिनं सवनं, ग्रीष्मः.....। अथैतान्या-दित्यभक्तीनि—असौ लोकः, तृतीयं सवनं, वर्षाः.....।' निरुक्त ७।८-११ ।।

अस्येदं तात्पर्यम्—अग्नीन्द्रादित्यास्तिस्रो नैरुक्ता याः प्रधानदेवताः सन्ति, तासां यैः सह भक्तिसाहचर्यमुपवर्णितम्, तेषु यदि कस्यचिद् अग्नीन्द्रादित्यानां भक्तिसाहचर्योक्तस्य सम्बन्धः कस्मिंश्चिदनादिष्टदेवताकमन्त्रे दृश्यते चेत् तस्यानिर्दिष्टदेवताकस्य मन्त्रस्य क्रमशोऽग्नीन्द्रादित्यदेवतासु अन्यतमा देवता विज्ञेयेति । एतेनापि नैरुक्ता आधिदैविका देवता याज्ञिकाश्च देवताः

समानाः, अथ च त्रयाणामपि लोकानां यत्रगतैस्त्रिभिः सवनैः साम्यम् इति सुस्पष्टं भवति।

त्रयाणां लोकानां त्रिभिः सवनैः साम्यम् इति निरुक्तस्याधोनिर्दिष्टवचनेनाप्यभ्यूहितुं शक्यते—

अथासावादित्यः (वैश्वानरः) इति पूर्वे याज्ञिकाः। एषां लोकानां रोहेण सवनानां रोह आम्नातः। रोहात्प्रत्यवरोहश्चिकीर्षितः। तामनुकृतिं होताग्निमारुते शस्त्रे वैश्वानरीयेण सूक्तेन प्रतिपद्यते (निरुक्त ७।२३)।

अस्यायमभिप्रायः—पूर्वे याज्ञिका आदित्यं वैश्वानरं मन्यन्ते स्म। तेषां मतानुसारम् एषां लोकानां रोहक्रमेण सवनानामपि रोहः समाम्नातः। अतः प्रातःसवने द्युस्थानीयो यजमानो माध्यन्दिने सवने अन्तरिक्षस्थानीयः, तृतीयसवने च द्युस्थानीयः सम्पद्यते। तस्य द्युस्थानीयस्य यजमानस्य प्रत्यारोह आवश्यकः। अतो द्युस्थानीयस्य यजमानस्य प्रत्यवरोहाय होता **आग्निमारुते** शस्त्रे प्रथमं वैश्वानरीयेण (=आदित्यदेवताकेन) सूक्तेन शस्त्रमारभते।

इह वेदिनिर्माण-अग्न्याधान-सोमयाग-अग्निचयनप्रक्रियाभिः सवनानां चारोहादिक्रमस्य सृष्टियज्ञैर्या समता ब्राह्मणादिग्रन्थेषु निदर्शिता तयैतद् विस्पष्टं यच्छ्रौतयज्ञा सृष्टियज्ञानामेव रूपका इति। सृष्टियज्ञस्यार्थाद् **आधिदैविकस्य** जगतोऽध्यात्मेन साम्यं वर्तते। अत आधिदैविकज्ञानेन अध्यात्मज्ञानं भवति। अत एवोक्तं यास्केन—**देवताध्यात्मे वा [पुष्पफले]** (निरु० १।१६)। अयमेवाभिप्रायो **यद् ब्रह्माण्डे तत् पिण्डे** इति लोकोक्त्याऽपि विज्ञायते।

यद्यपि वैज्ञानिके आधारे प्रकल्पितानां श्रौतयज्ञानां समस्तानां क्रियाणां पदार्थानां च आधिदैविकाध्यात्मिकजगद्भ्यां किं सादृश्यं वर्तत इत्यस्य न साक्षात् विस्तृतं वर्णनं सम्प्रत्युपलब्धे वैदिकवाङ्मय उपलभ्यते, तथापि ब्राह्मणग्रन्थेषु यत्र तत्र याज्ञिकक्रियाणां तद्गतपदार्थानां च निर्देशेन सहैव **इत्यधिदैवतम् इत्यध्यात्मम्** इत्येवं निर्देशानामुपलब्ध्या इदमञ्जसा अनुमातुं शक्यते यद् यज्ञानामाधिदैविकजगता सहास्ति कश्चित् सम्बन्ध इति।

पुरस्ताद् यद् यज्ञब्रह्माण्डयोः सादृश्यं निर्दर्शितं तदनुसारमिदं शक्यते वक्तुं यदा प्रारम्भे यज्ञानां प्रकल्पना ऋषिभिरकारि तदानीं यज्ञस्य समस्ताः क्रियाः तद्गताः पदार्थाश्च आधिदैविकजगतः क्रियाणां तद्गतपदार्थानां च पूर्णं प्रातिनिध्यं कुर्वन्ति स्म। उत्तरकाले यज्ञक्रियासु परिवर्तने परिवर्धने च सत्यपि अग्निहोत्र-दर्शपूर्णमास-चातुर्मास्य-सोमयागप्रभृतिष्वद्यापि बह्वीनां क्रियाणां तद्गतपदार्थानां चाधिदैविकजगतः क्रियाभिः पदार्थैश्च महत् सादृश्यमुपलभ्यते।

यज्ञानां प्रादुर्भावस्य कालः

भारतीयैतिह्यानुसारं सर्गारम्भे वैदिकज्ञानस्य समुपलब्धौ सत्यपि यथा वेदेषु वर्णितानां चातुर्वर्ण्यव्यवस्था-राज्यव्यवस्थादिव्यवहाराणां प्रचलनं न सर्गारम्भ एवाभवत् तथैव द्रव्यमय-यज्ञानां प्रचलनमपि नारम्भकाल एव समजायत। यतस्तदा समस्ता अपि मानवाः सत्त्वगुणसम्पन्नाः साक्षात्कृतधर्माणः परावरज्ञा मेधाविन आसन्।[1] महाभारताद्यैतिहासिकग्रन्थानुसारं तदानीं सर्वं जगद् ब्रह्ममय आसीत्।[2] यज्ञानां विषये शाङ्खायनारण्यके श्रूयते—**तद्ध स्मैतत् पूर्वे विद्वांसोऽग्निहोत्रं न जुह्वांचक्रुः** (४।५, पृष्ठ १५) इति।

ब्राह्मणग्रन्थेष्वपि बहुत्र **य उ चैनं वेद** इत्युक्त्वा यज्ञसंपादनस्य तं तत्त्वतो विज्ञानस्य च समानं फलं दर्शितम्। एतदेव च दयानन्दसरस्वतीस्वामिना संस्कारविधेः १९३२ तमे वैक्रमाब्दे प्रकाशिते प्रथमसंस्करणे गृहस्थाश्रमप्रकरणे लिखितम्—**उपासना अर्थात् योगाभ्यास करने वाला, ज्ञानी=सब पदार्थों का जानने वाला, ये दोनों होमादि बाह्य क्रिया न करें** (पृष्ठ ११८)। संन्यासिनोऽर्थाद् विज्ञानवतः पुरुषस्य यद् होमादिप्रतिषेधविधानं सर्वशास्त्रेषु निर्दिश्यते तस्य मूलेऽपीदमेव कारणं विज्ञेयम्।

यथा वर्णाश्रमादयः सर्वा व्यवस्थाः कृतयुगस्यात्यचरणे कृतत्रेतायुगयोः सन्धिकाले वा प्राचलन्, तथैव यज्ञानां प्रादुर्भावोऽपि कृतयुगान्ते त्रेतायुगारम्भे वा समभवत्।[3]

---

१. द्र०—पूर्वत्र पृष्ठ १६, टि० १।

२. **सर्वं ब्राह्ममिदं जगत्।** महा० शान्ति० ११८।१०॥

३. **'इदं कृतयुगं नाम कालः श्रेष्ठः प्रवर्तितः।**

अहिंस्या यज्ञपशवो युगेऽस्मिन्न तदन्यथा॥' महा० शान्ति० ३४०।८२॥

अस्मिन् श्लोके कृतयुगे यज्ञानां विद्यमानतोक्ता।

'त्रेतादौ केवला वेदा यज्ञा वर्णाश्रमास्तथा।' महा० शान्ति २३८।१४॥

'त्रेतायुगे विधिस्त्वेष यज्ञानां न कृते युगे।' महा० शान्ति० २३२।३२॥

'यथा त्रेतायुगमुखे यज्ञस्यासीत् प्रवर्तनम्।' वायु० ५७।८९॥

'कथं त्रेतायुगमुखे यज्ञस्यासीत् प्रवर्तनम्।' मत्स्य ४२।१, मोर संस्क०।

'तदेतत् सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा

यज्ञानां क्रमशो विकासः

यज्ञानां विकासस्य यः क्रम उपलभ्यते, तत्र अग्नेरेकत्व-त्रित्व-पञ्चत्वैः सह यज्ञेषु विनियुक्तेषु वेदानामपि **एकस्य द्वयोस्त्रयाणां** च विनियोजनक्रमो दृश्यते। प्रारम्भेऽग्नेरेकत्वाद्[1] **एकाग्निसाध्यस्य यजुर्वेदमात्रसाध्यस्य** अग्निहोत्रस्यैव प्रचलनमभूत्। तदनन्तरं यदा महाराजेन पुरुरवसा ऐलेन **त्रिधाऽग्निविभक्तः**[2] ततः प्रभृतिः **त्रेताग्निसाध्या ऋग्यजुभ्यां** क्रियमाणा **दर्शपूर्णमासादयो**

संततानि ।' मुण्डकोप० १।२।१॥

त्रेतायां वा युगे प्रायषः प्रवृत्ताः । शाङ्करभाष्य, मुण्डकोप० १।२।१॥

मत्स्यपुराणे स्वायम्भुवमन्वन्तरे यज्ञ-प्रवर्तनमुपवर्णितम्—**यज्ञप्रवर्तनं ह्येवमासीत् स्वायम्भुवेऽन्तरे** (१४२।४२; मोरसंस्क०)।

इदमत्र ध्येयम्—मनोर्जलप्लवानन्तरं प्राचीनामितिहासपरम्परां सुरक्षयितुं या मन्वन्तरादिकल्पना पूर्वैर्ऋषिभिः कृता, तदनुसारं **कृतयुगे स्वायम्भुवमन्वन्तरं** समाप्तिं गतम्। त्रेतायुगाद् वैवस्वतं मन्वन्तरं प्रारभत। द्र०—भरतप्रोक्तं नाट्यशास्त्रम् १।८॥ महाभारतेऽप्युक्तम्—**त्रेतायुगादौ च ततो विवस्वान् मनवे ददौ** (शान्ति ३४८।५१)। अत्रस्थो मनुर्वैवस्वतमनुरेव। वस्तुतः भारतीयकालगणनाया गम्भीरमनुशीलनमत्यावश्यकं वर्तते। विनैतद् भारतीयैतिह्यस्य ग्रन्थीनां भेदनमसम्भवमेव।

१. **'अङ्गिरसां वा एकोऽग्निः ।'** ऐ० ब्रा० ६।२४॥ उत्तरा टिप्पण्यपि द्रष्टव्या।

२. **'गन्धर्वेभ्यो वरं लब्ध्वा त्रेताग्नि समकारयत् ।**
एकोऽग्निः पूर्वमासीद् ऐलस्त्रेतामकारयत् ॥' हरिवंश १।२६।४७॥
'.....त्रेतायां स महारथः (ऐलः) ।
एकोऽग्निः पूर्वमासीद्वै ऐलस्त्रींस्तानकल्पयत् ।' वायु पुराण ९१।४८॥

किं **गन्धर्वेभ्यां वरं लब्ध्वा** इत्यत्रोक्ता गन्धर्वाः **गन्धर्वस्त्वा विश्वावसुः परिदधातु** इति याजुषमन्त्रे (२।३) उक्ता दैव्यः शक्तयः ? वायुपुराणस्य एकनवतितमस्याध्यायस्य ४८ तमाद् आरभ्य एकपञ्चाशत्पर्यन्ताश्चत्वारः श्लोका अपि द्रष्टव्याः। इह ऐलस्य आयु-आदयः षट्पुत्राः **'गन्धर्वलोके विदिताः'** (प्रसिद्धाः) इत्युक्तम्। त्रयाणामग्नीनां नामानि शतपथब्राह्मणे इत्थं निर्दिश्यन्ति—**एतानि वै तेषां नामानि यद् भुवस्पतिर्भुवनपतिर्भूतानां पतिः** (शत० १।३।३।१७)।

यज्ञाः प्रावर्तन्त । ततः पश्चात् महावेद्यां सम्पद्यमाना **ऋग्यजुःसामभिः साध्या ज्योतिष्टोमादयः**[1] प्रवृत्ताः । तदनन्तरं **ऽग्न्याग्निसाध्यानां** विविधक्रियाकलापानां प्रवृत्तिरजायत ।

यज्ञानां द्वौ भेदौ—प्रत्ना नूतनाश्च

गोपथब्राह्मणे यज्ञानां प्रत्न-नूतनभेदावित्थमुपवर्णितौ—

सर्वे ते यज्ञा अङ्गिरसोऽपियन्ति नूतना यानृषयो (?) सृजन्ति ये च सृष्टाः पुराणैः । गो० ब्रा० १।५।२५ ॥

प्रारम्भिका यज्ञाः

यतो देवयुगे यज्ञानां प्रकल्पनाऽतिमहत्त्वपूर्णदृष्ट्या वैज्ञानिके आधारेऽभूत्, अतः प्रारम्भे प्रकल्पितानां यज्ञानाम् आधिदैविकजगता सह साक्षात् सम्बन्ध आसीत् । यथा—**अग्निहोत्रस्य अहोरात्रेण सह, दर्शपूर्णमासयोः कृष्णपक्ष-शुक्लपक्षाभ्यां सह, चातुर्मास्यानां त्रिभिर्ऋतुभिः सह ।** अग्निहोत्रस्य दर्शपूर्ण-मासयोश्चाधिदैविकव्याख्यानं शतपथस्यैकादशे काण्ड उपलभ्यते । चातुर्मास्यानां विषये ब्राह्मणग्रन्थेषूक्तम्—

'भैषज्ययज्ञा वा एते यच्चातुर्मास्यानि । तस्मादृतुसन्धिषु प्रयुज्यन्ते । ऋतु-सन्धिषु हि व्याधिर्जायते । कौषीतकि ब्रा० ५।१॥

इत्थमेव गोपथब्राह्मणेऽप्युक्तम् (द्र०—२।१।१९) ।

महाभारते शान्तिपर्वणि अग्निहोत्र-दर्शपूर्णमास-चातुर्मास्यसंज्ञकास्त्रय एव यज्ञाः प्राचीना इत्युक्तम् । तथाहि—

दर्शं च पौर्णमासं च अग्निहोत्रं च धीमतः ।
चातुर्मास्यानि चैवासन् तेषु धर्मः सनातनः ॥ शान्ति० २६९।२०॥

प्रारम्भिक-यज्ञेषु आडम्बरराहित्यं सात्त्विकता च

आदौ येषां यज्ञानां प्रकल्पना ऋषिभिरकारि ते आडम्बरहिताः परम-सात्त्विकाश्चासन् । तेषु बाह्याडम्बरस्य अवैदिकविचाराणां मांसादितामसिक-पदार्थानां च किञ्चिन्मात्रमपि सम्बन्धो नासीत् । एतस्य निदर्शनाय केवलं द्वे प्रमाणे उपस्थाप्येते—

---

१. **'यजुषा ह वै देवा अग्रे यज्ञं वितेनिरे । अथर्चाऽथ साम्ना, तदिदमप्येतर्हि यजुषा एवाग्रे यज्ञमतन्वत,अथर्चाऽथ साम्ना ।** शत० ४।६।७।१३ ॥

१. दर्शपूर्णमासादिषु हविषो निर्वापाय हविर्द्रव्यपूरितं शकटमुपस्थाप्य ततो हविषो निर्वापः कर्तव्य इति हि ब्राह्मणादिषु विधीयते। तथाहि—

१—**'यज्ञो हि वा अनः। तस्मादनस एव यजूंषि सन्ति, न कोष्ठस्य, न कुम्भ्यै। भस्त्रायै ह स्मर्षयो गूह्लन्ति। तद् वृषीन् प्रति भस्त्रायै यजूंष्यासुः। तान्येतर्हि प्राकृतानि।'** शत० १।१।२।७॥

एकस्या आहुत्यै **चतुरो मुष्टीन् निर्वपति** इति विधानानुसारं दर्शपौर्णमासयोर्द्वयोः पुराडाशाहुत्योः कृते व्रीहीणां यवानां वा अष्टौ मुष्टय आवश्यकाः। तदर्थं हविर्द्रव्यपूरितस्यानस आनयनस्य न किञ्चिदपि प्रयोजनम्। तावन्मात्रं द्रव्यं घटादिभ्योऽपि ग्रहीतुं शक्यम्। सत्यप्येव भगवता याज्ञवल्क्येन अनस आनयनस्यैव विधानं कृतम्, तत्र च **अनस एव यजूंषि सन्ति** इति हेतुः प्रदत्तः। मनुस्मृत्यादिषु धर्मशास्त्रेषु अपरिग्रहवृत्तेर्ब्राह्मणस्य विषय उक्तम्—सकुशूलधान्यको वा कुम्भीधान्यको वा त्र्यहैकिक उत वाश्वस्तनिकः स्यात् (मनु ४।७)। आस्वन्यतरवृत्त्या जीवन् ब्राह्मणः कथं नाम हविःपूरितमन उपस्थापयितुमर्हति। अत एवाह याज्ञवल्क्यः—प्राचीना ऋषयो भस्त्रातो हविर्गृह्लन्ति स्म। सत्येवं 'अनस एव यजूंषि सन्ति' इत्यस्य का गतिः स्याद् इत्यत आह—तान् ऋषीन् प्रत्येतान्येव यजूंषि भस्त्रायै आसुः। उभयोर्विरोधप्रतिहाराय पुनराह—तान्येतर्हि प्राकृतानि (=साधारणानि) यजूंषि सन्ति। यतः कुतश्चिद् हविर्ग्रहणे इमानि यजूंषि विनियोगसमर्थातानि सन्ति।

अनेनोद्धरणेन द्वे तत्वे विस्पष्टीभवतः—तत्र प्रथमम्—याज्ञिकक्रियायामुत्तरोत्तरं परिवर्तनं समजायत। एतस्य संपुष्टिर्निरुक्तस्य—**असावादित्यः (वैश्वानरः) इति पूर्वे याज्ञिकाः** (७।२३) इति वचने याज्ञिकपदेन सह प्रयुक्तेन पूर्वविशेषणेन भवति। द्वितीयम्—पुराकाले मानवानां सत्त्वगुणप्रधानत्वाद् यज्ञेषु बाह्याडम्बरो नैवासीत्। उत्तरोत्तरं यदा मानवेषु रजस्तमोगुणयोर्वृद्धया लोभ-परिग्रह-सम्पन्नताः प्रादुर्बभूवुः, तेनैव सह सम्पन्नतायाः प्रदर्शनरुचेः प्रादुर्भावाद् यज्ञेष्वपि बाह्याडम्बरे वृद्धिरजायत।

पौर्णमासेष्टौ पुरोडाशयोर्द्वयोः प्रधानाहुतयोः कृते **चतुरो मुष्टीन् निर्वपति**[1] इति नियमेन व्रीहीणां यज्ञानां वाऽष्टौ मुष्टयोऽपेक्षन्ते। अष्टमुष्टिमात्रान्नस्य ग्रहणाय यज्ञस्थले शकटपरिमितस्यान्नस्यानयने किं प्रयोजनम्? स्वसम्पन्नता-

---

१. तुलना कार्या—**चतुरो मुष्टीन् निरूप्य।** आप० श्रौत १।१८।२॥

प्रदर्शनमृते नान्यत् कारणं शक्यते वक्तुम् । अत एव प्राचीना अलोलुपाः कुम्भीधान्या ऋषयो भस्त्रात एव हविर्गृह्णन्ति स्म कुम्भीतो वा ।

साम्प्रतिका याज्ञिकंमन्याः शकटाद् हविर्ग्रहणस्य प्रयोजनं केवलमदृष्टोत्पत्तिमन्यमाना वितस्तिमात्राकारवता शकटेन हविर्द्रव्यस्य स्पर्शमात्रं कृत्वा कार्यं सम्पादयन्ति । नैतावदेव, अपि तु व्रीहीणां यवानां वा सम्पादिते पिष्ट एव अवहननादिक्रियां कुर्वन्ति नोलूखलमुशलाभ्यां कुट्टयित्वा तुषान् पृथक् कुर्वन्ति न दृषदोपलाभ्यां पेषणं सम्पादयन्ति । केवलं पूर्वतः पिष्टस्य द्रव्यस्य स्पर्शमात्रमेव विदधति । इत्थमेव सोमयागस्य समय एव निष्पाद्यमानस्य हविर्मण्डपस्य पूर्वत एव निष्पादितस्य यागकाले स्पर्शमात्रं कुर्वन्ति ।[1]

२—प्राचीना यज्ञा अवैदिकभावनाभ्यः सर्वथा विरहिता आसन् । किन्तूत्तरकाले दर्शपूर्णमाससदृशेषु विशुद्धेष्वपि यागेषु अवैदिकविचाराणां सम्मिश्रणमभूत् । एतस्यैकमुदाहरणं प्रस्तुमः—

आदौ वैदिकमतानुसारं पुत्रेषु पुत्रीषु च न कश्चिदपि भेदः स्वीक्रियते स्म । अर्थात् पुत्रं प्रत्युत्कृष्टभावना पुत्रीं प्रति च हीनभावना नावर्तत । इदं च भगवता यास्केन निरुक्ते (३।४) **अङ्गादङ्गात् सम्भवसि** इति मन्त्रम् **अविशेषेण पुत्राणां दायो भवति धर्मत** इति मानवं श्लोकमुद्धृत्य विस्पष्टीकृतम्[2] । सम्प्रति प्रवर्तमानेषु श्रौतयज्ञेषु पुत्रीं प्रति हीनभावनाया निदर्शकानि वचनानि प्रयुज्यन्ते । तानि यजमानः प्रयाजसंज्ञकेषु यागेषु प्रतियागम् आशीरूपेण पठति—

प्रथमप्रयाजानन्तरम्—**एको मम एका तस्य योऽस्मान् द्वेष्टि यं च वयं द्विष्मः** । इत्थमेव **द्वौ मम द्वे तस्य; त्रयो मम तिस्रस्तस्य, चत्वारो मम चतस्रस्तस्य, पञ्च मम न तस्य किंचन** (शत० १।५।४।१२; कात्या० श्रौत ३।३। २-४; आप० श्रौत ४।९।४) ।

अत्र यजमानः स्वार्थं पुत्राणां कामनां करोति यं च स द्वेष्टि तस्मै पुत्री-

---

१. अद्यत्वे तु पूर्वकृतस्य मण्डपस्य यागकाले स्पर्शमात्रं क्रियते । द्र०—कात्या० श्रौत ८।३।२४ विधाधर-टीका ।

२. अविशेषेण मिथुनाः पुत्रा दायादा इति । तदेतद् ऋक्श्लोकाभ्यामुक्तम्—
अङ्गादङ्गात् संभवसि हृदयादधिजायसे ।
आत्मा वै पुत्रनामासि स जीव शरदः शतम् ॥
अविशेषेण पुत्राणां दायो भवति धर्मतः ।
मिथुनानां विसर्गादौ मनुः स्वायम्भुवोऽब्रवीत् ॥ निरुक्त ३।४॥

णाम् कामनां करोति । वस्तुतः पुत्राणां पुत्रीणां च मध्ये भेदभावनायाः प्रादुर्भावो बहूत्तरकालं बभूव । अस्या भावनायाः परिणतिः सद्य उत्पन्नायाः पुत्र्या वधेऽभूत् ।

३—**'आदिकाले खलु यज्ञेषु पशवः समालभनीया बभूवुः, नालम्भाय प्रक्रियन्ते स्म । ततो दक्षयज्ञप्रत्यवरकाले मनोः पुत्राणां नरिष्यन्ताभागेक्ष्वाकु-नृगशर्यात्यादीनां च ऋतुषु 'पशूनामेवाभ्यनुज्ञानात्' पशवः प्रोक्षणमापुः ।'** चरक चिकित्सा० १६।४॥

अनेन चरकवचनेन विस्पष्टं भवति, यदादिकाले यज्ञेषु पशूनामालम्भनं न भवति स्म । अर्थात् पर्यग्निकरणानन्तरं पशून् स्पृष्ट्वा उत्सृजन्ति स्म । पशूनामालम्भनं कस्माद्धेतोः प्रवृत्तमित्यप्यस्मिन् वचने **पशूनामेवाभ्यनुज्ञानात्** इति मिथ्याभ्रान्तिरत्र कारणमित्यपि प्रदर्शितम्[1] । यज्ञे पशुनामालम्भनप्रक्रिया बहूत्तरकालं प्रवृत्ता इत्यस्य संपुष्टिः महाभारते वायुपुराणे च समुल्लिखितेन उपरिचरवसोराख्यानेन भवति[2] । यज्ञेषु पश्वालम्भनं कथं प्रवृत्तमित्यस्मिन् विषये महाभारते इत्थं समुल्लेख उपलभ्यते—

'लुब्धैर्वित्तपरैर्ब्रह्मन् नास्तिकैः संप्रवर्त्तितम् ।
वेदवादानविज्ञाय सत्याभासमिवानृतम् ॥' शान्ति २६३।६॥

अस्य हेतोः सम्पुष्टिबौद्धत्रिपिटकस्य ब्राह्मणधम्मियसुतस्य वचनेनापि भवति। तथाहि—

ते तत्थ मन्ते गन्थे त्वा ओक्कासं तदुपागमुम् ।
पहूत धन धञ्ञोऽसि यजस्सु बहु ते धनम् ॥

अर्थाद् वित्तलुब्धा ब्राह्मणा अतथ्यान् मन्त्रान् ग्रथयित्वा[3] इक्ष्वाकोः सकाशं गत्वाऽऽहुः । राजन् तव सकाशे बहुवित्तं वर्तते तेन यजस्वेति ।

पशुयज्ञानां किं स्वरूपम्, तत्र पशूनां वधो भवति न वेत्ययोर्मीमांसा अग्रे पशुयज्ञविवेचने करिष्यते । अत्र निर्देशस्य त्वेतावदेव प्रयोजनं यद् यज्ञेषु उत्तरोत्तरं विकासेन सार्धं बहुविधानि परिवर्तनान्यभूवन् ।

---

१. अस्मिन् विषयेऽग्रे लिखितं महाभारतीयं वचनमप्यनुसन्धेयम् ।

२. महाभारत शान्तिपर्व अ० ३३७; वायुपुराण अ० ५७।९१-१२५ । अत्रोभयत्र विस्तरेणेदमाख्यानं वर्तते । महाभारत अनु० ६।३४; ११६।५६-५८ अनयोः स्थानयोरुपरिचरवसुविषयकः संकेतो वर्तते ।

३. एतस्मिन् विषय उत्तरत्र द्रष्टव्यम् ।

स्वामिदयानन्दसरस्वतीसम्मता यज्ञ-प्रक्रिया

उपर्युक्तैः कारणैः कतिपयैरन्यैश्च कारणैर्दयानन्द सरस्वतीस्वामिनः शाखा-ब्राह्मण-श्रौतसूत्रादिषु प्रतिपादितानां श्रौतयज्ञानां प्रामाण्यं स्वीकुर्वन्तोऽप्याहुः—

'एतैर्वेदमन्त्रैः कर्मकाण्डविनियोजितैर्यत्र यत्राग्निहोत्राद्यश्वमेधान्ते यद्यत् कर्तव्यं तत्तदत्र (=वेदभाष्ये) विस्तरतो न वर्णयिष्यते। कुतः? कर्मकाण्डानुष्ठानस्यैतरेय-शतपथब्राह्मण-पूर्वमीमांसा-श्रौतसूत्रादिषु यथार्थं विनियोजितत्वात्।.....तस्माद् युक्तिसिद्धो वेदादिप्रमाणानुकूलो मन्त्रार्थानुसृतस्तदुक्तोऽपि विनियोगो ग्रहीतुं योग्योऽस्ति।' ऋग्वेदादिभाष्यभूमिका, प्रतिज्ञा-विषय, पृष्ठ ३८८, रामलाल कपूर ट्रस्ट संस्करण २।

एतेनेदं विस्पष्टं भवति यच्छाखाब्राह्मणश्रौतसूत्रपूर्वमीमांसादिषु निर्दिष्टानां युक्तिविरुद्धानां वेदादिशास्त्रप्रमाण-प्रतिकूलानां मन्त्रार्थाननुसृतानां विनियोगानां दयानन्दसरस्वतीस्वामिनः प्रामाण्यं न स्वीकुर्वन्ति स्म। यथा—

१—**युक्तिविरुद्धाः**—अश्वमेधे अश्वेन सह राजमहिष्याः समागमः, यज्ञशालायाम् अध्वर्यवादीनामृत्विजां स्त्रीभिः कन्याभिश्च सहाश्लीलं संभाषणम् इत्येवमादयः। द्र०—शतपथब्राह्मणे (१३।५।२) अध्रिगोः परिशिष्टम्। कात्या० श्रौत २०।६।१२-२०।

२—**वेदादिप्रमाणाननुकूलाः**—वेदे गवाश्वाविपुरुषादीनां न केवलं हिंसैव प्रतिषिद्धा अपि तु य एतान् घातयन्ति ते गोलिकाभिर्घातनार्हाः सन्ति। यथा—

गां मा हिंसीरदितिं विराजम्। यजुः १३।४३॥

मा गामनागामदितिं वधिष्ट। ऋ० ८।१०१।१५॥

अश्वं जज्ञानं.....मा हिंसीः परमे व्योमन्। यजुः १३।४२॥

अविं जज्ञानां.....मा हिंसीः परमे व्योमन्। यजुः १३।४४॥

इमं मा हिंसीर्द्विपादं पशुम् (=पुरुषम्)। यजुः १३।४७॥

यदि नो गां हंसि यद्यश्वं यदि पूरुषम्।
तं त्वा सीसेन विध्यामो यथा नोऽसो अवीरहा॥ अथर्व० १।१६।४॥

एतेषां प्रमाणानां विषये यदि कश्चिद् ब्रूयाद् यद् यज्ञादन्यत्र गवादीनां हिंसाप्रतिषेधार्थमिमानि वचनानि। यज्ञेष्वेतेषां हिंसा अहिंसैव भवति। एत-

दपि कथनं न याज्ञिकानां मतानुसारं युक्तिसंगतम्, यतो हि तेषां मते वेदा यज्ञार्थमेव प्रवृत्ताः। तदुक्तम्—

वेदा हि यज्ञार्थमभिप्रवृत्ताः। वेदाङ्गज्योतिषान्ते।
आम्नायस्य क्रियार्थत्वात्। मीमांसा १।२।१॥

अत उक्ता मन्त्रा अपि यज्ञेष्वेवैतेषां हिंसां वारयितुं प्रवृत्ताः, न तु यज्ञादन्यत्र।

४—**मन्त्रार्थाद् विपरीताः**—यथा **स्वधिते मैनं हिंसीः** (यजुः ६।१५) इति मन्त्रमुच्चार्य पश्वङ्गानां कृन्तनम् (द्र०—कात्या० श्रौत ६।६।८)।

५—**मन्त्रार्थाननुसृताः**—यस्य विनियोगस्य मन्त्रार्थेन सम्बन्धो न भवेत्। यथा—**दधिक्राव्णो अकारिषम् इत्याग्नीध्रीये दधिद्रप्सान् प्राश्य** (आश्व० श्रौत ६।१३)।

दधिक्राव्णो अकारिषम् इति मन्त्रगतो 'दधिक्रावन्' शब्दोऽश्वस्य वाचकः (द्र०—निरुक्त २।१६) अस्यैकदेशस्य दधिशब्दस्य पयोविकारभूतेन दध्ना न दूरतोऽपि कश्चन सम्बन्धः।

इत्थमेव नवग्रहपूजासु विनियुक्तानामपि मन्त्राणां न नवग्रहैः सह कश्चन संबन्धः। तत्र केचन मन्त्रास्तु शब्दैकदेशसाम्येनापि सन्ति विनियुक्ताः। यथा—**शन्नोदेवीति शनैश्चरस्य उद्बुध्यस्वेति बुधस्य।**

दयानन्दसरस्वतीस्वामिन एतस्य मतस्याऽऽधारः शाखा-ब्राह्मण-श्रौतसूत्र-मीमांसादिकस्य समस्तस्य वैदिकवाङ्मयस्य परतःप्रमाणतैव वर्तते। ते हि मन्त्रसंहितानामेव स्वतःप्रामाण्यं स्वीकुर्वते। तेन तद्व्यतिरिक्तस्य समस्तस्य वैदिकवाङ्मयस्य वेदानुकूलत्वे एव प्रामाण्यम्।[1]

---

१. दयानन्दसरस्वतीस्वामिना सत्यार्थप्रकाशे तृतीयसमुल्लासे संस्कारविधौ च वेदारम्भसंस्कारस्यान्ते शिक्षात आरभ्य वेदपर्यन्तम् अध्ययनाध्यापनस्य यः पाठविधिर्निदर्शितस्तत्र सर्वविषयाणाम् आर्षग्रन्थानामेव निर्देश उपलभ्यते (स्वकृतस्य कस्यचिदपि ग्रन्थस्य पाठविधावुल्लेखो न कृतः)। एतेनैतद्विस्पष्टं यद् दयानन्दसरस्वतीस्वामिनः समस्तानामार्षग्रन्थानां प्रामाण्यं स्वीकुर्वन्ति स्म; किन्तु तत्प्रामाण्यं वेदाविरोधे एव स्वीकार्यम्। संस्कारविधौ तु ब्राह्मणश्रौतगृह्यसूत्रसहितस्य वेदाध्ययनस्य प्रसङ्गे टिप्पणी प्रदत्ता—**जो ब्राह्मण वा सूत्र वेदविरुद्ध हिंसापरक हों, उन को प्रमाण न करना।** सं० विधि, पृष्ठ १३१, रा० ला० ट्रस्ट, शताब्दीसंस्क०।

याज्ञिकप्रक्रियायां परिवर्तनं नूतनानां च यज्ञानां प्रकल्पना

संसारस्यैष शाश्वतिको नियमो यद्यस्मिन् विषये जनसाधारणस्य रुचिर्वर्धते, व्यवहारकुशलमन्या जनास्तस्या जनरुचेरनुचितं लाभं लब्धुं प्रयतन्ते। तेषां चैष एव प्रयत्नो भवति यज्जनसाधारस्य सा रुचिरुत्तरोत्तरं प्रवर्धेत तेषां च द्रव्योपलब्धिर्न केवलं चिरकालं सुरक्षिता स्याद् अपि तूत्तरोत्तरं प्रवर्धेत। एतन्नियमानुसारं यदा साधारणजनानां यज्ञेषु रुचिः प्रावर्धत तदा लोभादिभिर्वशीभूतैर्याज्ञिकैः[1] यज्ञानां रोचकतां प्रवर्धयितुं तेषूत्तरोत्तरम् विविधा बाह्याडम्बराः प्रवर्धिताः, अथ च विविधाः काम्या नैमित्तिकाश्च यज्ञाः संसृष्टाः। अद्यत्वेऽपि जनताया यज्ञेषु या श्रद्धा वर्तते, तस्या अनुचितं लाभं लब्धुकामा चण्डीयज्ञ-रामायणयज्ञादिरूपेण विविधान् यज्ञान् प्रकल्प्य श्रद्धालुभ्यो जनेभ्यो वित्तमाहरन्ति। दयानन्दसरस्वतीस्वामिनां स्वान् अनुयायिमन्यमानास्तदुक्तान् अग्निहोत्राधारभ्याश्वमेधपर्यन्तान् वैदिकान् यज्ञान् विहाय वेदपारायण-गायत्री-महायज्ञ-स्वस्तियागप्रभृतीन् विविधान् अवैदिकान् यज्ञाभासान् प्रवर्तयन्ति।

इत्थं यज्ञेषु पुरा याऽऽडम्बरहीनता सात्विकता चासीत् तस्या उत्तरोत्तरं प्रणाशः समजनि, बाह्याडम्बराणां वृद्धिरवैदिकतत्त्वानां प्रवेशश्चाभूत्। अत आरम्भकाले यज्ञानां कल्पनायां या वैज्ञानिकी दृष्टिरासीत् साऽज्ञेया समजायत। अत एव सम्प्रति अधिकांशतः कल्पनाप्रसूतानां यज्ञानां क्रियाणां तद्द्रव्याणां चाधिदैविकेनाध्यात्मिकेन च जगता सह दूरस्थोऽपि सम्बन्धो नास्ति।

याज्ञिक-प्रक्रियानुसारी वेदार्थः

भारतीयैतिह्येन स्पष्टमिदं भवति यद् वेदानां प्रादुर्भावः सृष्टेरादौ बभूव, द्रव्यमययज्ञानां प्रकल्पना च कृतयुगत्रेतायुगयोः सन्धौ संजज्ञे[2]। एतेन ऐतिहासिकतथ्येनेदं विस्पष्टं भवति यद् यज्ञानां प्रवृत्तेः प्रागपि वेदानां कश्चिद् अर्थः प्रवृत्त आसीत्, यतो हि वेदा न निरर्थकपदसमुदायाः। यज्ञानां प्रादुर्भावात् प्राक् वेदानां कीदृशोऽर्थः क्रियते स्म इत्यस्य याथातथ्येन परिज्ञानाय न किमपि साक्षात् साधनं विद्यते, यतो हि सम्प्रति यद् वैदिकवाङ्मयम्[3] उपलभ्यते तस्य सर्वस्यापि द्वापरयुगस्यान्तिमचरणे प्रवचनमजायत। तथाप्येतावत्तु

---

१. द्र०—पूर्वत्र पृष्ठ ३२। २. द्र०—पू० पृ० २७, टि० ३।

३. वाङ्मयशब्दस्त्रिलिङ्गः। अतोऽस्मिन् निबन्धे क्वचित्पुंल्लिङ्गेऽपि प्रयुक्तः।

वक्तुं शक्यत एव यद् यज्ञ-प्रवर्तनात् प्राक्कालिको वेदार्थः यज्ञप्रक्रियानुसारी नासीत्। एतेन इदमपि शक्यते वक्तुम्, यद् वेदेषु द्रव्यमययज्ञानां साक्षाद् विधानं नास्ति। यद्यपि वेदमन्त्रेषु तानि नामान्युपलभ्यन्ते यानि कतिपययज्ञानां तत्साधनभूतानां पात्राणां क्रियाणाम् चापि सन्ति[1], तथापि नैतेन भ्रमितव्यं यद् वेदमन्त्रेषु श्रूयमाणानि नामानि एषामेव श्रौतयज्ञानां तत्पात्राणां क्रियाणां च सन्ति। वस्तुतो वेदमन्त्रेषु श्रूयमाणा यज्ञाः, तत्साधनभूतानि पात्राणि, क्रियाश्च सृष्टियज्ञसम्बन्धिन्य एव सन्ति।[2]

वेदमन्त्रेषु द्रव्यमययज्ञानां वर्णनं विद्यते, अस्य भ्रमस्य द्वे कारणे स्तः। तत्र प्रथमः—द्रव्यमययज्ञानां प्रकल्पना प्राचीनैर्ऋषिभिराधिदैविकजगतो व्याख्यानाय विहिता। अतो मन्त्रेषु यस्य कस्यचिदपि सृष्टियज्ञस्य वर्णनं विद्यते तदेवोभयोः साम्यत्वाद् द्रव्यमययज्ञान् तत्साधनभूतानि पात्राणि तत्क्रियाश्चापि यथावद् वर्णयन्तो मन्त्रा दृश्यन्ते। द्वितीयं कारणम् एतदस्ति यत् परःसहस्रेभ्यो वर्षेभ्यो यज्ञानां प्राधान्येन प्रचलनात् शाखा-ब्राह्मण-श्रौतसूत्रादिरूपं वैदिकं वाङ्मयं यज्ञपरमेवोपलभ्यते। तस्माद् वेदमन्त्राणामाधिदैविक एव मुख्योऽर्थो यज्ञपरस्तु गौण एव।

उक्तमभिप्रायं हृदयंगमं कारयितुम् उदाहरणमेकं प्रस्तूयते—

रामायणे-राम-सीता-भरत-लक्ष्मणादीनां यच्चरित्रवर्णनं विद्यते, तस्य साक्षात् सम्बन्धो रामादिभिः सह वर्त्तते। यदा तु तदाधारेण निर्मितेषु नाटकेषु रामादीनां यः संवादो निबद्धयते, तस्यापि सम्बन्धो मूलभूतैः पुरुषै रामादिभिः सहैव भवति। किन्तु यदा परोक्षभूतं रामादीनां चरितं प्रत्यक्षनिदर्शनाय रङ्गभूमौ नाटकरूपेणान्यभिनीयते, तदा तत्र पठ्यमानं रामादीनां संवादं ये पुरुषाः प्रस्तुवन्ति, तैः पुरुषैः सह तस्य संवादस्य साक्षात् सम्बन्धो न भवति। ते तु रामचरितरूपां परोक्षघटनां प्रत्यक्षरूपेण निदर्शयितुं केवलं साधनभूता एव भवन्ति। इत्थमेव आधिदैविकजगद् अर्थात् सृष्टियज्ञं वर्णयतां वेदमन्त्राणां तत्प्रतिनिधिभूतैर्यज्ञैस्तत्पात्रैस्तत्क्रियाभिश्च सह साक्षात् सम्बन्धो न विद्यते।

---

१. मन्त्रेषु येषां यज्ञानां तत्पात्राणां तत्क्रियाणां च नामान्युपलभ्यन्ते, तेषां संकलनमस्माभिः 'श्रौत यज्ञों की वैदिकता' इति नाम्नि निबन्धे विहितम्। द्र०—वैदिक-सिद्धान्त-मीमांसा, पृष्ठ ३४२-३५३।

२. एतद्विषये अस्य निबन्धस्य हिन्दीरूपानन्तरं 'सोमयागे वृष्टिविज्ञानम्' नामा लेखो द्रष्टव्यः।

यद्वेत्थं शक्यते वक्तुं यद्वेदमन्त्राणां याज्ञिकप्रक्रियानुसारं क्रियमाणो योऽर्थः, न स वेदमन्त्राणां मुख्योऽर्थः, स तु वेदस्याधिदैविकार्थं बोधयितुं निमित्तमात्रं भवति । अत एव यास्केन **याज्ञदैवते पुष्पफले** (निरुक्त १।२०) इति वदता याज्ञिकार्थः पुष्पस्थानीय आधिदैविकार्थः फलस्थानीय इत्युक्तम् । पुष्पफलयोरपि फलमेव प्रधानम्, न पुष्पम् ।

यज्ञकर्मत एव नाटकानां प्रादुर्भावः

लौकिकानां नाटकानां प्रादुर्भावो यज्ञकर्मत एवाभूत् । अत एव नाट्यशास्त्रस्याद्यप्रवक्त्रा भरतमुनिनोक्तम्—

जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् [1]रसानाथर्वणादपि । नाट्यशास्त्र १।१७॥

अस्य व्याख्यायाम् अभिनवगुप्तपादा आहुः—**त्रैस्वर्यप्रधानस्य (= ऋग्वेदस्य) [2]शस्त्रद्वारेण यागोपकारित्वात् ।··· ·····गीतमात्रं ततः (= सामवेदात्) गृहीतम् ।·····आध्वर्यवप्रधाने तु यजुर्वेदेऽङ्गकर्मणां प्रदक्षिणगमनादिक्रम एव प्रथमम्·····।** नाट्यशास्त्र-व्याख्या, भाग १, पृष्ठ १६ ॥

एतेन प्रमाणेनेदं विस्पष्टं यन्नाटकानां प्रादुर्भावो यज्ञगतं शस्त्ररूपं पाठ्यं स्तोत्ररूपं गीतम् आध्वर्यवादीनाम् अभिनयं दृष्ट्वैव समजायत । अपि च, नाटकेषु येऽभिनयं कुर्वन्ति तेषां 'पात्र'संज्ञाया मूलेऽपि यज्ञसाधनभूतानि पात्राण्येव सन्ति ।

यज्ञानां प्रादुर्भावस्योत्तरकाले वेदार्थे प्रभावः

यज्ञानामारम्भकाले याज्ञिकप्रक्रियानुसारिणो वेदार्थस्य सैव स्थितिरासीद् यस्याः पुरस्ताद् उल्लेखः कृतः । अतस्तस्मिन् काले याज्ञिकक्रियाकलापेषु त एव मन्त्रा विनियुज्यन्ते स्म ये आधिदैविकार्थं ब्रुवन्तः प्रतिनिधिरूपेण याज्ञिक-

---

१. 'नृत्ताना०' इति पाठान्तरम् ।

२. मुद्रितपाठस्त्वत्र 'स्तोत्रशब्द(स्य) द्वारेण' विद्यते । अयं पाठोऽशुद्धः । यत ऋग्वेदस्य शस्त्रेष्वेव विनियोगः । स्तोत्रं गानभूतम् । तस्य सामवेदेन सह सम्बन्धः । शस्त्रस्तोत्रयोर्लक्षणमाहुर्मीमांसकाः—अप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं शस्त्रम् । प्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं स्तोत्रम् ।

क्रियाणां वर्णनेऽपि समर्था आसन् ।[1] उत्तरकाले **यथा यथा यज्ञानां प्राधान्यमजायत तथा तथाऽधिदैविको वेदार्थो गौणतामभजत, याज्ञिकार्थश्च प्राधान्यमलभत** । अस्य परिणतिरुत्तरकाले **वेदा यज्ञार्थं प्रवृत्ताः**[2] इति वादेऽभूत् । वेदार्थश्च याज्ञिकप्रक्रियायामेव सीमितोऽभवत् । तत उत्तरकाले यज्ञीयादृष्टवादस्य परिणति**र्मन्त्रानर्थक्यवादे**[3] समजायत ।

काल्पनिका विनियोगाः

यदा जनतायां यज्ञानां संमानं प्रभावश्च वृद्धिं गतः, तदा प्रतिकामं सिद्ध्यै यज्ञानां सृष्टिरभूत् । तथा सति **यज्ञानां विविधक्रियानुरूपाणां मन्त्राणामनुपलब्धौ मन्त्रार्थमुपेक्ष्य ते याज्ञिकक्रियाभिः सह बलात् सम्बद्धाः** । अर्थान्मन्त्रार्थाननुसृतानां विनियोगानां प्रवृत्तिरजायत । यथा—

१. मैत्रायण्यां संहितायां (३।२।४) पठ्यते—

निवेशनः संगमनो वसूनाम् इत्यैन्द्रघा गार्हपत्यमुपतिष्ठते ।

अत्रैन्द्री ऋग् गार्हपत्याग्नेरुपस्थाने विनियुक्ता । याज्ञिकानां मते यदा इन्द्राद् महाविशेषणविशिष्टा महेन्द्र-वृत्रहेन्द्र-पुरन्दरेन्द्रादयो भिन्ना भिन्ना देवताः सन्ति[4], तदा इन्द्राग्न्योर्भिन्नदेवतात्वे सन्देहावसर एव नास्ति । तथा सति ऐन्द्रघा ऋचा गार्हपत्याग्नेरुपस्थानं नाभिधावृत्त्या संभवति, अवश्यं गौण्या वृत्तेरवलम्बनं कर्तव्यं भवति[5] । तथा सत्ययं विनियोगो न साक्षात्मन्त्रार्थानुसृत इति स्पष्टम् ।

---

१. 'एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृग्यजुर्वाभिवदति ।' गोपथ ब्रा० २।२।६॥ अत्र ऐ० ब्रा० १।४ वचनमपि द्रष्टव्यम् ।

२. 'वेदा हि यज्ञार्थमभिप्रवृत्ताः ।' वेदाङ्गज्योतिषस्यान्ते । 'आम्नायस्य क्रियार्थत्वात्·····।' मी० १।२।१॥

३. मन्त्रानर्थक्यवादविषयेऽग्रे वक्ष्यते ।

४. द्रष्टव्यम्—**तस्माद् देवतान्तरमिन्द्रान्महेन्द्रः** (मीमांसा शाबरभाष्य २।१।१६॥ **'अथोताभिधानैः संयुज्य हविश्चोदयति—इन्द्राय वृत्रघ्ने, इन्द्राय वृत्रतुरे, इन्द्रायांहोमुचे । तान्यप्येके समामनन्ति** (निरुक्त ७।१३) देवतात्वेनेति शेषः ।

५. मीमांसायाः शाबरभाष्य **'ऐन्द्रघा गार्हपत्यमुपतिष्ठते'** इति विनियोगविषय उक्तम्—**'गुणसंयोगाद् गौणमिदमभिधानं भविष्यति । भवति हि गुणादप्यभिधानम् । यथा सिंहो देवदत्तः, अग्निर्माणवक इति । एवमिहाप्य-**

२. पदैकदेशसादृश्याद् विनियोजकस्य काल्पनिकविनियोगस्यैकमुदाहरणं प्रस्तूयते—

'दधिक्राव्णो अकारिषम् इति वा संबुभूषन् दधिभक्षम्।' शाङ्खा० श्रौत ४।१३।२॥

'दधिक्राव्णो अकारिषम् इत्याग्नीध्रीये दधिग्रस्तान् प्राश्य··· ।'[1] आश्व० श्रौत ६।१३॥

अत्र मन्त्रे 'दधिक्रावन्' शब्दोऽश्वस्य वाचकम्। एतच्च **दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः** (ऋ० ४।३९।९) **यो अश्वस्य दधिक्राव्णो अकारीत्** (ऋ० ४।३९।३) इत्याभ्यां श्रुतिभ्यामेव स्पष्टम्। अत एव निघण्टौ (१।१४) 'दधिक्रावा' पदमश्वनामसु पठ्यते। यास्केन 'दधिक्रावन्' शब्दसदृशं समानार्थकं च **'दधिक्राः'** पदमित्थं निरुक्तम् **दधत् क्रामतीति वा दधत् क्रन्दतीति वा दधद् आकारी भवतीति वा** (निरुक्त २।२७)। एवं च **'दधिक्राव्णः'** पदस्य पूर्वपदे श्रूयमाणो 'दधि'शब्दः कर्तृवाचकः किन्प्रत्ययान्तः (द्र०—अष्टा० ३।२।१७१) आद्युदात्तः।[2] न तु दध्नो वाचकः। औत्तरकालिकैस्तु याज्ञिकैः 'दधिक्रावन्' शब्दे पूर्वपदस्य दधिशब्दस्य पयोविकारस्य वाचकेन 'दधि'-शब्देन सादृश्यमात्रं दृष्ट्वाऽयं मन्त्रो दधिप्राशने विनियुक्तः। एतादृशाः काल्पनिका विनियोगाः श्रौतसूत्रेषु बहुत्रोपलभ्यन्ते।

निन्द्रे गार्हपत्ये इन्द्रशब्दो भविष्यति' (मीमांसा-भाष्य ३।३।४)। अयमेवाभिप्रायः सायणाचार्येण अथर्वभाष्ये (१।१।१) इत्थमुपवर्णितः—**'बलीयसा श्रुत्या लिङ्गं बाधयित्वा गुणकल्पनयापि विनियोगसम्भवात्। तत्र हि ऐन्द्रे मन्त्रे इन्द्रशब्दस्य गौणीं वृत्तिमाश्रित्य गार्हपत्योपस्थाने विनियोगः कृतः।'**

वस्तुतस्तु श्रुत्या लिङ्गबाधनप्रकल्पनाऽपि ब्राह्मणानां स्वतःप्रामाण्यस्वीकारे सति बभूव। पूर्वमीमांसायास्तु ब्राह्मणवचनानामेवार्थनिर्धारणाय प्रवचनमभूत्। अत एव **वचनात् त्वयथार्थमैन्द्री स्यात्** (मी० ३।२।३) सूत्रं प्रवृत्तम्। एतद्वचनस्य विषये **श्रुतिलिङ्गवाक्य** (३।३।१४) इत्यादिसूत्रभाष्यमपि द्रष्टव्यम्।

१. तुलना कार्या **'दधिक्राव्णो प्राङ्मुखो दधि प्राश्य'** इति आयुर्वेदीयकाश्यपसंहितावचनेन सह (द्र०—पृष्ठ ३९)।

२. अस्य किन्प्रत्ययान्तस्य दधिशब्दस्य प्रयोगः **दधिर्यो धायि स ते वयांसि** (ऋ० १०।४६।१) इति मन्त्र उपलभ्यते।

३. निरुक्ते यास्कमुनिरप्याह—

तदेतदेकमेव जातवेदसं गायत्रं तृचं दशतयीषु विद्यते । यत्तु किञ्चिदाग्नेयं तज्जातवेदसानां स्थाने युज्यते । निरुक्त ७।२०॥

तदेतदेकमेव वैश्वदेवं गायत्रं तृचं दशतयीषु विद्यते । यत्तु किञ्चिद् बहुदैवतं तद् वैश्वदेवानां स्थाने युज्यते । यदेव विश्वलिङ्गमिति शाकपूणिः । निरुक्त १२।४०॥

एताभ्यामुद्धरणाभ्यामिदं विस्पष्टं यद् जातवेदसानां वैश्वदेवानां च मन्त्राणामल्पत्वे सति तेषां स्थाने आग्नेया बहुदैवता यद्वा विश्वपदयुता मन्त्रा विनियुज्यन्ते ।[1] एतेन यदस्माभिः पूर्वमुक्तम्—**'यज्ञानां विविधक्रियानुरूपाणां मन्त्राणामनुपलब्धौ मन्त्रार्थमुपेक्ष्य ते याज्ञिकक्रियाभिः सह बलात् संबद्धाः'** (पृष्ठ ३८) तत्प्रमाणीभवति ।

उपलब्धब्राह्मणेषु ऐतेरेयब्राह्मणम् अन्तिमाद् कृष्णद्वैपायनकृताद् वेदप्रवचनात् प्राचीनं विद्यते ।[2] तस्मिन् मन्त्रार्थानुसृतस्य विनियोगस्य प्रशंसा तूपलभ्यते[3], परं मन्त्रार्थाननुसृतस्य विनियोगस्य गर्हा नोपलभ्यते । एतेन ज्ञायते यदैतरेयब्राह्मणस्य प्रवचनात् प्रागेव पदस्य अक्षरस्य वर्णस्य च सादृश्येन[4] क्रियमाणानां काल्पनिकविनियोगानां प्रादुर्भावः समजनीति ।

---

१. यज्ञकर्मणि न केवलं दैवतविषयका एव काल्पनिका विनियोगा क्रियन्ते, अपि तु काल्पनिकछन्दस्का मन्त्रा अपि विनियुज्यन्ते । एतस्य विषये 'वैदिकछन्दोमीमांसा'ऽऽख्येऽस्मदीये ग्रन्थेऽष्टादशसंख्याकोऽध्यायो द्रष्टव्यः ।

२. ऐतरेयब्राह्मणस्य प्राचीनतमत्वम् अस्माभिः स्वीये 'संस्कृत व्याकरण शास्त्र का इतिहास' इत्याख्ये ग्रन्थे विस्तरेण प्रत्यपादि । अस्य पुनः प्रवचनं शौनकेन कृतम्, अन्त्या दशाध्यायास्तु संयोजिताः (द्र०—भाग १, पृष्ठ २७२-२७३, वि० सं० २०४१ तमे मुद्रितं संस्करणम्) ।

३. 'एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृग्यजुर्वाभिवदति' । ऐ० ब्रा० १।४,१३,१६॥

४. पदसादृश्येन—**'दधिक्राव्णो अकारिषमिति.....दधिभक्षम्'** । (शाङ्खा० श्रौत ४।१३।२) । अक्षरवर्णसादृश्येन—**शन्नोदेवीति** मन्त्रस्य शनैश्चरग्रहपूजायाम्, **उद्बुध्यस्वेति** मन्त्रस्य बुधग्रहपूजायां विनियोगः (द्र०—अग्निवेश्यगृह्य अ० ५; वैखानसगृह्य अ० ४, खण्ड १३, १४; बौधायन गृह्य १६,१७) ।

कालपनिक-मन्त्राणां रचना

यदा विभिन्नप्रकाराणां यज्ञानां प्रकल्पनाऽभूत्, तदा तादृशां सर्वेषां यज्ञानां विभिन्न-क्रियानुरूपाणां (=येऽर्थतः ताः क्रिया वक्तुं समर्थास्तथाविधानां) मन्त्राणामनुपलब्धौ **मन्त्र-प्रकल्पना प्रारब्धा**।[1] इत्थं च विविधाः काल्पनिक-मन्त्राः शाखा-ब्राह्मणारण्यक-श्रौतसूत्रादिषूपलभ्यन्ते। गृह्यसूत्रेषु तु काल्पनिक-मन्त्राणां बाहुल्यं दृश्यते। उत्तरकाले बह्वीनां शाखानां लोपे सति एतादृशो मन्त्रा लुप्तशाखास्वासन् इति प्रवादः प्रचलितः।

अस्मन्मतानुसारं काल्पनिकमन्त्राणां रचनाया आरम्भो भारतयुद्धात् सहस्रद्वयवर्षेभ्यः प्रागभूत्।[2] इयं काल्पनिकमन्त्ररचना अनेकचरणेष्वजायत। यथा—

प्रथमचरणे वेदमन्त्रेष्वेव स्व-कर्मानुरूपं परिवर्तनमभवत्।[3]

द्वितीयचरणे अनन्तरं विभिन्नस्थानेषु पठितानां मन्त्राणां विभिन्नानि वाक्यानि संयोज्य नवीनानां मन्त्राणां रचनाऽभवत्।[4]

तृतीयचरणे अनन्तरं वैदिकग्रन्थेषु प्रयुक्तानां विशिष्टशब्दानां सन्निवेशमात्रं कृत्वा नूतना मन्त्राः प्रकल्पिताः।[5]

---

१. द्र०—ब्राह्मणधर्म्मियसुतस्य पूर्वत्र (पृष्ठ ३२) उद्धृतं वचनम्।

२. विविधयज्ञानां कल्पना द्वापरेऽभूत्, अतस्तदर्थं विविधमन्त्राणां प्रकल्पनाऽपि तदैवारब्धा।

३. यथा राजसूयप्रकरणे पठितस्य **'एष वो अमी राजा'** (शुक्लयजुः ९।४०) इति मन्त्रस्य **'अमी'**पदस्थाने तत्तद्विशिष्टकुलस्य नाम प्रयुक्तम्। **एष वो भरता राजा** (तै० सं० १।८।१०।१२), **एष वः कुरवो राजा, एष पञ्चाला राजा** (मै० सं० २।६।६; काठक सं० १५।१७)।

४. एतद्विज्ञानाय ऋग्वेदस्य खिलपाठस्थानां मन्त्राणाम् अनुशीलनं कर्तव्यम्।

५. यथा—सावित्रमन्त्रस्य **'धियो यो नः प्रचोदयात्'** इति तृतीयचरणात् **नः प्रचोदयात्** पदे गृहीत्वा **'तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥'** इत्येवमाद्या एकादश मन्त्रा मैत्रायण्यां संहितायाम् (२।९।१) उपलभ्यन्ते। एतादृशा एव केचन मन्त्रास्तैत्तिरीयारण्यके (१०।१)ऽपि दृश्यन्ते।

चतुर्थचरणे इयमेव मन्त्र-प्रकल्पना **'नमो भगवते वासुदेवाय'** इत्यादिषु साम्प्रदायिकेषु, **'ओं ह्रीं ह्रुं फट् स्वाहा'** इत्यादिषु अर्थविरहितेषु तान्त्रिकेषु मन्त्रेषु परिणतिमलभत ।

याज्ञिकवादस्य मन्त्रानर्थक्यवादे परिणतिः

औत्तरे याज्ञिककाले यदा वेदानामुपयोगस्य एकमात्रं केन्द्रं यज्ञकर्म एव सुनिश्चितमभूत्, तदा कर्मकाण्डे साक्षाद् अविनियुक्तो वेद-भागो निष्प्रयोजनो मा भूदिति वेदस्य समेषां मन्त्राणां कर्मकाण्डेन सह येन केन प्रकारेण सम्बन्ध-प्रदर्शनाय याज्ञिकैः प्रयत्नः कृतः ।[1] एतेन मन्त्रा गौणा अभूवन्, विनियोजकानि ब्राह्मणानि मुख्यत्वमभजन्। अतः **उरु प्रथस्व** इत्यादिमन्त्रेषु विद्यमानानां साक्षाद् विधायकानां **लोट्-लिङ्-लेट्लकाराणां** विधायकत्वमस्वीकृत्य ब्राह्मणग्रन्थस्थानां **प्रथयति** इत्यादिपदानां विधायकत्वं प्रतिज्ञातम् ।[2] आदौ मन्त्रान्तर्गतस्य कस्यचित् पदस्य मुख्यता उपेक्षिताऽभूत्, अनन्तरं कृत्स्नस्य मन्त्रस्यार्थवत्वमुपेक्ष्य तद्गतस्य कस्यचित् पदस्य सादृश्यमात्रेण कर्मविशेषे मन्त्र-विनियोगः समारब्धः। यथा—**भद्रं कर्णेभिः शृणुयाम देवाः, वक्ष्यन्ति वेदागनीगन्ति कर्णम्** इत्यादि-मन्त्राणां कर्णवेधसंस्कारं कृतो विनियोग[3] उक्तप्रकारक एव। तदुत्तरकाले पदैकदेशमात्रस्य सादृश्येन कृतो विनियोगो बहुत्रोपलभ्यते। उत्तरकाले तु पदैकदेशसादृश्येन अक्षरवर्णसादृश्येनापि मन्त्राणां विनियोगा दृश्यन्ते ।[4] एतद्विषये पूर्वमप्युक्तम् (द्र०—पृष्ठ ३९) ।

वीरमित्रोदयस्य भक्तिप्रकाशे (पृष्ठ १०६) **दाशरथाय विद्महे सीतावल्लभाय धीमहि । तन्नो रामः प्रचोदयात्** इति रामगायत्री पठ्यते ।

१. **'अश्विने सम्पत्स्यमाने सुर्यो नोदियाद् अपि सर्वा दाशतयीरनुब्रूयात्'** (आप० श्रौत १४।१।२) । तथा—**'सर्वा ऋचः सर्वाणि यजूंषि सर्वाणि सामानि वाचस्तोमे पारिप्लवे शंसति'** (सायणीयग्भाष्योपोद्घात उद्धृतं वचनम्) ।

२. **'अपि वा प्रयोगसामर्थ्यान्मन्त्रोऽभिधानवाची स्यात्'** (मी० २।१।३१) । प्रयोगवचनसामर्थ्याद् अर्थाद् ब्राह्मणोक्तविनियोगसामर्थ्यान् मन्त्रेषु प्रयुक्ता लोट्-लिङ्-लेट्लकाराः क्रियमाणकर्मण एव बोधका भवन्ति ।

३. द्र०—कात्या० गृह्य २।२।३॥

४. **'दधिक्राव्णो अकारिषम्'** इत्यस्य दधिभक्षणे, **शन्नोदेवीत्यस्य** शनैश्चर-ग्रहपूजायाम् । नवग्रह-पूजासु विनियुक्तानां मन्त्राणां विषये दयानन्दसरस्वती-

एवमुत्तरोत्तरं काल्पनिकविनियोगानाम् आधिक्यात् महायाज्ञिकेन कौत्सेन **'मन्त्रा अनर्थकाः'**[1] इति स्पष्टमुद्घोषितम्। अर्थाद् यज्ञकर्मसु मन्त्राणां पाठेनैवादृष्टमुत्पद्यते, तेनैव च यज्ञकर्मणः फलं प्राप्यते।

इत्थं याज्ञिकैरुद्भावितस्य मन्त्रानर्थक्यवादस्य प्रभावः सम्प्रत्युपलब्धेषु शाखा-ब्राह्मणादिषु स्पष्टमुपलक्ष्यते। इदमेव च कारणं यच्छाखासु शतपथमतिरिच्यान्यब्राह्मणेषु मन्त्रविनियोगा एव प्रायेणोपलभ्यन्ते। नैतावदेव, ब्राह्मणशब्दस्य **ब्रह्मणां=मन्त्राणां व्याख्यानं ब्राह्मणम्** इति मूलभूतार्थं परित्यज्य ब्राह्मणस्य लक्षणं **कर्मचोदना ब्राह्मणानि**[2] इति **विनियोजकं ब्राह्मणम्** इति च याज्ञिकैः स्वीकृतम्। यद्यपि शतपथभिन्नेषु ब्राह्मणेषु यत्र क्वचिन्मन्त्रार्था उपलभ्यन्ते, ते प्रायेणानुषङ्गिका एव। अर्थाद् मन्त्रार्थपरिज्ञापनाय न ब्राह्मणानां प्रवचनमभूत्। अत एवैषो वेदस्य याज्ञिकार्थस्य परिज्ञानमपि न भवति। वेदव्याख्यातारो ब्राह्मणोक्तविनियोगं दृष्ट्वा तदाधारेण याज्ञिकप्रक्रियानुसारिणं वेदार्थं व्याचक्षते।

अनया विस्तृतविवेचनयेदं विस्पष्टं यद् याज्ञिकप्रक्रियासु यत्परिवर्तनं परिवर्धनं चाभूत् तस्य वेदार्थेऽत्यन्तं प्रभावः समपद्यत। **या खलु याज्ञिकप्रक्रिया वेदस्याधिदैवतस्य मुख्यार्थस्य परिज्ञापनाय प्रकल्पिताऽभूत् तयाऽन्ते वेदा अप्यर्थवन्तः सन्तो निरर्थकाः कृताः।** यद्यपि **यास्क-जैमिनि-याज्ञवल्क्यानां** महर्षीणां प्रभावान् मन्त्रानर्थक्यवादस्य स्वल्पः प्रतिवादः समभूत्, तथापि तेन प्राचीनेषु तदानीन्तनेषु ग्रन्थेषु मन्त्रार्थेन योऽसम्बद्धो याज्ञिकविनियोगः प्रावर्तत, तस्य परिमार्जनं नाभवत्। अतो याज्ञिकाः तथाभूतान् मन्त्रार्थासम्बद्धान् विनियोगान् उत्तरकालेष्वप्यकुर्वन्।

पूर्वप्रकरणस्योपसंहारः

पूर्वस्मिन् प्रकरणे श्रौतयज्ञानां सम्बन्धे येषु विषयेषु संक्षेपेणाऽस्माभिर्विचारः कृतस्ते सन्ति—

१—यज्ञशब्दस्यार्थः (पृष्ठ ३)।

स्वामि-विरचितस्य सत्यार्थप्रकाशस्य प्रथमं संस्करणं (पृष्ठ ३३३) द्रष्टव्यमस्ति।

१. यदि मन्त्रार्थप्रत्यायनाय [निरुक्तम्], अनर्थकं भवतीति कौत्सः। अनर्थका हि मन्त्राः। निरुक्त १।१५॥

२. आप० प० १।३४; आप० श्रौत २४।१।३२॥

२—द्रव्ययज्ञस्य लक्षणम्, तत्प्रभेदाश्च (पृष्ठ ४) ।

३—द्रव्ययज्ञानां कल्पनायाः प्रयोजनम् (पृष्ठ १६) ।

४—द्रव्ययज्ञानाम् आधिदैविकसृष्टियज्ञैस्तुलना (पृष्ठ १९) ।

५—यज्ञानां प्रादुर्भावस्य कालः (पृष्ठ २७) ।

६—प्रारम्भिका यज्ञाः (पृष्ठ २९) ।

७—प्रारम्भिकयज्ञेषु आडम्बरराहित्यं सात्विकता च (पृष्ठ २९) ।

८—स्वामिदयानन्दसरस्वतीसम्मता यज्ञ-प्रक्रिया (पृष्ठ ३३) ।

९—यज्ञप्रक्रियानुसारी वेदार्थः (पृष्ठ ३५) ।

१०—यज्ञानां प्रादुर्भावस्योत्तरकाले वेदार्थे प्रभावः (पृष्ठ ३७) ।

११—काल्पनिका विनियोगाः (पृष्ठ ३८) ।

१२—काल्पिनिक-मन्त्राणां रचना (पृष्ठ ४१) ।

१३—याज्ञिकवादस्य मन्त्रानर्थक्यवादे परिणतिः (पृष्ठ ४२) ।

नैत्यकयज्ञेषु सत्यपि बहुविधपरिवर्तने मुख्यांशः सुरक्षितः

नित्यनैमित्तिककाम्यभेदैर्विभक्तेषु यज्ञेषु यद्यपि नित्यविहितेष्वग्निहोत्रादारभ्याऽश्वमेधान्तेषु यागेष्वप्युत्तरोत्तरं बहुविधं परिवर्तनं समजायत, तथापि पूर्वनिर्दिष्टान् परिवर्तनान् परिहाप्य एषां शुद्धस्वरूपस्य परिज्ञानं सौकर्येण भवति अर्थादेषां मुख्यांशस्तत्र सुरक्षित उपलभ्यते ।

नैत्यकयागेष्वपि अजादीनां पशूनां यदालम्भनं शाखा-ब्राह्मण-श्रौतसूत्रेषूपलभ्यते तस्य विषय इदानीं विचारः क्रियते—

श्रौत-पशुयाग-मीमांसा

पशुयागानां विषये विचारात् पूर्वं तत्र विहितानां पशूनां सम्बन्धे विचारोऽत्यावश्यक इति कृत्वा पूर्वं पशुविषयकी मीमांसा प्रस्तूयते—

ऐतरेयब्राह्मणे (२।८) शतपथब्राह्मणे (१।२।३।६-७) च पुरुष-अश्व-गो-अवि-अजाख्यानां पञ्चविधानां पशूनां निर्देश उपलभ्यते । तत्रैते पञ्च

पशवो मेध्या उक्ताः। अत्रेदं विचारणीयं किमेते पशवो लौकिका उत केषांचिदन्येषां पशूनामेते प्रतीकभूता इति ?

अस्माभिः पूर्वं (पृष्ठ १८-२३) सविशेषं प्रतिपादितं यदेते द्रव्यमययज्ञाः स्वयम् आधिदैविकानां सृष्टियज्ञानां प्रतीकभूतानि नाटकरूपाणि वा व्याख्यानानि सन्ति, तत्र प्रयुक्तानि पात्राणि द्रव्याणि च सृष्टियज्ञान्तर्गतानां विविधानाम् आधिदैविकतत्त्वानां प्रतीकभूतानि सन्ति। अनया दृष्ट्या पुरुषमेधादयः तद्गताश्च पुरुष-अश्व-गो-अवि-अजादयः पशवोऽपि केषांचिद् आधिदैविकतत्त्वानां प्रतीकभूतानि वर्तन्ते।

वेदविहिताः पशुयज्ञाः सृष्टियज्ञरूपाः

सम्प्रतीहोदाहरणार्थं पूर्वं **पुरुषमेधम्** उपस्थापयामः। पुरुषमेधे शुक्लयजुष एकत्रिंशत्तमोऽध्यायः ऋग्वेदस्य दशममण्डलस्य नवतितमं सूक्तं विनियुक्तमुपलभ्यते। उभयत्र श्लेषालंकारेण **प्राकृतस्य विराट्पुरुषस्य** (हिरण्यगर्भाख्यस्य **महदण्डस्य**) **त्रिगुणातीतस्य च परमविराट्पुरुषस्य ब्रह्मणः** प्रतिपादनमस्ति। एतत्प्रकरणस्य केचन मन्त्रा इहोपस्थाप्यन्ते येन स्पष्टं भविष्यति यच्छ्रौते पुरुषमेधे विनियुक्तेषु मन्त्रेषु कस्य पुरुषस्य वर्णनं विद्यते तस्य मेधस्य च किं स्वरूपमस्ति। यजुर्वेदस्यैकत्रिंशत्तमस्याध्यायस्य पञ्चमो मन्त्र इत्थं श्रूयते—

ततो विराडजायत विराजो अधि पूरुषः।
स जातो अत्यरिच्यत पश्चाद् भूमिमथो पुरः॥

पुरस्तात् पठितेषु चतुर्षु मन्त्रेषु विराट्पुरुषस्य महिम्नो वर्णनं विद्यते। प्रस्तुते पञ्चमे मन्त्रे **सर्ग-प्रक्रियाया अतिसंक्षेपेण वर्णनं** क्रियते। अस्य व्याख्या सांख्यप्रक्रियया वेदेष्वन्यत्र निर्दिष्टया सर्गप्रक्रियया च यथावद् विज्ञातुं शक्या।

मन्त्रार्थः—तस्मात् [अजायमानाया सत्त्वरजस्तमसां साम्यावस्थारूपायाः प्रकृतेः सकाशात्] विराड् उत्पन्नो बभूव, ततो विराजः पुरुषः समुत्पन्नः। ततस्तदनन्तरं प्रादुर्भूतः पुरुषः अत्यरिच्यत = रिक्तो बभूव। तेनातिरेकेण स पुरुषः भूमिम् अथोऽन्यान् पुरो लोकान् प्राकटयत्।

अयं मन्त्रस्य शाब्दिकोऽर्थो ज्ञेयः। अस्मिन् मन्त्रे सर्गोन्मुखीभूतायाः प्रकृतेः सकाशाद् द्वयोः प्रमुखविकारयोरुल्लेखः कृतः। 'विराट्'शब्देनेह सांख्यप्रतिपादितो महान्, अहङ्कारः, तत उत्पन्नानां पञ्चतन्मात्राणाम् (१+१+५=७) उत्पत्तिपर्यन्तं प्रथमसर्गस्य = प्रथमदेवयुगस्य निर्देशः कृत :। ततः 'पुरुष'शब्देन

हिरण्यगर्भ-प्रजापतिप्रभृतिभिरनेकैर्नामभिः स्मृतस्य महतोऽण्डस्य प्रादुर्भाव उक्तः ।

ऋग्वेदस्य दशममण्डलस्य द्वासप्ततितमेऽदितिदेवतात्मके सूक्ते श्रूयते—अदितेः (देवमातुः प्रकृतेः) अष्टौ पुत्राः समुत्पन्नाः । तेषु **सप्त पुत्रा प्रथमे युगे** समभवन्, **अष्टमो मार्तण्डः** (=मृत=मरणधर्मा अण्डः=महदण्डः[1]) द्वितीये **युगे**ऽजायत । तदुक्तम्—

अष्टौ पुत्रासो[2] **अदितेर्ये** जातास्तन्वस्परि ।
देवाँ उप प्रैत् सप्तभिः परा मार्ताण्डमास्यत ॥८॥

सप्तभिः पुत्रैरदितिरुप प्रैत् पूर्व्यं युगम् ।
प्रजायै मृत्यवे त्वत् पुनर्मार्ताण्डमाभरत् ॥९॥[6]

अयं वैदिको मार्तण्ड एव महदण्डरूपः पुरुषः[3] प्रजापतिः । अस्योत्पत्तिः महद्-अहंकार-पञ्चतन्मात्राभ्यो भवति।[4] यथाऽण्डजानां प्राणिनाम् अङ्गप्रत्यङ्गानां रचना अण्डेष्वेव भवति,तद्वदेव लोकलोकान्तराणां रचना महदण्डेष्वेव जायते । अयमेव महदण्डो वेदे 'यज्ञः'[5] इति नाम्ना **'विश्वकर्मा भौवनः**[6]' इति नाम्ना च स्मर्यते । यदा मार्तण्डस्य (महदण्डस्य) अन्तरूष्मणा तदन्तर्गतानां लोकानां निर्मितिः समाप्तिमेति, तदाय मार्तण्डः **सहस्रांशुसमप्रभो** भवति (द्र०—मनु० १।९) । हिरण्यरूपत्वाद् **'हिरण्यगर्भः'** इत्युच्यते । एतद्रूपकस्य महदण्डस्य वर्णनम् ऋग्वेदे हिरण्यगर्भसूक्तस्य (१०।१२१) प्रथमस्यामृच्येवम् उपलभ्यते ।

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

---

१. प्रायेण पुराणेषु 'महदण्ड'शब्दस्यैव प्रयोग उपलभ्यते ।

२. प्राचीनकाले सौभाग्यवतीभ्यः स्त्रीभ्यः **'अष्टपुत्रा भव'** इत्येवाशीः प्रदीयते स्म । तस्य मूलोऽयमेव मन्त्र आसीदिति प्रतीयते ।

३. ततः संवत्सरे पुरुषः समभवत, स प्रजापतिः । शत० ११।१।६।२॥

४. पुरुषाधिष्ठितत्वाच्च अव्यक्तानुग्रहेण च ।
महदादयो विशेषान्ता अण्डमुत्पादयन्ति वै ॥ वायुपुराण ४।७४॥
पुरुषः=ब्रह्म, अव्यक्ता=प्रकृतिः, विशेषाः=पञ्चतन्मात्राः ।

५. द्रष्टव्य—**तस्माद् यज्ञात् सर्वहुतः** (यजुः ३१।६) ।

६. द्रष्टव्य ऋ० मं० १०, सूक्त ८१ ।

अत्र 'क'शब्देन प्रजापतिरुच्यते[1], 'देव'शब्देन च तत्रस्थः प्राणरूपो भूतगणः। तस्मै प्रजापतये देवाय वयं हव्यरूपेणांशेन 'विधेम'[2] निर्माणकार्यं कुर्मः।

स जातो अत्यरिच्यत पश्चाद् भूमिमथो पुरः।

इति याजुषमन्त्रे (३१।५) विराट्पुरुषस्य महदण्डस्य पूर्णतानन्तरं तस्यावरणस्य भेदात् रिक्तीभावाद्[3] भूम्यादीनां ग्रहोपग्रहादीनां प्रादुर्भावः संकीर्तितः।

तस्माद् यज्ञात् सर्वहुतः संभृतं पृषदाज्यम्।
पशूँस्तांश्चक्रे वायव्यानारण्या ग्राम्याश्च ये॥

इत्यस्मिन् याजुषे मन्त्रे (३१।६) **यज्ञात्**=महदहङ्कारपञ्चतन्मात्रादीनां संगत्या प्रादुर्भूताद् विराट्पुरुषात्, यः **सर्वहुतः**[4] (=यस्य अन्तर्बहिर्वर्तमानाः सर्वे प्रकृत्यंशाः 'हुताः' अर्थात् कार्यरूपेण परिणता **अभूवन्**) आसीत्, तस्मात् **पृषदाज्यम्**[5]=क्वचित् प्रकाशः क्वचिच्चान्धकारः **संभृतम्**=संधारितोऽभूत्। एतेन विराट्पुरुषाख्ये सर्वहुते यज्ञे प्रकाशवताम् अप्रकाशवतां च सूर्यपृथिव्यादीनां समुत्पत्तिः परिकीर्तिता। तस्मादेव सर्वहुतो यज्ञात् **वायव्यान्** वायौ विचरणमानान पशून्, ये **आरण्या ग्राम्याश्च** पशव आसन्, **तान् चक्रे**=उत्पादितवान्।

ये वायुचरा **ग्राम्याः पशवः** समूहरूपेणैकत्र स्थिताः सूर्यरूपेण यूपेन तद्रश्मिरूपयाऽऽकर्षणशक्तिरूपया रज्ज्वा बद्धाः स्व-स्वनियतकक्षासु परिभ्रमणशीला बुधशुक्रादयो ग्रहाः,[6] **आरण्याश्च पशवः** स्वातन्त्र्येण विचरमाणा धूमकेतु-

---

१. प्रजापतिर्वै कः। ऐ०ब्रा० २।३८॥ को हि प्रजापतिः। शत०६।२।२।५॥

२. विपूर्वो धान् करोत्यर्थे प्रयुज्यत इति वैयाकरणा आहुः।

३. स (=प्रजापतिः) सर्वाणि भूतानि सृष्ट्वा रिरिचान इव मेने। शत० ब्रा० १०।४।२।२॥

४. द्रष्टव्य—निरुक्त १०।२६—विश्वकर्मा भौवनः सर्वमेधे सर्वाणि भूतानि जुह्वाञ्चकार। स आत्मानमप्यन्ततो जुह्वाञ्चकार।.....विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् (ऋ० १०।८१।६) इति॥

५. यज्ञकर्मणि दधिसहितमाज्यं पृषदाज्यमुच्यते। पृषदाज्ये दध्नोंऽशाः पृषद्रूपेण श्वेतबिन्दुरूपेण घृताद् पृथग्गृहीता भवन्ति। अनेनैव साम्येनेह पृषदाज्यस्यार्थः क्वचित्प्रकाशः क्वचिच्चान्धकारः कृतः।

६. **असौ वा आदित्यो यूपः**। द्र०—ऐ० ब्रा० ५।२८॥ **पशवो वै यूपमुच्छ्रयन्ति**। शत० ३।७।२।४॥ पशुयागे पशुप्राणिनो यूपस्योच्छ्रयणस्य निमित्ता

प्रभृतयो ज्ञेयाः। इह भूलोकस्थाः पशवः पक्षिणश्चाभिप्रेता न सन्ति। उत्तरस्मिन्नष्टमे मन्त्रे श्रूयमाणा उभयादतोऽश्वादयः, एकदतश्च गवादयोऽपि नैव भूलोकस्थाः पशवः। विस्तरभिया नेहास्मिन् विषयेऽधिकं लिख्यते।

अतः परं चतुर्दशे मन्त्र उक्तम्—यस्मात् सर्वहुतः पुरुषाद् देवैः=आधिदैविकशक्तिभिर्यज्ञस्य विस्तारः कृतः, तस्याज्यं (व्यक्तेः कान्तेर्वा साधनं) वसन्त वासीत्, इध्मः (=प्रदीपकः) ग्रीष्मः, हव्यं च शरद् ऋतुरभूत्।

एतेन वर्णनेनैतद् विस्पष्टं यदस्मिन् प्रकरणे श्रूयमाणो यज्ञो न द्रव्यमयो लौकिको वर्तते। अस्य यज्ञस्य (=पुरुषाध्याये श्रूयमाणस्य सृष्टियज्ञस्य) द्रष्टा यजमानो[1] **नारायणो**[2] वर्तते। नारा नाम आपः=मूलभूता प्रकृतिः, तस्यां यस्यायनं व्याप्तिः, तस्य परमपुरुषस्य नाम नारायणो ज्ञेयः।[3]

आधिदैविक-पदार्थेभ्यः 'पशु'शब्दस्य व्यवहारः

आधिदैविकस्य जगतः **'अग्नि-वायु-सूर्य,** संज्ञकेभ्यः पदार्थेभ्यो वेदे न केवलं 'पशु'शब्दस्य व्यवहार उपलभ्यते, अपि तु तेषाम् आलभनं तैर्यजनं च श्रूयते। तथा चाश्वमेधप्रकरणे मन्त्रवर्णः—

अग्निः पशुरासीत् तेनायजन्त। वायुः पशुरासीत् तेनायजन्त। सूर्यः पशुरासीत् तेनायजन्त॥ शुक्लयजुः २३।२७; तै० सं० ५।७।२६॥

लौकिकेषु द्रव्यमययज्ञेषु तु अग्निवायुसूर्यरूपैः पशुभिर्यजनस्य तु सम्भव एव नास्ति। अतः स्पष्टमेवैते सृष्टियज्ञस्य साधनभूताः पशवः सन्ति। अयमेवाभिप्रायो निरुक्तकारेण यास्केन पुरुषाध्याये पुरुषसूक्ते च पठितस्यैकस्य मन्त्रस्य व्याख्यानं कुर्वता स्पष्टीकृतः। मन्त्रस्तद्व्याख्यानं चेत्थमस्ति।

भवन्ति। अनया दृष्ट्या सृष्टियज्ञे आदित्यरूपिणा यूपेन सम्बद्धा ग्राम्याः पशवो ग्रहोपग्रहा विज्ञेयाः।

१. लौकिकयज्ञेष्वपि यजमानो द्रष्टृवदेवास्ते। दक्षिणाभिः परिक्रीता ऋत्विज एव कार्यं कुर्वन्ति। यज्ञफलान्निर्मुक्त्यै स प्रत्याहुति 'इदं न मम' इति संकल्पमात्रमुच्चारयति।

२. यजुष एकत्रिंशदध्यायस्य ऋग्वेदस्य च दशममण्डलान्तर्गतस्य नवतितमस्य सूक्तस्य द्रष्टा 'नारायणः' एवास्ति। द्रष्टव्या—सर्वानुक्रमणी।

३. आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः॥ मनु० १।१०॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥

यज्ञेन यज्ञमयजन्त देवाः=अग्निनाऽग्निमयजन्त देवाः। अग्निः पशुरासीत् तमालभन्त तेनायजन्त इति च ब्राह्मणम्। **तानि धर्माणि प्रथमान्यासन्**। **ते ह नाकं महिमानः** समसेवन्त। **यत्र पूर्वे साध्याः सन्ति देवाः** साधनाः। **द्युस्थानो देवगण इति नैरुक्ताः। पूर्वं देवयुगमित्याख्यानम्॥ निरुक्त १२।४१॥**

आख्यानविदां मते पूर्वदेवयुगस्य वर्णनमस्मिन् मन्त्रेऽभिहितम्।

अस्य मन्त्रस्य प्रायेणैतादृशमेव व्याख्यानं ऐतरेयब्राह्मणे (१।१६) उपलभ्यते। यास्केन **द्युस्थानो देवगणः** इत्यनेन आदित्यरश्मीनां निर्देशः कृतः। महीदासेनैतरेयेणापि **छन्दांसि वै साध्या देवाः** इत्युक्त्वा आदित्यरश्मय एव उक्ताः। यत ऐतरेयब्राह्मणे (२।१८) छन्दांसि प्रजापतेरङ्गानि उक्तानि—**प्रजापतेर्वा एतान्यङ्गानि यच्छन्दांसि** इति। पुराणेषु छन्दसाम् आदित्यस्याश्वरूपेण बहुधा वर्णनमुपलभ्यते—

छन्दोभिरश्वरूपैः। वायुपु० ५२।४५॥

छन्दोरूपैश्च तैरश्वैः। मत्स्यपु० १२५।४२॥

छन्दोभिर्वाजिनरूपैस्तु। वायुपु० ५१।५७; मत्स्यपु० १२४।४॥

हयाश्च सप्त छन्दांसि। विष्णुपु० २।८।७॥

उक्तया निरुक्तव्याख्यया द्वे तत्त्वे स्पष्टं प्रतीयेते। प्रथमम्—अग्न्यादय आधिदैविकपदार्थाः पशव उच्यन्ते। द्वितीयम्—केषाञ्चिद् वेदार्थविदां मते प्रकृते मन्त्रे तत्पूर्वपठितेषु च पुरुषाध्यायः पुरुषसूक्तस्थेषु मन्त्रेषु पूर्वदेवयुगस्य अर्थात् सर्गस्य पूर्वभागस्य वर्णनं विद्यते[1]।

इदमप्यत्रावधेयम्—वेदस्य शाखासु ब्राह्मणग्रन्थेषु च यत्र क्वापि पशुयागस्य वर्णनमुपलभ्यते तत्र प्रायेण सर्वत्र ततः पूर्वं पश्चाद्वा **पुराकल्परूपोऽर्थवादः** श्रूयते। पुराकल्परूपेऽर्थवादे कल्पस्य सर्गस्य यत्पुराकालिका (=सर्गकालिका) घटनास्तासां वर्णनं क्रियते।[2] यथा—

---

१. द्र०—पूर्वत्र ४६ तमे पृष्ठे निर्दिष्टः 'सप्तभिः पुत्रैरदितिरुपप्रैत **पूर्व्यं युगम्**' मन्त्रांशः।

२. परकृतिपुराकल्परूपार्थवादयोः स्वरूपे वैभिन्न्यं लक्ष्यते। भट्टकुमारिलस्त्वाह—'एकपुरुषकर्तृकमुपाख्यानं परकृतिः, बहुकर्तृकं पुराकल्पः' इति

१—तैत्तिरीयसंहितायां **'यः प्रजाकामः पशुकामः स्यात्, स एतं प्राजापत्यं तूपरमालभेत'** (२।१।१) इति विधेः पूर्वं पुराकल्परूपोऽर्थवाद इत्थं श्रूयते—

"प्रजापतिर्वा इदमेक आसीत्। सोऽकामयत प्रजाः पशून् सृजेयेति। स आत्मनो वपामुदखिखदत्। तामग्नौ प्रागृह्णात्। ततोऽजस्तूपरः समभवत्। तं स्वायै देवताया आलभत, ततो वै स प्रजाः पशून् असृजत्।"

अस्मिन् पुराकल्पे उक्तः 'प्रजापतिः, तस्य वपा, तस्या अग्नौ प्रहरणम्, ततस्तूपरस्याजस्य प्रादुर्भावः, तं देवताया आलभ्य प्रजानां पशूनाम् उत्पत्तिः' इति सर्वं कथानकं सर्गकालिकमेव। भाष्यकारेण शबरस्वामिनाऽपि अस्य प्रकरणस्य व्याख्या सृष्टितत्त्वपरैव विहिता (द्र०—मी० १।२।१० भाष्यम्)।

२—तैत्तिरीयसंहितायां **'यो वरुणगृहीतः स्यात् स एतं वारुणं कृष्णमेकशितिपादमालभेत** (२।१।२।१) इति विधेः पूर्वमनन्तरं च विस्तृतः पुराकल्परूपोऽर्थवादः पठ्यते। अस्य स्पष्टीकरणं वयमग्रे **'सूर्यपशोरालभनं तेन यजनं च'** इत्यस्मिन् प्रकरणे करिष्यामः।

इमे द्वे प्रकरणे इह निदर्शनमात्राय उपस्थापिते।

अनया दृष्ट्या 'पुरुषमेध-अजमेध-गोमेध-अविमेध-अजमेध'संज्ञकानां यज्ञानां लौकिकाः पशवः सृष्टियज्ञे सर्गकाले तदुत्तरकाले च विद्यमानानाम् आधिदैविकपदार्थानां प्रतिनिधिभूता एव इति विस्पष्टं भवति। द्रव्यमयाः पुरुषमेधादयो यज्ञाः केषां सृष्टियज्ञानां प्रतिनिधयः? द्रव्यमयेषु पुरुषमेधादिषु च यज्ञेषु पुरुषादिपशूनां प्राचीनकाले आलम्भनं भवति स्म उत न भवति स्मेत्यस्य मीमांसाऽग्रे यथास्थानं करिष्यते।

पशुयज्ञानां मीमांसाकरणात् प्राक् 'द्रव्यमययज्ञा मानवान् कथं संप्राप्ताः, **आलभते** इति पदस्य कोऽर्थः, **आलभन-आलम्भनक्रिययोश्च** को भेदः' इति विषयेष्विह विचारः क्रियते—

यज्ञ-सम्बन्धि-आख्यानम्

यज्ञविषयकं यदाख्यानं वैदिकवाङ्मय उपलभ्यते तद् द्विप्रकारकम्। एकं

(तन्त्रवार्तिक २।१।३३)। न्यायभाष्यकारस्त्वाह—'कस्यचिद् व्याहतस्य विधेर्वादः परकृतिः। ऐतिह्यसमाचरितो विधिः पुराकल्पः' इति (न्यायभाष्य २।१।६४)।

सृष्टिगतानां देवासुराणां सम्बन्धि, द्वितीयं श्रौतसूत्रोक्तं मानुषं द्रव्ययज्ञविषयकम् । उभयोरप्याख्यानयोर्वर्णने देवासुरशब्दयोरेव प्रयोग उपलभ्यते । अत एतादृशयोराख्यानयोर्विषयविभागे महत् काठिन्यम् अनुभूयते । वयमिह स्वबुद्ध्यनुसारम् उभयप्रकारकयोर्वचनयोर्विभागं कृत्वा किञ्चिल्लिखामः ।

प्रस्तुतानाम् आसुरयज्ञानां विषये विचारात् पूर्वमिदमवधेयम्, यद् भारतीयदर्शनदृष्टया सर्ग-प्रलययोश्चक्रम् अनादिकालात् प्रवृत्तम्, नेदं कदाचिद् विरंस्यते । यदा तु प्रवृत्तसर्गसम्बन्धे किञ्चिद् वक्तव्यं भवति, तदा भारतीया ग्रन्थकाराः प्रवृत्तसर्गात् पूर्वभाविनी या प्रलयावस्था तस्याः संक्षेपेण वर्णनमवश्यं कुर्वन्ति । प्रलयवर्णनानन्तरं च सर्ग-प्रक्रियां वर्णयन्ति ।

अस्मत्सौरमण्डलस्य अहोरात्रसंज्ञकयोः स्थितिप्रलययोः कालश्चतुष्षष्टिकोट्युत्तर-अष्टार्बुदवर्षाणां विद्यते । अनयोरर्धं कालोऽह्नोऽर्थात् सृष्टेः कालः, अर्धं रात्रेरर्थात् प्रलयस्य कालः । प्रलयकालस्य आरम्भाद् आसुरप्रवृत्तयः (=ध्वंसनात्मकप्रवृत्तयः) उत्तरोत्तरं प्रवर्धन्ते । प्रलयस्य मध्यमूले काले ता आसुरप्रवृत्तयः पूर्णतां प्राप्य उत्तरोत्तरं क्षीणा भवन्ति, दैवीप्रवृत्तयश्च उत्तरोत्तरं विकसन्ति ।[1] अतो वर्तमानसृष्टेः प्राक् प्रलयकाले आसुरप्रवृत्तानां कारणाद् आसुरयज्ञा (=ध्वंसनात्मकयज्ञाः) बभूवुः । अर्थात् प्रलयात्मका यज्ञा आसुरशक्तीनामधीना आसन् । अस्यैव तथ्यस्य निर्देशस्तैत्तिरीयसंहितायाम् (६।३।७।२) इत्थमुपलभ्यते—

'असुरेषु वै यज्ञ आसीत्, तं देवास्तूष्णीं होमेनावृञ्जत' ।

अस्मिन् प्रकरणे श्लेषेण सृष्टियज्ञो वर्णित इति तदीयपाठेन स्पष्टं प्रतीयते । दैवीभिः शक्तिभिः तूष्णीं भावेनार्थात् शनैः शनैः स्वीयं सर्जनात्मकं कार्यमारब्धि । उत्तरोत्तरं प्रवर्धमानाभिर्दैवीभिः शक्तिभिरसुराणां सकाशाद् ध्वंसनात्मकं यज्ञं स्ववशे कृत्वा सर्जनात्मको यज्ञः समुपलब्धः ।

---

१. अस्य तत्त्वस्य निरूपणं गायत्र्यादिषु छन्दस्सु आसुरच्छन्दसां दैवच्छन्दसां ह्रसीयमानया प्रवर्धमानया चाक्षरसंख्यया कृतम् ।(द्रष्टव्या—अस्मदीया वैदिकछन्दोमीमांसा, पृष्ठ ११३, पं० १२-२०, द्वि० सं०) । आसुरयज्ञेषु विघटनकारिण्यः प्रवृत्तेराधिक्यं सर्जनप्रवृत्तेश्च ह्रासम् आसुरच्छन्दसाम् उत्तरोत्तरं ह्रसीयमानयाऽक्षरसंख्यया दैवेषु यज्ञेषु सर्जनप्रवृत्तेरुत्तरोत्तरं प्रवृद्धिर्दैवच्छन्दसाम् उत्तरोत्तरं प्रवर्धमानयाऽक्षरसंख्यया प्रकटीक्रियते । इदं तत्त्वं छन्दोमीमांसायाः १२५ तमे पृष्ठे (द्वि० सं०) चित्रस्य माध्यमेन सम्यङ् निरूपितम् ।

सर्गोन्मुखकाले दैव्यः शक्तयः कनीयस्य आसन् आसुरप्रवृत्तयश्च ज्यायस्यः। अत एव शतपथब्राह्मण उक्तम्—**कनीयसा एव देवाः, ज्यायसा असुराः** (१४।४।१।१)।

ऐतिहासिका देवा असुराश्च

मानुषसर्गस्यारम्भे कश्यपस्य प्रजापतेः असुरसंज्ञका देवसंज्ञकाश्च संततय आसन् इति ऐतिह्याद् विज्ञायते।[1] तेष्वपि वयोदृष्ट्या असुरा ज्येष्ठाः देवाश्च कनीयसा आसन्। ऐतिहासिकस्य असुरशब्दस्य प्रवृत्तौ असु+रः (मत्वर्थीयो रप्रत्ययः) मूलमासीत्, अर्थाद् असुरा प्राणवन्तो बलवन्त आसन्।

पृथिव्याः प्रथमशासका असुराः

कश्यपपुत्रेषु असुराणां ज्येष्ठत्वात् त एवास्याः पृथिव्याः प्रथमशासका बभूवुः। तदुक्तं तैत्तिरीयसंहितायाम्—

असुराणां वा इयमग्र आसीत्। यावदासीनः परा पश्यति तावद् देवानाम्। ते देवा अब्रुवन् अस्त्वेव नोऽस्याम्॥ ६।२।४।३-४॥

मैत्रायण्यां संहितायामपीत्थमेव श्रूयते—

असुराणां वा इयमग्र आसीद् यान्निषद्य परापश्यंस्तद्देवानाम्। ३।८।३॥

असुराणां वा इयं पृथिव्यासीत्। ते देवा अब्रुवन् दत्त नो अस्याः पृथिव्या इति। ४।१।१०॥

एषां वचनानामयमेवाभिप्रायो यद् असुरा ज्येष्ठत्वाद् अस्याः पृथिव्याः शासका आसन्। देवा ततो निर्भक्ता बभूवुः। देवैरपि अस्यां पृथिव्यां स्वं भागं प्रदातुम् असुरेभ्य उक्तम्।[2]

---

१. यद्यपि वैदिकग्रन्थेषु देवासुरविषयकेषु प्रकरणेषु प्रायेणाऽऽधिदैविकानाम् ऐतिहासिकानां च देवासुराणां सम्मिश्रणमिवोपलभ्यते, पुनरपि तात्त्विकदृष्ट्या विचारे क्रियमाणे अनयोर्भेदः कर्तुं शक्यते।

२. दायभागस्यासमानविभागात्, देवैः स्वभागस्य याच्ञायाम् असुरैस्तस्य अप्रदानात् कौरव-पाण्डवयुद्धवद् देवासुराणामपि द्वादश लोमहर्षका भयङ्करा युद्धा अभूवन्। दैवासुरयुद्धानां भयङ्करता रामायणमहाभारतादिषु दैवासुरयुद्धानामुपमारूपेण निर्देशाद् अनुमातुं शक्यते। इमे युद्धा न्यूनातिन्यूनं वर्षाणां शतत्रयमभिव्याप्य बभूवुः। अन्ते च देवा जयमाप्नुवन् असुराश्च पराजयम्। पराजिता असुराः प्रायेण भारतभूमिं परित्यज्य तस्याः सीमान्तप्रदेशेषु आश्रयं

असुरैर्वर्णाश्रम-मर्यादाया यज्ञानां च प्रवर्तनम्

असुराणां प्रथमशासकत्वात् तैरेव प्रथमं वर्णाश्रममर्यादा व्यवस्थापिता, तैरेव च यज्ञानां प्रवर्तनमकारि ।

वर्णाश्रमविभागः—बौधायनधर्मसूत्रे पठ्यते—

तत्रोदाहरन्ति—प्राह्लादिर्वै कपिलो नामाऽसुर आसीत् । स एतान् भेदान् चकार देवैः सह स्पर्धमानः । बौधा० धर्मसूत्र २।१२।३०॥

तैत्तिरीयसंहितायामपि श्रूयते—**देवाः पराजिग्याना असुराणां वैश्यमुपायन्** (२।३।७।१) ।

यज्ञानां प्रवर्तनम्—तैत्तिरीयसंहितायां श्रूयते—

प्रजापतिर्देवासुरानसृजत । तदनु यज्ञोऽसृज्यत, यज्ञं छन्दांसि । ते विश्वञ्चो व्यक्रामन् । सोऽसुरान् अनु यज्ञोऽपाक्रामत् । ३।३।७।१॥

एतेनेदं स्पष्टं यद् यज्ञान् पूर्वम् असुराः प्रावर्तयन्निति ।

सौत्रामणी[1] यज्ञविषये शतपथे श्रूयते—

असुरेषु वा एषोऽग्रे यज्ञ आसीत् सौत्रामणी । स देवान् उपप्रैत । १२।९।३।७॥

असुरेभ्यो देवा यज्ञान् प्राप्नुवन्—शतपथब्राह्मणस्योक्तवचनेनेदं विस्पष्टं यत्सौत्रामणीयज्ञम् असुरा विदुः, तदनु तं देवा विदांचक्रुः[2] । इत्थमेव पूर्वं

लेभिरे । तत्रैव चासुरी सभ्यता विकासं प्राप्ता । आसुरीसभ्यता भोगप्रधाना नगरबहुला आसीत् । सिन्धुप्रदेशे मोहंजोदड़ोस्थानेषु खननेन यस्याः सभ्यतायाः दर्शनं जायते सा आसुरी सभ्यतैवास्ति । आर्याणां वसतिस्तु ग्रामबहुला आसीत् ।

१. सौत्रामण्यां सुरापानं भवतीति लोके प्रसिद्धिरस्ति । वस्तुतस्त्वस्मिन् यज्ञे यः पदार्थः सुराशब्देनोक्तः, या च तस्या निर्माणप्रक्रिया तेन विस्पष्टं प्रतीयते यदत्र विहिता सुरा लौकिकी मदकारिणी सुरा न विद्यते । सा तु त्रिषु दिवसेषु सिद्ध्या पेयविशेषा एव । एतद्विषयेऽस्मदीये महाभाष्यस्य हिन्दीव्याख्याने (अ० १, पाद १, आ० १, भाग १, पृष्ठ २१) द्रष्टव्यम् ।

२. सायणाचार्येण प्राचीनैतिह्यस्य ज्ञानाभावात् पूर्वोद्धृतस्य तैत्तिरीयसंहितायाः ३।३।७।१ वचनस्य व्याख्याऽशुद्धा विहिता ।

५१ तमे पृष्ठे उद्धृते **असुरेषु वै यज्ञ आसीत् तं देवास्तूष्णीं होमेनाबृञ्जत** (तै० सं० ६।३।७।२) इति वचने श्लेषेण 'यज्ञाः प्रथममसुराणां सकाशे आसन् तेभ्यो देवा लेभिरे इत्युक्तं भवति । कालान्तरे देवा यज्ञविद्यायाम् असुराणामपेक्षया प्रवीणतरा बभूवुः । अन्ततोऽसुरा यज्ञेषु देवानामनुकरणाय विवशा अभूवन् । अत एवोक्तम्—**देवा वै यद् यज्ञेऽकुर्वत तदसुरा अकुर्वत** । (तै० सं० ६।४।६।१) ।

देवेभ्यो यज्ञा मनुष्यान् प्रापुः—अनन्तरं देवेभ्यो मनुष्या यज्ञान् प्राप्नुवन् । 'ऐल'संज्ञकेन राज्ञा गन्धर्वेभ्यो (=देवजातिविशेषेभ्यः) अग्निविद्याया रहस्यं विज्ञायैकोऽग्निस्त्रिधा विभक्तः (द्र०—पूर्वत्र पृष्ठ २८), ऋषिभिश्च तत्र विविधक्रियाकलापानां संयोजनेन यज्ञा वैविध्यस्य पराकाष्ठां प्रापिताः ।

मनुष्येषु यज्ञाः त्रेतायुगस्यादौ प्रवृत्ताः । असुरेषु देवेषु च कृतयुगस्योत्तरार्धे एव यज्ञाः प्रावर्तन्त । अतः पूर्वत्र २७ तमे पृष्ठे तृतीयस्यां टिप्पण्यां निर्दिष्टेषु यज्ञप्रवर्तनविषयकेषु वचनेषु विरोधो नाशङ्कनीयः ।

उक्तानाम् असुराणां विवेचना

असुरविषयिक्या विवेचनाया मूले कारणमिदं वर्तते यदसुरशब्दश्रवणमात्रेणैव सम्प्रति वैदिकमर्यादाविरहितानां यज्ञविध्वंसकानां राक्षसानां पिशाचानां प्राणिविशेषाणां प्रतीतिर्भवति । अतः प्रसङ्गाद् असुराणां विवेचनेह क्रियते ।

भारतीयैतिह्यानुसारम् असुरा देवा मनुष्याश्च पुरुषजातेस्त्रीणि कुलान्यासन् । सर्गादौ कश्यपप्रजापतेः **दितिः अदितिः दनूः** संज्ञकाभ्यः पत्नीभ्यो यान्यपत्यान्यभूवन् तानि **दैत्य-आदित्य-दानव**नामभिः प्रसिद्धान्यभूवन् । दैत्या एव भारतीयेतिह्ये **असुर**नाम्नोच्यन्ते । दानवोऽप्यसुराणां सहयोगिनो बभूवुः । अदितेर्द्वादशापत्यानि आदित्यनामान्येव देवनाम्ना प्रसिद्धिं गतानि । इत्थम् असुराणां देवानां च द्वे कुले प्रारभेताम् ।

असुराः पूर्वे देवाः—आदिकाले असुरा वैदिकमर्यादानां यथावत् परिपालकाः श्रेष्ठाचारवन्तो बभूवुः । कश्यपप्रजापतिना एषां श्रेष्ठत्वाज्ज्येष्ठत्वाच्च पृथिव्याः शासन एते नियुक्ताः । **एतैरेवासुरैर्वैदिको वर्णाश्रम-विभागः यज्ञाश्च प्रवर्तिताः** (द्र०—पृष्ठ ५३) । शासने विशेषाधिकारे च प्राप्ते यदि तत्र कस्यचिद् अङ्कुशभूतस्य पुरोहितादेः स्थितिर्न भवेत् तर्हि शासकानां विशेषाधिकारसम्पन्नानां वा मनुष्याणां मतिः शनैः शनैः विकृतिम् आपद्यते । एत-

त्सिद्धान्तानुसारमेवासुराणां पतनमभूत् । आदौ योऽसुरशब्दः श्रेष्ठार्थे (असु+र =प्राणवान्=बलवान्) प्रयुक्तोऽभूत्[1] सोऽसुराणां कदाचारात् निकृष्टार्थस्य बोधकः समपद्यत । असुरा आदौ श्रेष्ठाचारवन्त आसन् इत्यस्यार्थस्य बोधकः, तेषां प्राचीनैतिह्यस्य च निदर्शक एकः 'पूर्वदेव'शब्द इदानीमप्यमरकोशादिषु (१।१।७) उपलभ्यते । असुराणां कदाचारे प्रवृत्त्यैवोत्तरकालेऽसुरशब्दः संस्कृतभाषायां राक्षसपिशाचादीनाम् कृते प्रयोगमलभत ।

उत्तरकाले यदा देवा असुरान् पराजित्य शासका अभूवन् तदा देवा अपि निरङ्कुशां राज्यसत्तां प्राप्य असुराणामिव वैदिकमर्यादां परित्यज्य कदाचारे प्रवृत्ताः । देवराजस्येन्द्रस्यानेकेषां मर्यादाहीनकर्मणां वर्णनमितिहासपुराणेषूपलभ्यते । यज्ञेषु पश्वालम्भनमपि इन्द्र एव प्रवर्तितवान् इत्यग्रे वक्ष्यते ।

अस्माकं पूर्वजाः परमर्षयोऽसुराणां देवानां च निरङ्कुशशासनात् शिक्षां गृहीत्वा मानव-राज्ञां रक्षायै मानवीयराजनीतौ एकं विशिष्टं प्रावधानम् अकार्षुः, येन राजा सर्वथा निरङ्कुशो न भवेत् । तदासीत् राज्ञां कृते पुरोहितवरणरूपम् । अयं पुरोहितो न यज्ञसम्वादकरूप आसीत् । स राज्ञो भाव्यापदानां प्रतिकारे समर्थः परमतेजस्वी ब्राह्मणो भवति स्म । एतस्य स्वीकृतिं विना राजा स्वेच्छया पदमेकमपि चलितुमसमर्थो भवति स्म । रघुकुलप्रसूतानां राज्ञां पुरोहितो महर्षिर्वसिष्ठ एतादृश एवासीत् । मध्यकालेऽपि राजनीतिशास्त्रज्ञेनाऽऽचार्यकौटल्येनाऽपि स्वीयेऽर्थशास्त्रे लिखितम्—**तमाचार्यं शिष्यः पितरं पुत्रो भृत्यः स्वामिनमिव चानुवर्तेत** (अधि० १,अ० ६)। एकस्मिन् स्थाने तु—**मर्यादां स्थापयेद् आचार्यान् अमात्यान् वा । य एनं अपायस्थानेभ्यो वारयेयुः । छायानालिकया प्रतोदेन वा रहसि प्रमाद्यन्तमभितुदेयुः** (अधि० १; अ० ७) । राज्ञां निरङ्कुशतां वारयितुं यत् प्रावधानमस्माकं पूर्वजैः कृतं तदर्थं तेऽत्यन्तं धन्यवादार्हाः सन्ति ।

आलभते-आलभेत-पदयोः सम्बन्धे विचारः

सम्प्रति कर्मकाण्डेऽसकृत्प्रयुक्तयोः **आलभते आलभेत**पदयोः सम्बन्धे विचारः क्रियते । प्रायेण समस्तपशुयागानां प्रकरणे **आलभते आलभेत**पदयोः प्रयोगा

---

१. पूर्वत्र ५२ तमस्य पृष्ठस्य द्वितीयटिप्पण्यामुक्तमस्माभिः—असुरा देवैः पराजिता भारतस्य सीमान्तप्रदेशेषु आश्रयं लेभिरे । उत्तरकालेऽयमेवासुरशब्दः 'अहुर'रूपे परिणतः । अत एवायम् 'अहुर'शब्दः 'जेन्दावस्ता'ग्रन्थे श्रेष्ठार्थे प्रयुज्यते ।

उपलभ्यन्ते । अनयोः पदयोर्मूलभूता प्रकृतिर्वर्तते—**डुलभष् प्राप्तौ** (धातु० १।७०२) । तदनुसारमनयोः पदयोरर्थः प्राप्तिः स्पर्शनं चास्ति । उपनयने विवाह-संस्कारे च यत्र यत्र **हृदयमालभते**[1] इति प्रयुज्यते, तत्र सर्वत्र व्याख्याकारा **हृदयं स्पृशन्ति** इत्येवार्थं विदधति । परन्तु याज्ञिका **वायव्यं श्वेतमालभेत भूतिकामः** (तै० सं० २।१।१।१) प्रभृतिषु पशुयागविषयकेषु विधिवाक्येषु **आलभेत**-पदस्य **आलम्भनं कुर्याद्** अर्थात् 'तं पशुं हन्यात्' इत्यर्थं मन्यन्ते । सत्यप्येवं येषामारण्यकानां पशूनां पक्षिणां पुरुषाणां च द्रव्यदेवताविधायकेषु वचनेषु **आलभते** इति प्रयोगो दृश्यते, तत्र समस्ता अपि याज्ञिका **आलभते** इति विधौ सत्यपि न तान् घ्नन्ति, अपि तु तेषां पर्यग्निकरण-संस्कारानन्तरम् उत्सर्जनं कुर्वन्ति । यथा—

अश्वमेधे—**वसन्ताय कपिञ्जलानालभते, प्रजापतये पुरुषान् हस्तिन आलभते** (शुक्ल यजुः २४।२०, २९) इत्येवं विहितानां पशु-पक्षिणां विषये **कपिञ्जलादीन् उत्सृजन्ति पर्यग्निकृतान्** (कात्या० श्रौत २०।६।९) इति विधिर्दृश्यते । स्वैरपि वेदभाष्यकारैरस्मिन् प्रकरण उक्तम्—**तेष्वारण्याः सर्वे उत्सृष्टव्याः, न तु हिंस्याः** (द्र०—यजुः २४।४० उव्वटमहीधरभाष्यम्) ।

पुरुषमेधे—शुक्लयजुषः ३० तमस्याध्यायस्य पञ्चमकण्डिकात आरभ्य द्वाविंशतिकण्डिकापर्यन्तं '**ब्रह्मणे ब्राह्मणम् [आलभते]**' इत्यादिषु विधिवाक्येषु निर्दिष्टा अपि पुरुषाः पर्यग्निकरणानन्तरमुत्सृज्यन्ते—**कपिञ्जलादिवद् उत्सृजन्ति ब्राह्मणादीन्** (कात्या० श्रौत २१।१।१२) । अस्मिन्नेव प्रकरणे त्रिंश-

---

१. **अथास्यै दक्षिणांसमधि हृदयमालभते** । पार० गृह्य १।८।८; २।२।१५।। एवमन्यगृह्यसूत्रेष्वपि वचनमिदमुपलभ्यते ।

इत्थमेव **अङ्गान्यालभ्य जपति** (पार० गृह्य २।४ बहुटीकाकारसम्मतः पाठः) इत्यत्र प्रयुक्तस्य **आलभ्य**पदस्य **स्पृष्ट्वा** इत्येवार्थः । शबरस्वामिनाऽपि मीमांसायाः १।२।१० सूत्रस्य भाष्ये **आलभ्य**पदस्य **उपयुज्य** इत्यर्थो विहितः । शाबरभाष्यस्य विवरणकारेण गोविन्दामृतमुनिना '**आलभ्येत्यस्य व्याख्यानमुपयुज्येति प्राप्येति व्याख्यानं कृतम्** ।

१. शुक्लयजुषि केवलं द्रव्यदेवतयोरेव निर्देशः, 'आलभते'पदं तु अन्तिम-कण्डिकायां श्रूयते । तस्य सर्वशेषत्वात् प्रतिवाक्यं सम्बन्धो भवति । **तैत्तिरीय-ब्राह्मणे** (३।४।१।१) तु 'ब्रह्मणे ब्राह्मणमालभते' इत्यस्य पूर्वत्रैव निर्देशः । तस्योत्तरवाक्येष्वनुषङ्गो ज्ञेयः ।

त्तमस्याध्यायस्य द्वाविंशतितमायाः कण्डिकाया व्याख्याने याज्ञिका भाष्यकारा आहुः—**पर्यग्निकरणानन्तरं इदं ब्रह्मणे इदं क्षत्रायेत्येवं सर्वेषां यथास्वं देवतोद्देशेन त्यागः। ततः सर्वान् ब्राह्मणादीन् यूपेभ्यो विमुच्योत्सृजति** (द्र०—महीधरभाष्यम्)।

एवमेव सोमयागेऽपि त्वाष्ट्रस्य पात्नीवतः पशोः पर्यग्निकरणानन्तरम् उत्सर्जनं विधीयते—**पर्यग्निकृतं पात्नीवतमुत्सृजन्ति···त्वाष्ट्रो भवति** (द्र०—तै० सं० ६।६।१-२)।

एतैर्वचनैरेतत् स्पष्टं यद् **आलभते आलभेत** क्रिययोः प्रयोगेऽपि बहुत्र पशोरालम्भनमर्थाद् हिंसनं न भवति। अतोऽनयोः क्रिययोरालम्भनमेवार्थ इति मतम् असाध्वेव।

आ-लभ, आ-लम्भ इति द्वौ स्वतन्त्रौ धातू

वस्तुतस्तु आङ्पूर्वात् 'लभ'धातोः आङ्पूर्वो 'लम्भ'धातुः स्वतन्त्रः। **आलभ** इत्यस्य तु प्राप्तिः स्पर्शश्चैवार्थः, **आलम्भ** इत्यस्य तु हिंसार्थत्वम्। अर्थभेदाद् धातुद्वयस्य निरूपणाय आयुर्वेदस्य चरकसंहिताया एकं वचनम् इह प्रस्तूयते—

"आदिकाले खलु यज्ञेषु पशवः समालभनीया बभूवुः, नालम्भाय प्रक्रियन्ते स्म। ततो दक्षयज्ञप्रत्यवरकालं मनोः पुत्राणां नरिष्यन्ताभागेक्ष्वाकुनृगशर्यात्यादीनां च क्रतुषु 'पशूनामेवाभ्यनुज्ञानात्' पशवः प्रोक्षणमापुः।" चिकित्सास्थान १९।४॥

अस्मिन्नुद्धरणे **समालभनीयाः** पदस्य **आलम्भाय** पदस्य च पार्श्वक्येन प्रयोगो दृश्यते। वाक्यविन्यासेन अनयोः पदयोर्द्वौस्वतन्त्रावर्थाविति अपि विज्ञायते। पाणिनीयव्याकरणानुसारं तु 'श'भिन्नेष्वजादिषु प्रत्ययेषु **लभेश्च** (अष्टा० ७।१।६४) इति नियमेन सम्-आङ्पूर्वकस्य लभधातोः 'अनीयर्' प्रत्यये नुमि सति **समालम्भनीयाः** प्रयोगेण भाव्यम्। अनेनैव नियमेन **आलम्भाय** प्रयोगेऽपि आङ्पूर्वकस्य लभेर्धत्रि (='अ' प्रत्यये) नुमागमो भवति। चरकसंहितायां तु 'अनीयर्' प्रत्ययान्तस्य नुमरहितस्य **समालभनीयाः** पदस्य,नुमा सहितस्य **आलम्भाय** पदस्य च प्रयोगाद् विज्ञायते यद् लभ लम्भ इति द्वौ स्वतन्त्रौ धातू स्तः।

उत्तरकाले यदा 'लम्भ'धातोः भूयांसः प्रयोगा विलुप्ताः, तदा केषांचिदेवार्वाक्शिष्टानां प्रयोगाणां साधुत्वनिदर्शनाय पाणिनिप्रभृतिभिर्वैयाकरणैः 'लभ' धातावेव नुमागमस्य विधानं कृतम्। इत्थं च धात्वैककल्पनायाः कारणाद् **आलम्भ**धातोर्यो हिंसार्थ आसीत् स **आलभ**धातोः प्रयोगेष्वपि संक्रान्तः। अतएव **आलभते आलभेत** पदयोः **'आलम्भनं कुर्यात्'** इत्यर्थो व्याख्याकारैः कृतः।

आगमादेशादिविधानेन प्रकृत्यन्तर-कल्पना

वैयाकरणैर्येषां धातूनां प्रातिपदिकानां चाल्पाः प्रयोगा उपलब्धाः, तेषां साधुत्वनिदर्शनाय तदर्थकेषु प्रायेण समानरूपेषु धातुषु प्रातिपदिकेषु चागमादेश-वर्णव्यत्ययादिकल्पना समादृता। वस्तुतः पुराकाले तेषां प्रयोगाणां धातु-प्रातिपदिकरूपाः स्वतन्त्राः प्रकृतय आसन्। अयं विषयोऽस्माभिः 'संस्कृत व्याकरण शास्त्र का इतिहास' नाम्नो ग्रन्थस्य प्रथमाऽध्याये, 'पाणिनीयव्याकरणस्य वैज्ञानिकी व्याख्या' इत्याख्ये द्वितीये परिशिष्टे (भाग ३, पृष्ठ १५-४५; सं० २०४१) विस्तरेण निरूपितः। प्रकृते त्वेतावदेवास्त्यस्मत्कथनं यद् **आलम्भः, आलम्भनीयः, आलम्भ्या** आदिप्रयोगाणां भगवता पाणिनिना **लभेश्च, आडो यि** (अष्टा० ७।१।६४-६५) इत्याभ्यां सूत्राभ्यां नुमागमं विधाय लभधातोरेव यः सम्बन्धः प्रदर्शितः स कल्पना-प्रसूत एव न वास्तविकः। एषां प्रयोगाणां मूलभूता प्रकृतिस्तु लभि-लम्भरूपः स्वतन्त्रो धातुः। विलुप्तानां प्रकृतीनां परिज्ञानाय महाभाष्यकारेण पतञ्जलिना **न धातुलोप आर्धधातुके** (अष्टा० १।१।४) इति सूत्रस्य भाष्ये यो निकषः (कसौटी) उपस्थापितः, स इत्थं वर्तते—

'बृंहेरच्यनिटि। बृंहेरच्यनिटि उपसंख्यानं कर्तव्यम्। निबर्हयति, निबर्हकः। अचि इति किमर्थम्? निबृंह्यते। अनिटि इति किमर्थम्? निबृंहिता, निबृंहितुम्। तत्तर्ह्युपसंख्यानं कर्त्तव्यम्? न कर्तव्यम्। बृंहिः प्रकृत्यन्तरम्। कथं ज्ञायते? अचीति लोप उच्यते, अनजादावपि दृश्यते—निबृंह्यते। अनिटीत्युच्यते, इडादावपि दृश्यते—निर्बहिता, निर्बहितुम्। अजादावित्युच्यतेऽजादावपि न दृश्यते—निबृंहयति, निबृंहकः'॥ महाभाष्य १।१।४॥

अस्मिन् भाष्ये प्रकृत्यन्तरकल्पनाया यो नियमो निदर्शितः सोऽत्यन्तं विस्पष्टः।[1] उक्तं नियममाश्रित्यैव वैयाकरणसम्बद्धानां लभधातोः प्रयोगाणां मीमांसा करिष्यते—

पाणिनिना द्वे सूत्रे प्रोक्ते—**लभेश्च, आडो यि** (अष्टा० ७।१।६४-६५)। अनयोः सूत्रयोरयमर्थः—**लभेश्च**—लभेरङ्गस्य शब्लिङ्वर्जितेऽजादौ प्रत्यये

---

१. महाभाष्यकारेण लोपागमादेशादिभिः प्रकृत्यन्तरविधानमसकृन्निर्दिष्टम्। यथा—महाभाष्य १।१।४; ३।१।३४; ३।१।७८; ३।२।१३५; ४।१।३५; ४।१।९७; ४।२।२; ४।३।२२; ५।२।२९; ६।१।३०; ६।३।३५; ६।४।२४; ७।३।८७॥

परतो नुमागमो भवति । यथा लम्भयति लम्भकः । आङो यि—आङ उत्तरस्य लभेर्यकारादिप्रत्ययविषये नुमागमो भवति । यथा—आलम्भ्या गौः, आलम्भ्या वडवा ।

लभेश्चेति प्रथमनियमानुसारम् 'अनीयर्'प्रत्यये परतो लभेर्नुमागमेन भाव्यम् । तथा सति समाङ्पूर्वाल्लभेः 'समालम्भनीय' इति प्राप्नोति, परन्तु चरकसंहितायां उक्तोद्धरणे (पृष्ठ ५७) **समालभनीयाः** इति प्रयोगे नुमाभावो दृश्यते । आङो यि इति द्वितीयनियमानुसारं यति प्रत्यये ण्यति[1] वा आलम्भ्याप्रयोगेण भाव्यम्, परन्तु अग्निष्टोम आलम्भ्यः (काशिकायाम् १।१।७५ उद्धृतः पाठः) इति प्रयोगे नुमाभावो दृश्यते ।

एवं चानयोर्नियमयोर्व्यत्यासेन विज्ञायते यन्मूलतः लभ लम्भ द्वौ स्वतन्त्रौ धातू स्तः । पाणिनेः प्राचीने काशकृत्स्नीये धातुपाठे डुलभष् प्राप्तौ (१।५६४) लभि (=लम्भ) धारणे (१।३६२) इति द्वौ स्वतन्त्रौ धातू पठ्येते[2] । अनयो रूपाण्यपि तट्टीकायां क्रमशः लभते लभनम्, लम्भति लम्भनम् इति निर्दिश्यन्ते ।

लभ-लम्भयोर्भिन्नार्थत्वम्

यतो 'लभ' 'लम्भ' इति स्वतन्त्रौ धातू स्तः, अतोऽनयोरर्थेऽपि पार्थक्येनावश्यं भाव्यम् । अस्यार्थभेदस्य संपुष्टिः चरकसंहितायाः पूर्वोद्धृते (पृष्ठ ५७) आदिकाले पशवः समालभनीया बभूवुः, नालम्भाय प्रक्रियन्ते स्म' इति वाक्येनापि भवति । यद्युभयोरेकार्थोऽभविष्यत् तर्हि द्वयोः क्रिययोः पृथक्-

---

१. वैदिकग्रन्थेषु आलम्भ्या पदमन्तस्वरितं दृश्यते । कृदुत्तरपदप्रकृतिस्वरेण (द्र०—अष्टा० ६।२।१३९) ण्यति प्रत्ययेऽयं स्वर उपपद्यते । नुमागमात् प्राक् लभधातोरदुपधत्वात् पोरदुपधात् (अष्टा० ३।१।९८) सूत्रेण यत्प्रत्ययेन भाव्यम् । यति तु आलभ्या इति स्वरेण भाव्यम् । अतो लभेर्ण्यत्प्रत्ययस्योपपत्तये काशिकाकारेण प्रत्ययोत्पत्तेः प्राक् नुमागमस्य कल्पना कृत्वा अदुपधत्वाभावात् ऋहलोर्ण्यत् (अष्टा० ३।१।१२४) इति सूत्रेण ण्यतः प्राप्तिरुक्ता (द्र०—काशिका ७।१।६५) । लम्भरूपप्रकृत्यन्तरस्वीकारे नास्ति कापि क्लिष्टकल्पनाया आवश्यकता ।

२. द्र०—काशकृत्स्नधातुव्याख्यानम्, पृष्ठ ९४, ५९ । अयं ग्रन्थोऽस्माभिश्चन्नवीरकृतायाः कन्नडटीकायाः संस्कृतरूपान्तरं कृत्वा प्रकाशितः ।

प्रयोगो नाभविष्यत् । काशकृत्स्नधातुपाठे तु उभयोः पृथगर्थौ विनिर्दिष्टौ इति पुरस्तान्निदर्शितम् ।

लभधातोरर्थाः—१. प्राप्तिः—काशकृत्स्नपाणिनीयधातुपाठयोः लभधातोः प्राप्त्यर्थो निर्दिष्टः—**डुलभष् प्राप्तौ** (काश० १।५६४; पाणि० १।७०२) ।

२. स्पर्शः—उपनयने विवाहे च **दक्षिणांसमधि हृदयमालभते** (पार० गृह्य १।१।८) वाक्ये स्पर्शार्थ एव सर्वैर्व्याख्यातृभिरास्थीयते । सुश्रुतेऽपि **आलभेतासकृद् दीनः करेण च शिरोरुहान्** (कल्पस्थान १।१६) इत्यत्र स्पर्शार्थे एव प्रयुज्यते ।

३. नियोजनम्—महीधरेण शुक्लयजुषः २४।२० मन्त्रस्य व्याख्याने **आलभते नियुनक्ति** इत्यर्थो विहितः ।

४—हिंसनम्—वैखानसश्रौतसूत्रे **आलभ्यः** पदं 'वध्यः' इत्यर्थे त्रिः प्रयुक्तः । यथा—**दीक्षितस्याग्नीषोमीयः पशुरालभ्यः** (१४।१४।१); **अथाग्नेयः पशुरेकोऽग्निष्टोम आलभ्यः** (१५।१।१); [उक्थ्ये] **द्वितीयः पशुरैन्द्राग्नस्वनीय आलभ्यः** (१७।१।४) ।

लम्भधातोरर्थाः—१. हिंसनम्—पूर्वत्र (पृष्ठ ५७) निर्दिष्टे चरकसंहिताया वचने **नालम्भाय प्रक्रियन्ते स्म** इत्यत्र हिंसार्थे प्रयुज्यते ।

२. स्पर्शः—क्वचिद् आङ्पूर्वो लम्भधातुः स्पर्शार्थे प्रयुज्यते यथा—

कुमारं जातं···पुरा अन्यैरालम्भात् ॥ आश्व० गृह्य ॥

स्त्रीप्रेक्षणालम्भने मैथुनशङ्कायाम् ॥ गौतमधर्म० २।२२॥

३. प्राप्तिः—निरुक्ते **नामधेयप्रतिलम्भमेकेषाम्** (१।१४) कठोपनिषदि (१।१।२५) च **महीदृशा लम्भनीया मनुष्यैः** इत्यत्र लम्भेः प्राप्त्यर्थे प्रयोगो दृश्यते ।

४. धारणम्—काशकृत्स्नीये धातुव्याख्याने (१।३६२) लभि=लम्भधातोः धारणमर्थो निर्दिष्ट इति पूर्वमुक्तम् ।

एतैः प्रयोगैरेतावत् स्पष्टम् यद् आलभ-आलम्भयोरुभयोः स्पर्शार्थः समानः । आलभधातुस्तु केवलं वैखानसश्रौतसूत्रेष्वेव हिंसार्थे प्रयुक्त उपलभ्यते, नान्यत्र । आलम्भस्य स्पर्शार्थे प्रयोगदर्शनाद् **आलम्भ्या गौः, आलम्भ्या वडवा** प्रभृतिषु मूलतः स्पर्शार्थ एव स्यादिति संभाव्यते । उत्तरकालिकैर्व्याख्याकारैर्लेखकैश्च **आलभ-आलम्भौ** समानार्थकाविति मत्वा **आलभते आलभेत** पदयो-

हिंसार्थः स्वीकृतः। अस्मन्मते तु 'आलभ' इत्यस्य हिंसार्थः सर्वथाऽप्रामाणिक एव।

'घ्नन्ति'पदस्य प्रयोगः, तस्यार्थश्च

ब्राह्मणग्रन्थेषु **घ्नन्ति वा एतत् पशून्** इति प्रयोगमुपलभ्यानेके व्याख्यातारो **मारयन्ति हिंसन्ति** इत्येवमर्थं व्याचक्षते। तदसत्। हन्धातोः हिंसा गतिश्चार्थ इति शास्त्रकारा आहुः। हनधातुर्हिंसार्थ एव प्रयुज्यते न गतौ,[1] इत्याग्रहवशादेव 'घ्नन्ति'पदस्य 'हिंसन्ति' प्राणैर्विमोचयन्ति अर्थं मन्यन्ते याज्ञिकाः। सत्येवं **घ्नन्ति वा एतत् सोमं यदभिषुण्वन्ति, यज्ञं वा एतद् घ्नन्ति** (मै० सं० ४।८। ३) इत्यस्मिन् वाक्ये 'घ्नन्ति'पदस्य 'प्राणैर्विमोचयन्ति' इत्यर्थस्तु न कथमपि सम्भवति। गतेस्त्रयोऽर्था मन्यन्ते वैयाकरणाः—**ज्ञानं गमनं प्राप्तिश्च**। **घ्नन्ति यज्ञम्** इत्यत्र प्राप्त्यर्थ एव। ये सोमं घ्नन्ति कुट्टयन्ति तस्य रसं निस्सारयन्ति ते यज्ञं प्राप्नुवन्ति।

मेध-शब्दार्थ-विचारः

पशुयज्ञेषु **पुरुषमेधः अश्वमेधः गोमेधः अविमेधः अजमेधश्च** प्रमुखाः सन्ति। एषामन्ते मेधधातोर्निष्पन्नो मेधशब्दः श्रूयते। मेधृधातोरपि द्वावर्थौ—हिंसनं संगमनं च) तदुक्तम्—**मिदृ मेदृ हिंसायाम्, मेधृ संगमे च** (पा० धातु० १। ६०९, ६११)। पुरुषमेधादिषु मेधशब्दस्यार्थः संगमनमेव, न हिंसनम्। यत एषां पुरुषादीनां वेदे हिंसायाः साक्षात् प्रतिषेधाद् अस्मिन् विषये सप्रमाणमग्रे वक्ष्यामः।

पुरुषमेधादिषु विचारात् पूर्वं मन्त्रोक्तानाम् **अग्नि-वायु-सूर्य**-पशुभिः सम्पद्यमानानां यज्ञानां विषये विचारः क्रियते—

अग्निपशोरालभनं तेन यजनं च

शुक्लयजुषः त्रयोविंशस्याध्यायस्य सप्तदशे मन्त्रे श्रूयते—**अग्निः पशु-**

---

१. तथा चाह भामहः—'तुल्यार्थत्वेऽपि हि ब्रूयात् को हन्ति गतिवाचिनम्' (अलङ्कार ६।२४)। 'कुब्जं हन्ति कृशोदरी। अत्र हन्तीति गमनार्थे पठितमपि न तत्र समर्थम्' (साहित्यदर्पण परि० ७; काव्यप्रकाश उल्लास ७)। 'धातुप्रदीपस्य सम्पादकेन श्रीशचन्द्रचक्रवर्तिना हन्तेर्गत्यर्थे एकः प्रयोगो निर्दिष्टः—'भूदेवेभ्यो महीं दत्वा यज्ञैरिष्ट्वा सुदक्षिणैः। अनुक्त्वा निष्ठुरं वाक्यं स्वर्गं गन्तासि सुव्रत॥' धातुप्रदीप, पृष्ठ ७६, टि० २। हरयाणाप्रान्तस्य हिसार-मण्डलस्य स्थानीयभाषायां **'कठे हणसै'** इत्यादिषु हन्तिर्गत्यर्थेऽद्यापि प्रयुज्यते।

रासीत् तेनायजन्त। अस्यैव मन्त्रस्य तात्पर्यं स्पष्टीकर्तुं यास्केन एकं ब्राह्मण-वचनमुद्धृतम्—**अग्निः पशुरासीत् तमालभन्त तेनायजन्त इति च ब्राह्मणम्**[1] (निरुक्त १२।४१)।

अस्य अग्निरूपस्य पशोर्देवैरालभनं कृत्वा कथं यजनं कृतमित्यस्य वर्णनम् ऋग्वेद इत्थमुपलभ्यते—

आपो ह यद् बृहती विश्वमायन् गर्भं दधाना जनयन्तीरग्निम्।
ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम॥
यश्चिदापो महिना पर्यपश्यद् दक्षं दधाना जनयन्तीर्यज्ञम्।
यो देवेष्वधि देव एक आसीत् कस्मै देवाय हविषा विधेम॥

ऋ० १०।१२१।७,८॥

अनयोर्मन्त्रयोरयमभिप्रायः—सर्गारम्भे यदा प्रकृतेर्विकारभूताभिर्बृंहतीभिरद्भिः (=वृद्धिगुणैः पञ्चतन्मात्रैः) यदा गर्भधारणं कुर्वतीभिः (महदण्ड-रूपे संघटन्तीभिः) अग्निरुत्पादितः, ततो देवानामेको असुः (=गतिमान्) महदण्ड उत्पन्नः। ता आपः (पञ्चतन्मात्राणि) स्वमहिम्ना दक्षं (अग्निं)[2] दधाना=धारयमाणा यज्ञम्[3] (=महदण्डम्) उत्पादयन्त्यः पर्यपश्यन्[4]। यो देवेष्वधिदेवः[5] (=महादेवः) आसीत्, तस्मै कस्मै प्रजापतये[6] देवाय हवि-

---

१. द्र०—ऐ० ब्रा० १।१६॥

२. उद्धृतयोर्मन्त्रयोः **गर्भं दधाना जनयन्तीरग्निम्' 'दक्षं दधाना जनयन्ती-र्यज्ञम्'** इत्यनयोश्चरणयोः प्रथमे चरणेऽग्नेर्गर्भरूपेण धारणस्य निर्देश उपलभ्यते, द्वितीये चरणे स एव गर्भस्थोऽग्निः 'दक्ष' इत्युक्तः। **दक्ष वृद्धौ शीघ्रार्थे च** (धातु० १।४०३), **दक्ष गतिहिंसनयोः** (धातु० १।५२१), **दक्षतेरुत्साहकर्मणः, दक्षतेः** इति च निरुक्तम् (१।७)।

३. इह यज्ञशब्देन हिरण्यगर्भरूपो प्रजापतिः विराट्पुरुष इत्यादिरनेकै-र्नामभिः स्मृतः महदण्डोऽभिप्रेतः।

४. इह 'पर्यपश्यन्' क्रियाया भावोऽपां कारणरूपात् कार्यरूपे परिणतिमात्रे द्रष्टव्यः। 'अचेतनेष्वपि चेतनवदुपचारः' इति न्यायेन दर्शनक्रियायाः प्रयोगो ज्ञेयः।

५. महदण्डस्योत्पत्तेः प्राक् पञ्चमहाभूतानां पञ्चतन्मात्ररूपाणि सूक्ष्म-तत्त्वानि उत्पन्नान्यभूवन्। द्र०—प्रशस्तपादभाष्ये सर्गप्रकरणम्। **महदादयो विशेषान्ता अण्डमुत्पादयन्ति वै** (वायुपु० ४।७४)।

६. **प्रजापतिर्वै कः**। ऐ० ब्रा० २।३८; कौ० ब्रा० ५।४॥

प्रदानरूपेण कर्मणा अर्थात् सहयोगेन महदण्डरूपं कार्यं सम्पादयामः।

अद्भिः संघटिते महदण्डे पञ्चमहाभूतेषु प्रथमं पञ्चतन्मात्रस्थाद्=अग्नेः सूक्ष्मरूपाद् अग्निः प्रादुर्बभूव। अवशिष्टानि तन्मात्राणि तैश्च उत्पन्ना महाभूतास्तस्याग्नेः सहयोगं कृतवन्तः। अनेनैव सहयोगेन प्रजापतिरूपिणि महदण्डे ग्रहोपग्रहाणां निर्माणमभूत्। अस्या एव सर्ग-प्रक्रियाया वर्णनं **यज्ञेन यज्ञमयजन्त देवाः** (यजुः ३१।१६; ऋ० १०।९०।१६) इत्यृक् विदधाति। अयं यज्ञसंज्ञको महदण्डः सर्वहुत् आसीत्—**तस्माद् यज्ञात् सर्वहुतः** (यजुः ३१।६; ऋ० १०।९०।८) इति। अयमेव वेदे **विश्वकर्मा**[1] इत्युक्तः (द्र०—ऋ० मं० १०, सू० ८१)।

महदण्डे ग्रहोपग्रहाणां निर्मितिकाले दैवीभिः शक्तिभिः पूर्वतो विद्यमानस्याग्नेः पुनरालभनं विहितम्। तथा सति सोऽग्निः मुख्यरूपेण द्यु-अन्तरिक्ष-पृथिवीस्थानेषु विभज्य (रूपान्तरं कृत्वा) स्थापितः। अस्य वर्णनमप्युग्वेदे (१०।८८।१०) इत्थमुपलभ्यते—

स्तोमेन हि दिवि देवासो अग्निमजीजनञ्छक्तिभिः रोदसिप्राम्।
तमू अकृण्वन् त्रेधा भुवे कं स ओषधीः पचति विश्वरूपाः॥

अर्थाद् भौतिका देवाः स्वसामर्थ्येन दिवि रोदसिप्रां (=द्युलोक-पृथिवी[2]-लोकयोर्व्यापकं) अग्निमजीजनन्, तं सुखप्रदायकमग्निं (=पृथिव्यामन्तरिक्षे दिवि च स्थापनाय त्रेधा विभक्तवन्तः[3]) स विश्वरूपा ओषधीः (=ओषमग्निं दधानान् महदण्डस्थान् ग्रहोपग्रहरूपान् अवयवान्) पचति (=पाकेन समर्थयति)।

---

१. विश्वकर्मा भौवनः सर्वमेधे सर्वाणि भूतानि जुह्वाञ्चकार। स आत्मानमप्यन्ततो जुह्वाञ्चकार।...'विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम्' (ऋ० १०।८१।६) इति। निरुक्तम् १०।२६॥

२. पृथिवीपदं महदण्डे विकस्यमानानां स्वप्रकाशरहितानां ग्रहोपग्रहाणाम् उपलक्षकम्। **सूर्याचन्द्रमसौ धाता.....। दिवं च पृथिवीं चान्तरिक्षमथो स्वः** इति ऋङ्मन्त्रस्य प्रथमचरणे सूर्यपदं स्वयंप्रकाशकानां चन्द्रपदमुपग्रहाणामुपलक्षकः। उत्तरार्धे द्युपदं सूर्यस्य बाह्यपरिधेः, पृथिवीपदं स्वप्रकाशाभाववतां ग्रहाणाम्, अन्तरिक्षपदं ग्रहोपग्रहाणां मध्ये वर्तमानस्यावकाशस्य, स्वःपदम् आकर्षणादिबन्धनरहितानां गतिशीलानां उल्कादीनाम् उपलक्षकं विज्ञेयम्।

३. तमकुर्वंस्त्रैधाभावाय। पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः (निरु०

अस्याग्नेः प्रादुर्भावात् महदण्डस्था ग्रहोपग्रहा यदा स्वस्वरूपधारणे समर्था अभूवन् तदाऽयं महदण्डोऽग्नेस्तापेन सहस्रांशुसमप्रभोऽभूद् अर्थात् हिरण्मयोऽभूत्। इदमेवाग्नितत्त्वं सृष्टेरुत्पत्तौ स्थितौ च अतितरां कारणं भवति। सर्वे देवा अनेनैवानुप्राणिता भवन्ति। अत एव ऋग्वेदेऽभिहितम्—

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत।
स देवाँ एह वक्षति ॥१।१।२॥

अर्थाद् अग्नेः पूर्वमुत्पन्ना ऋषयः प्राणस्वरूपा भौतिकशक्तय उत नूतना अग्नेः पश्चादुत्पन्ना ऋषयोऽमुमग्निमेव स्तुवन्ति तदनुकूलम् आचरन्ति। स एवाग्निः सर्वानपि देवान् भौतिकान् तत्त्वान् सर्गाय यथास्थानं वक्षति=प्रापयति। यथावन्निर्माणाय प्रयतत इति।

वायुपशोरालभनं तेन यजनं च

यजुषः त्रयोविंशस्याध्यायस्य सप्तदशे मन्त्रे पठ्यते—**वायुः पशुरासीत् तेनायजन्त**। अस्मिन् मन्त्रे सृष्टियज्ञे वायुपशुना यजनमुक्तम्। वायुपशोः प्रथममालभनं महदण्डे सौरमण्डलस्य अङ्गप्रत्यङ्गरूपाणां भागानां निर्माणाय यथास्थं नं प्रापणायाभूत्। यथा गर्भे एक एव प्राणवायुः दशधा विभक्तः सन् शरीरावयानां निर्माणे सहयोगं ददाति, तथैव महदण्डेऽपि ग्रहोपग्रहाणां निर्माणाय पार्थक्याय च एक एव वायुरनेकधा विभज्य सहभावमापद्यते। अत एव ऋग्वेद उक्तम्—

वायवा याहि दर्शतेमे सोमा अरंकृताः।
तेषां पाहि श्रुधि हवम् ॥ १।२।१॥

सर्गायोन्मुखीभूता भौतिकशक्तयो ब्रुवन्ति—हे दर्शत ! दर्शनीयवायो त्वमायाहि। त्वदर्थमिमे सोमाः सर्जनसमर्थानि तत्त्वानि अलंकृतानि सन्ति, तेषां पाहि तानि स्वान्तरे संगृहाण। अस्मदीयं हवं हवनीयं यजनीयं वचनं शृणु श्रुत्वा च सर्गाय प्रवृत्तो भव। [अत्र **'अचेतनेष्वपि चेतनवदुपचारा भवन्ति'** इति न्यायेनाचेतनस्यापि वायोः संबोधनं द्रष्टव्यम्]।

वायु-पशोः पुनरालम्भनम्—जगतः सर्गकाले स्थितिकाले चाधिदैविकाः पशुयागाः प्रवर्तन्त एवेत्युक्तं प्राक्। वायुपशोः सर्गानन्तरमेकधा पुनरालभनम-

---

७।२८)। पृथिव्यां ज्वलनरूपेण, अन्तरिक्षे विद्युद्रूपेण, दिवि सूर्यरूपेणेति भावः।

भूत्। पृथिव्या दिवश्चान्तराले यो वायुरासीत् स कार्यभेदेन स्थानभेदेन वा(=सप्त परिवहभेदेन सप्ताकाशभेदेन वा) सप्तधा विभक्तः। अनन्तरं प्रतिविभागं (=प्रतिपरिवहं) वर्तमानो वायुः पुनः सप्तविभागेषु विभागमलभत। एते एकोनपञ्चाशद्विभागेषु विभक्ता वायवः (७×७=४९) मरुन्नाम्ना वैदिक-वाङ्मये प्रसिद्धाः—सप्त-सप्त हि मरुतां गणाः। शत० ९।३।१।२५॥

सूर्यपशोरालभनं तेन यजनं च

यजुषस्त्रयोविंशेऽध्याये सप्तदशे मन्त्रे श्रूयते—सूर्यः पशुरासीत् तेनायजन्त इति। सूर्योऽत्रादित्यः। महदण्डस्य प्रभेदे यदा तदन्तर्गता ग्रहोपग्रहाः पक्षिणां शावका इव बहिर्निर्गताः, तदा इमे सर्वे लोकाः समीपमासन्। शनैः शनैरेते परस्परतो दूरं गताः। पृथिव्या आदित्यस्य च यत्सामीप्यमासीत् तस्य वर्णनं मन्त्रेषु ब्राह्मणेषु च बहुत्रोपलभ्यते[1]। कालान्तरे आदित्योऽग्नेः प्रबलस्य च वायोः सहयोगेन दोलेव पृथिव्या दूरं गतः। अत्रान्तरे स आदित्योऽनेकवारं दोलेव पृथिव्याः समीपमागतो दूरं च गतः। तैत्तिरीयसंहितानुसारं त्रिवार-मित्थमभवत्, अन्ते च आदित्यः स्वस्थाने स्थितिमलभत[2]। आदित्यस्य इत्थं सरणेन (=दूरं गमनेन) एवादित्यः सूर्यनाम्ना प्रसिद्धिं गतः—सूर्यः सरतेर्वा (निरु० १२।१४)।

इत्थं यदा सूर्यः स्वस्थाने स्थितिमलभत, तदनन्तरं यथा विलीनस्य लोह-स्योपरि कृष्णवर्णं किट्टं समुत्पद्यते, तथैव सूर्यस्य जाज्वल्यमाने भागे किट्टं समुदपद्यत। तेन सूर्यस्य प्रकाशोऽवरुद्धोऽभूत्। तैत्तिरीयसंहितानुसारं सूर्यस्येयम-वस्था स्वर्भानु[3]नाम्नाऽसुरेणोत्पादिता। तदुक्तम्—स्वर्भानुरासुरः सूर्यं तमसा-

---

१. 'जामी सयोनी मिथुना समोकसा' ऋ० १।१५६।४॥ 'द्यावापृथिवी सहास्ताम्'। तै० सं० ५।२।३।३; तै० ब्रा० १।१।३।२॥ 'सह हैवेमावग्रे लोका आसतुः'। शत० ७।१।२।२३॥

२. आदित्या वा अस्माल्लोकादमुं लोकमायन्, तेऽमुष्मिंल्लोके व्यतृष्यन्त, इमं लोकं पुनरभ्यवेत्य···सुवर्गं लोकमायन्। तै० सं० १।५।४।४-५॥ आदित्यो वा अस्माल्लोकादमुं लोकमेत्, सोऽमुं लोकं गत्वा पुनरिमं लोकमभ्यध्यायत्··· सोऽग्निमस्तौत्। स एनं स्तुतः सुवर्गं लोकमगमयत्। तै० सं० १।५।६।४॥ अग्नेः स्तुत्या सूर्यस्य स्वर्गमनविषये दूरगमनविषये वा द्रष्टव्यम्—तै० सं० २।५।८।१-२; ५।१।५।८॥ शत० ब्रा० १।४।१।२२॥

३. स्वः सूर्यस्य भां प्रभां नुदति अपसारयति इति स्वर्भानुः (द्र०—सायण-

ऽविध्यत् (२।१।२।२)। सूर्यस्योपरि यन्मलं प्रादुर्भूतमासीत् तं दोषं दैव्यः शक्तयः चतुश्चरणेषु अपाकर्षुः। तदुक्तम्।

'तस्मै देवाः प्रायश्चित्तिमैच्छन्। तस्य यत् प्रथमं तमोऽपाघ्नन् सा कृष्णाऽविरभवत्, यद् द्वितीयं सा फल्गुनी, यत् तृतीयं सा बलक्षी, यदध्यस्थाद् अपाकृन्तन् साऽविर्वशा समभवत्'। तै० सं० २।१।२।२॥

[एत्सदृश एव पाठो मैत्रायणीसंहितायां (२।५।२) काठकसंहितायां (१२।१३) चोपलभ्यते]।

अस्यायमभिप्रायः—स्वर्भानुनामासुरो यदा सूर्यं तमसाऽऽच्छादयत् तदा देवास्तस्यावरणस्य प्रायश्चित्तिम् (=दोषनिवृत्तिम्) ऐच्छन्। ते देवा यदा प्रथमवारं तमोऽपाघ्नन् तदा कृष्णवर्णा अविरभूत्, यदा द्वितीयवारं तमोऽपाघ्नन् तदा रक्तवर्णा[1]ऽविरभूत्, यदा तृतीयवारं तमोऽपाघ्नन् तदा श्वेतवर्णा (=धूसरवर्णा) अविरभूत्, यदा चतुर्थवारं सूर्यस्य अस्थ उपरिष्टात्[2] तमोऽपाघ्नन् तदा वशा अविरभूत्।

प्रकृते स्वर्भानुनाम्नासुरेण सूर्ये तमस आरोपणं, तस्यापाकरणम्, अपाकरणेन कृष्णादिवर्णवत्यवीनां प्रादुर्भाव इत्यादि यदुक्तं तदालङ्कारिकं वर्णनं ज्ञेयम्। अत्र सर्गावस्थायां सूर्यस्योपरि प्रादुर्भूतानाम् आवरकरूपाणां किट्टानामनेकधा अपाकरणस्य निर्देश एव तात्पर्यं द्रष्टव्यम्। सूर्ये सम्प्रत्यपि कृष्णवर्णाः पृषत्यो विद्यमानाः सन्ति।[3]

प्रकृते वचने यस्या अवेः प्रादुर्भाव उक्तः, सा न चतुष्पदा प्राणिविशेषा, अपि तु पृथिव्येव ज्ञेया।

भाष्यमत्रस्थम्)। आसुरः=असुर एवासुरः, प्रज्ञादित्वाद् (अष्टा० ५।४।३८) अण्। असुरस्यापत्यमासुरः, शिवादित्वाद् (अष्टा० ४।१।११२) अण् इति भट्टभास्करः।

१. फल्गुनी=नीलवर्णेति भट्टभास्करः, लोहितवर्णेति सायणः। मैत्रायणसंहितायां (२।५।२) फल्गुनीस्थाने 'लोहिनी' पठ्यते।

२. अध्यस्थात् अस्थिभ्यः।.....अध्यस्थादिति विभक्त्यर्थेऽव्ययीभाव इति भट्टभास्करः। मैत्रायणसंहितायाम् (२।५।२) 'अध्यस्तात्' पाठः।

३. 'असावेव संवत्सरो योऽसौ तपति। तस्य यद् भाति तत् संवत्, यन्मध्ये कृष्णं मण्डलं तत्सर इत्यधिदैवतम् इति। जै० ब्रा० २।२८॥

सूर्यस्य प्रकाशावरोधकं यदावरणमासीत् तदत्यन्तं घनीभूतमासीत् । तदवस्थायां प्रकाशस्य सर्वथाभावात् पृथिव्यादिलोका दृश्यावस्थायां नासन् अर्थादन्धे तमसि वर्तमाना आसन् । प्रथमवारं यदा किञ्चित् सूर्यस्यावरणं नष्टं तदाऽत्यन्तं क्षीणप्रकाशत्वात् पृथिव्यादयो लोकाः कृष्णवर्णरूपेण दृश्या अजायन्त । द्वितीयवारं यदा पुनः किञ्चिदावरणं दूरीभूतं तदा सूर्याद् यः प्रकाशो दृश्यतां गतः स रक्तवर्ण इवाभूत्, तेन पृथिव्यादयो लोका अपि रक्तवर्णरूपेण दृश्याः समपद्यन्त । यदा तृतीयवारं पुनः किञ्चिदावरणम् अपगतं तदा प्रकाशस्य मात्राया आधिक्यात् पृथिव्यादयो लोकाः श्वेतवर्णत्वेन=धूसरवर्णत्वेन दृश्या अभूवन् । यदा चतुर्थवारम् अवशिष्टं सर्वमावरकं विनष्टं तदेयम् अविः= पृथिवी वशा आसीत् । वशाशब्दस्यार्थोऽनुपदमेव **'वशाया अवेरालभनम्'** इति प्रकरणे वक्ष्यते ।

यद्यप्यस्मिन् काले प्राणिजगन्नासीद् अतः पृथिव्या उक्तानां विभिन्नस्थितीनां द्रष्टाऽपि कश्चिन्नासीत् । अत उक्तवचने याः पृथिव्या विशिष्टोपलब्धिदशा वर्णिताः, तास्तादृशोपलब्धिशक्त्यवच्छिन्नपदार्थस्वरूपवर्णनपरा विज्ञेयाः ।

स्वर्भानुनाम्नासुरेण सूर्यस्य तमसाऽऽच्छादनस्य, तमस आवरणस्य अपाकरणस्य च निर्देश ऋग्वेदे (५।४०।५-९)ऽप्युपलभ्यते । अत्र षष्ठे मन्त्रे इन्द्रद्वारा त्रिवारं[1] तमस आवरणस्य दूरीकरणं वर्णितम्,चतुर्थवारम् अत्रिद्वारा । अष्टमे मन्त्रेऽत्रिद्वारा सूर्ये चक्षुषः (=प्रकाशकस्य तेजसः) आधानम्, स्वर्भानोर्मायाया अपाकरणस्योल्लेखोऽस्ति । मन्त्रपाठ इत्थं वर्तते—

अत्रिः सूर्यस्य दिवि चक्षुराधात् स्वर्भानोरपमाया अधुक्षत् ।

जैमिनिब्राह्मणे श्रूयते—**स्वर्भानुरासुर आदित्यं तमसाऽविध्यत् । तद् देवाश्चर्षयश्चाभिषज्यन् । तेऽत्रिमब्रुवन्नृषे त्वमिदमपजहि** (१।८०) इति ।

ऋग्वेदे जैमिनिब्राह्मणे च निर्दिष्टोऽत्रिः किं भौमः (=भूमेः पुत्रः) अग्निरभिप्रेतः ? सूर्यस्य तमसोऽपवारणे भौमाग्नेः कीदृशः सहयोग आसीदिति विचारणीयम् ।

तैत्तिरीयसंहितायाः २।१।२।१; २।१।८।१; २।२।१०।१ इत्यादिषु

---

१. मन्त्रे साक्षात् त्रिवारं तमसोऽपनोदनस्योल्लेखो नास्ति, तथापि **तुरीयेण ब्रह्मणाविन्ददत्रिः** (ऋ० ५।४०।६) इत्यत्र तुरीयपदनिर्देशाद् अत्रेः पूर्वमिन्द्रेण त्रिवारं तमो दूरीकृतमिति विज्ञायते ।

असावादित्यो न व्यरोचत इत्युक्त्वा तस्य रोचनायानेके निर्देशा उपलभ्यन्ते। एतस्मिन् विषये सायणाचार्येणोक्तम्—'**आदित्यविषये बहवः प्रायश्चित्तयः कल्पयुगादिभेदेन व्यवस्थापनीयाः** (तै० सं० भाष्य २।१।८) इति।

वशाया अवेरालभनम्

यद्यपि प्रस्तूयमाणे वशाया अवेरालभनविषये विचारः पुरुषमेधादीनां प्रधानानां पञ्चपशुयागानां प्रकरण एव कर्तुं योग्यस्तथापि सूर्यपशोरालभनप्रकरणे यस्या वशाया अवेः प्रादुर्भाव उक्तः, तस्या आधिभौतिकं स्वरूपमत्यन्तं विस्पष्टमिति कृत्वैहैव वशाया अवेरालभनविषये विचारः क्रियते—

अविर्नाम लोके मेष्याः प्रसिद्धः। **अविमेधस्यापि** वर्णनं वैदिकग्रन्थेषूपलभ्यते। मेध इति यज्ञनाम। मेधशब्दस्यार्थो व्युत्पत्तिश्च पूर्वमुक्ता (पृष्ठ ६१)।

पूर्वत्र (पृष्ठ ६५-६६) तैत्तिरीयसंहिताया यद् वचनमुद्धृतम्, तस्मिन् स्वर्भानुनाम्नाऽऽसुरेण आदित्यस्य तमसाऽवृतकरणं, तदपाकरणं चोक्तम्। तत्र अस्य उपरिष्टाद् भागात् तमसोऽपाकरणे वशाया अवेः प्रादुर्भावः श्रूयते। तदग्रे तैत्तिरीयसंहितायामित्थं पठ्यते—

सावित्रवंशा समभवत्। ते देवा अब्रुवन् देवपशुर्वा अयं समभूत्। कस्मा इममालप्स्यामह इति। अथ वै तर्ह्यल्पा पृथिव्यासीत्। अजाता ओषधयः। तामेव वशामादित्येभ्यः कामायाऽलभन्त, ततो वा अप्रथत पृथिवी, अजायन्त ओषधयः। तै० सं० २।१।२।३॥

अस्मिन् वचने प्रादुर्भूताया वशाया अवेर्देवपशुत्वमुक्तम्। तदानीमेषा पृथिव्यल्पाऽऽसीत्। अस्या उपरि ओषधीनामुत्पत्तिर्नाभूत्। तां तथाभूतां पृथिवीं 'तामेव वशामादित्येभ्यः कामायालभन्त,' ततः साऽविः (=अल्पा पृथिवी) प्रथनात् पृथिवी बभूव। ओषधीनां प्रादुर्भावाच्च तस्या वशात्वमपगतम्।

मैत्रायणसंहितायाम् इत्थं श्रूयते—

अथवा इयं तर्हि ऋक्षाऽऽसीद् अलोमिका। ते अब्रुवन् तस्मै कामायालभामहै, यथाऽस्यामोषधयो वनस्पतयश्च जायन्ता॥ मै० सं० २।५।२॥

अस्मिन् पाठे पृथिवी 'ऋक्षा अलोमिका' उक्ता, तस्या उपरि वनस्पतीनामोषधीनां च प्रादुर्भावकामनया तस्या आलभनमुक्तम्।

यद्यप्युभौ पाठौ समानार्थकौ प्रतीयेते, तथापि सूक्ष्मेक्षिकया दर्शनेऽनयोः स्वल्पो भेदोऽवगम्यते। स च भेदः **'ऋक्षा, ओषधयः, वनस्पतयः'** पदैः प्रकटी भवति। तैत्तिरीयसंहितायां **'वशा'** इत्युक्तम्। तस्यायं भावस्तदानीं पृथिव्या उपरि घास-तृणादीनामपि प्रादुर्भावो नैवाभूत्। यदा घास-तृणादयः समुत्पन्ना तदा सा पृथिवी लोमिका=रोमवती अजनि। ओषधीनां लक्षणम् **ओषध्यः फलपाकान्ताः** इत्युक्तम्। अर्थाद् याः फलपाकानन्तरं स्वयं नश्यन्ति ता **ओषधय** उच्यन्ते। एतल्लक्षणानुसारेण घास-तृणादीनामपि ओषधिष्वेवान्तर्भावो भवति। यदेयं पृथिवी घास-तृणादिभिः संपूरिता तदेयम् **ऋक्षा** अभवत्। 'ऋक्ष'शब्दो लोके 'भालू'नामके हिंस्रे पशौ प्रसिद्धः। तस्य समस्तेष्वङ्गेषु दीर्घाणि लोमानि भवन्ति। तत्सादृश्यात् तादृशी पृथिवी 'ऋक्षा' उक्ता। फलवन्तो वृक्षा वनस्पतय उच्यन्ते —**फली वनस्पतिर्ज्ञेयः** इति। यदेयं पृथिवी **ऋक्षा** आसीत् तदानीं वनस्पतीनां प्रादुर्भावो नैवाभूत्। ऋक्षावस्थायाः पृथिव्या उपरि वनस्पतीनां प्रादुर्भावोऽभूत्। एवं पृथिव्या अलोमिका=तृणादिरहिता, सलोमिका=तृणादियुता ये द्वे अवस्थे निर्दिष्टे, तयोः प्रथमावस्था तैत्तिरीयसंहितायां वशाशब्देन वर्णिता, द्वितीयावस्था च मैत्रायणसंहितायां ऋक्षाशब्देन। जैमिनिब्राह्मणे द्वे अप्यवस्थे एकीकृत्योक्ते—**ओषधिवनस्पतयो वा लोमानि** (२।५४) इति।

अजा वशा—तैत्तिरीयसंहितायां वशारूपाया अजाया यागस्य वर्णनमुपलभ्यते —**सा वा एषा सर्वदेवत्या यदजा वशा, वायव्यामालभेत भूतिकामः** (३।४।३।२) इति।

वशा अविः, वशा अजा—अनयोर्भेदः—'वशा अविः' शब्दाभ्यां पृथिव्याः साऽवस्था उक्ता यदेयं पृथिवी पिलिप्पिला (=पिलपिली) अभूत्—**अविरासीत् पिलिप्पिला** (यजुः २०।१२) इति। तदानीम् ओषधीनां प्रादुर्भावाभावात् सा वशा=वन्ध्याऽऽसीत्। 'वशा अजा' शब्दाभ्यां पृथिव्याः साऽवस्था वर्णिता यदेयं दृंहिता सती स्वकक्षायां अजा=[1]गतिमत्यभूत्। तस्यामवस्थायामपि ओषधीनां प्रादुर्भावाभावात् सा वशैवाऽभूत्।

अवेरनेकवारम् आलभनम्

तैत्तिरीयमैत्रायणसंहितयोर्यौ पाठौ पुरस्तादुद्धृतौ, तयोर्वशाया अवेः ऋक्षायाश्चावेर्द्विवारमालभनमुक्तम्। यदेयं पृथिवी वशा अविरासीत् तदेयम् **अविरासीत् पिलिप्पिला** (यजुः २०।१२) वचनानुसारं पिलिप्पिला (पिलपिली)

---

१. 'अज गतिक्षेपणयोः' (धातु० १।१३९)।

अकठोराऽऽसीत् । यदेयं पृथिवी ऋक्षा अविरूपाऽऽसीत्, तदानीमस्या उपरि ओषधिरूपाणि लोमान्युत्पन्नानि । अत एवेयं यजुषि (१३।५०) ऊर्णायुशब्देनोक्ता ।

अस्या वशाविरूपायाः पृथिव्या अनेकवारमालभनमभूत् । यजुषस्त्रयोदशाध्यायस्य सप्तदशे मन्त्रे भूः, भूमिः, अदितिः, विश्वधा, पृथिवी पदैः पृथिव्याः पञ्च विभिन्ना अवस्था वर्णिताः । पृथिव्यवस्थानन्तरमस्यां दृंहणमभूत्—पृथिवीं दृंह (यजुः १३।१८) पृथिव्यां दृंहणं शर्करोत्पत्यनन्तरमजायत । अत एवोक्तम्—

'शिथिरा वा इयमग्र आसीत् तां प्रजापतिः शर्कराभिरदृंहत्' ।
मै० सं० १।६।३॥

'आर्द्रेव हीयमासीत् तां देवाश्शर्कराभिरदृंहन् तेचोऽग्ना अवदधुः' ।
काठक सं० ८।२॥

सलिलावस्थात आरभ्य पृथिव्यां सुवर्णोत्पत्तिपर्यन्तमस्या नववारमालभनमभूत् । पृथिव्या विभिन्नावस्थानां प्रक्रिया याज्ञिकग्रन्थेषु वेदिनिर्माणप्रक्रियया निदर्शिता । एतद्विषयेऽस्माभिः पूर्वत्र (पृष्ठ १९-२३) विस्तरेणोक्तम् ।

प्रसिद्धाः पशुयागाः

वैदिकवाङ्मये पुरुषमेध-अश्वमेध-गोमेध-अविमेध-अजमेधाख्याः पञ्च पशुयागा वर्णिता उपलभ्यन्ते । सम्प्रति एषां पशुयागानां सम्बन्धे विचार्यते—एते पशुयागाः किंस्वरूपाः ? पुरुषमेधादिषु निर्दिष्टाः पुरुषादयः पशवः प्राणिविशेषा एवाभिप्रेता उतैते सृष्टियज्ञे वर्तमानानां केषांचिद् आधिदैविकपदार्थानां प्रतिनिधिभूताः ? अपि च, किं पुरुषमेधादिषु द्रव्ययज्ञेषु पुरुषादीनां वधोऽभिप्रेतः ?

उक्तविषयेषु विचारात् पूर्वं पुरुषादिप्राणिनां सम्बन्धे वेदेषु किमुक्तमित्यस्य निदर्शनं संक्षेपेण प्रस्तूयते—

यज्ञीयानां पुरुषादीनां पञ्चपशूनां सम्बन्धे वैदिकी चोदना

अथर्ववेदे गवाश्वपुरुषा न केवलमहिंस्या एवोक्ता अपितु यस्तेषां वधकस्तस्य वधोऽप्यादिष्टः । तदुक्तम्—

यदि नो गां हंसि यद्यश्वं यदि वा पूरुषम् ।
तं त्वा सीसेन विध्यामो यथा नोऽसो अवीरहा ॥ अथर्व० १।१६।४॥

शुक्लयजुषस्त्रयोदशाध्यायेऽपि पुरुष-अश्व-गो-अविरूपाणां पशूनां हिंसा प्रतिषिद्धा । अत्र इदमपि ध्येयम्—यजुषोऽयमध्यायो याज्ञिकानां मतेऽग्निचयने विनियुक्तः । तथाहि—

इमं मा हिंसीद्विपादं पशुं सहस्राक्षो मेधाय चीयमानः । यजुः १३।४७॥

अश्वं जज्ञानं सरिरस्य मध्ये ।·····अग्ने मा हिंसीः परमे व्योमन् ।
यजुः १३।४२॥

इमं मा हिंसीरेकशफं पशुं कनिक्रदं वाजिनं वाजिनेषु । यजुः १३।४८॥

गां मा हिंसीरदितिं विराजम् । यजुः १३।४३॥

इमं साहस्रं शतधारमुत्सं·····। घृतं दुहानामदितिं जनायाग्ने मा हिंसीः परमे व्योमन् ॥ यजुः १३।४९॥

अविं जज्ञानां·····अग्ने मा हिंसीः परमे व्योमन् ॥ १३।४४॥

इममूर्णायुं वरुणस्य नाभिं त्वचं पशूनां द्विपदां चतुष्पदाम् ।

त्वष्टुः प्रजानां प्रथमं जनित्रमग्ने मा हिंसीः परमे व्योमन् ॥यजुः १३।५०।

एतैर्वेदप्रमाणैरिदं सुव्यक्तं भवति यद् वेदेषु पुरुषादीनां पशूनां हिंसा सर्वथा वर्जिताऽस्ति ।

सम्प्रति पुरुषमेधादियागानां सम्बन्धे क्रमशो विचारः क्रियते ।

पुरुषमेधे पुरुषालभनम्

शुक्लयजुषस्त्रिंशैकत्रिंशावध्यायौ पुरुषमेधे विनियुक्तौ स्तः । त्रिंशत्तमस्याग्निभिकाश्चत्वारो मन्त्राः सवितृदेवताकाः सन्ति । तेष्वाद्यैस्त्रिभिर्मन्त्रैस्तिस्रो घृताहुतयो विहिताः सन्ति । तदनन्तरम् पञ्चमकण्डिकात आरभ्य द्वाविंशतिकण्डिकापर्यन्तं विभिन्नकार्यकर्तॄणां विभिन्नाकारवतां च पुरुषाणां वर्णनमुपलभ्यते । अत्राऽऽहृत्य चतुरशीत्युत्तरशतं पुरुषाः परिगणिताः । अत्र ब्राह्मणराजन्यादयः पुरुषविशेषा द्वितीयविभक्त्यन्ताः पठ्यन्ते, तद्देवताश्च (याज्ञिकानां मतेन) चतुर्थ्यन्ताः[1] । आलभते क्रिया द्वाविंशत्यां कण्डिकायां निर्दिश्यते, तस्याः प्रतिवाक्यं सम्बन्धो भवति[2]—**ब्रह्मणे ब्राह्मणमालभते, क्षत्राय राजन्यमा-**

---

१. चतुर्थ्यन्ता देवताः, द्वितीयान्ताः पशवः । भट्टभास्करः तै० ब्रा० भाष्यम् ३।४।१ इत्यस्यारम्भे ।

२. तै० ब्राह्मणे (३।४।१-१९) अपीदं प्रकरणं पठ्यते । तत्र आलभते

लभते इत्येवमादि । श्रौतसूत्रेषु एषा चतुरशीत्युत्तरशतं पुरुषपशूनां यूपेषु बन्धनं निर्दिश्यते ।

ब्रह्मा यूपेषु नियुक्तान् पुरुषपशून् सहस्रशीर्षा इत्यनुवाकेन (यजुः अ० ३१। १-१६) स्तुत्वा अश्वमेधे यथा कपिञ्जलादीनाम् आरण्यानां पशुपक्षिणाम् उत्सर्जनमुक्तं (कात्या० श्रौत २०।६।९) तथैव ब्राह्मणादयोऽप्युत्सृज्यन्ते । तदुक्तम्—

नियुक्तान् ब्रह्माभिष्टौति होतृवदनुवाकेन सहस्रशीर्षेति ।
कपिञ्जलादिवद् उत्सृजन्ति ब्राह्मणादीन्[1] ।।
कात्या० श्रौत २१।१।११-१२।।

ब्राह्मणादीनाम् उत्सर्जने कृते यस्य पुरुषस्य या देवता मन्त्रे उक्ता तस्यै सकृद्गृहीतेनाज्येन यजन्ति । यथा ब्रह्मणे स्वाहा क्षत्राय स्वाहा । एता देवता आज्याहुतिभिरेव तृप्यन्ति इत्यप्युक्तम्—

तान् पर्यग्निकृतानेवोदसृजत् । तद्देवत्या आहुतिरजुहोत्, ताभिस्ता देवता अप्रीणात् । ता एनं प्रीता अपूणन् सर्वैः कामैः । शत० ब्रा० १३।६।२।१३।।

एता आज्याहुतय एकादशानाम् अनुबन्ध्यानां गवां यजनं कृत्वा[2] स्विष्टकृदाहुतेः पूर्वं दीयन्ते (द्र०—कात्या० श्रौत २१।१।१६) ।

पुरुषमेधस्यैकत्रिंशेऽध्याये निर्दिष्टो विराट् पुरुषः आधिदैवते (=सृष्टियज्ञे) महद्दण्डो वर्तते, अध्यात्मे च परमपुरुषो नारायणः ।

सम्प्रतीह पुरुषमेधस्य सम्बन्धे केचिद् विचारणीया विषयाः प्रस्तूयन्ते—

पुरुषमेधस्य प्रयोजनम्—कात्यायनश्रौतसूत्रे (२१।१।१) पुरुषमेधस्य प्रयोजनमित्थं निर्दिश्यते—**पुरुषमेधस्त्रयोविंशतिदीक्षोऽतिष्ठाकामस्य**[3] । अस्यायमर्थः—सर्वाणि भूतान्यतिक्रम्य तिष्ठत इत्यतिष्ठाः,तां कामयते इत्यतिष्ठाकामः। तस्य त्रयोविंशतिदीक्षो द्वादशोपसत्कः पञ्चसुत्यः, एवं चत्वारिंशदहोरात्रसाध्यः पुरुषमेधसंज्ञको यज्ञो भवति ।[4]

क्रियापदं प्रथमवाक्य एव पठ्यते—**ब्रह्मणे ब्राह्मणमालभते**·····। एतत्पाठानुसारेण आलभते क्रियायाः प्रतिवाक्यमनुषङ्गो ज्ञेयः ।

१. द्र०—शत० ब्रा० १३।६।२।१३।।
२. द्र०—शत० ब्रा० १३।६।२।१६।।
३. द्र०—शत० ब्रा० १३।६।१।१।।
४. द्रष्टव्या उक्तसूत्रस्य विद्याधरीया व्याख्या ।

पुरुषमेधानन्तरम् अरण्य प्रव्रजनम्—कात्यायनश्रौतसूत्र पुरुषमेधं विधायान्ते श्रूयते—

त्रैधातव्यन्ते समारोह्यात्मन्नग्नी सूर्यमुपस्थायाद्भ्यः सम्भूत इत्यनुवाकेनानपेक्षमाणोऽरण्यं गत्वा न प्रत्येयात् । ग्रामे वा विवसन्नरण्योः । कात्या० श्रौत २१।१।१७-१८॥

अनयोः सूत्रयोरयमभिप्रायः—त्रैधातवीमिष्टिं (कात्या० श्रौत १३।७।८) कृत्वा आत्मनि स्वशरीरेऽग्नी समारोप्य=ऊष्माणमास्ये कोष्ठे वा प्रवेश्य सूर्यमुपस्थाय पश्चादनवलोकयन् अरण्यं गत्वा ग्रामं नागच्छेत् । अथवा ग्राम एव वास करिष्यन् अरण्योरेवाग्नी समारोप्य सूर्यमुपस्थाय ग्रामं प्रत्यागच्छेत् (शत० १३।६।२।२०) ।

एवं पुरुषमेधानन्तरं अरण्ये प्रव्रजनम्, ग्रामं वा प्रतिनिवर्तनं द्वे पक्षे विहिते स्तः । केचन अरण्येप्रव्रजनस्य संन्यासं गृह्णीयादित्यर्थं मन्यन्ते । अत एव महीधर आह—**पुरुषमेधानन्तरं संन्यास एव** (यजुः महीधरभाष्य ३०।२२) ।

अत्रेदमप्यवधेयम्—पुरुषमेधस्यारम्भे सूर्यदेवताको होमो विहितः, अन्ते च सूर्योपस्थानम् (द्र०—कात्या० श्रौत २१।१।६,१७) ।

पुरुषमेधे विनियुक्तयोः ३०-३१ तमयोरध्याययोर्ऋषि-देवताः—यजुर्वेदस्य ३०-३१ तमयोरध्याययोर्ऋषिर्नारायणः । त्रिंशत्तमस्याध्यायस्य आद्यानां चतुर्णां (१-४) मन्त्राणां देवता **सविता**, ब्रह्मक्षत्रादयः चतुर्थ्यन्ता देवताः । उव्वटस्य मतानुसारेण एकत्रिंशत्तमाध्यायस्य **ऋषिर्नारायणः**[1] **पुरुषो देवता, १-२१ अनुष्टुप् छन्दः, २२ त्रिष्टुप्छन्दः । मोक्षे चास्य विनियोगः** । अस्याध्यायस्यारम्भे उव्वट आह—**अस्य भाष्यं शौनको नाम ऋषिरकरोत् ।.....सर्वमेतज्जनकाय मोक्षार्थं कथयामास ।**[2]

पुरुषमेधस्य निर्वचनम्—शतपथब्राह्मणे पुरुषमेधस्य निर्वचनमित्थमुपलभ्यते—

'इमे वै लोकाः पूः, अयमेव पुरुषो योऽयं पवते । सोऽस्यां पुरि शेते तस्मात्

---

१. पुरुषो ह नारायणोऽकामयत.....स एतं पुरुषमेधं पञ्चरात्रं यज्ञक्रतुमपश्यत् (शत० ब्रा० १३।६।१।१) । अयं नारायणोऽधिदैवे आदित्यो वायुर्वा, अध्यात्मे परमपुरुषः, शारीरपुरुषो वा ।

२. अयं पाठो मुम्बइस्थे निर्णयसागरयन्त्रालये मुद्रितो वर्तते ।

पुरुषः। यदेषु लोकेष्वन्नं तदस्यान्नं मेधः। तद्यदस्यैतदन्नं मेधस्तस्मात् पुरुषमेधः। अथो यदस्मिन् मेध्यान् पुरुषानालभते तस्मादेव पुरुषमेधः।' १३।६।२।१॥

अस्यायमभिप्रायः—इमे पृथिव्यादयो लोका एव पूः (=शरीरम्), स एव पुरुषो योऽयं पवते [योऽयमादित्यः]। स एवास्मिन् पुरि शेते तस्मात् पुरुषः। यदेषु लोकेष्वन्नम्=अदनीयं भक्षणीयं रसरूपम्, तदेव तस्य पुरुषस्य=आदित्यस्यान्नं (=भक्षणीयो रसः) मेधः (=सारः)। तस्मात् पुरुषमेधः। अथो (=अधियज्ञपक्षे) यदस्मिन् यज्ञे मेध्यान् पुरुषान् आलभते, तस्मादेव पुरुषमेधः।

अनया संक्षिप्तविवेचनया स्पष्टमिदं भवति यत् पुरुषमेधे पुरुषा न वध्यन्ते, कर्मणः समाप्तेः पूर्वमेव त उत्सृज्यन्ते। यतः पुरुषमेधस्य विधानं सर्वोत्कर्षप्राप्त्यर्थं क्रियते, अतोऽस्मिन् यज्ञे ते सर्वेऽपि पुरुषा एकत्रीक्रियन्ते, ये यत्कार्यार्थं लोके प्रसिद्धा वर्तन्ते। पुरुषमेधस्य यजमानः स्वात्मानं लौकिकपुरुषाणामपेक्षया अतिष्ठापयेद् इति भावनया तुलनार्थम् अथवा विविधपुरुषाणां चरित्रविज्ञानार्थं चतुरशीत्युत्तरशतं पुरुषान् एकत्री करोति, तथा पुरुषमेधानन्तरं तेभ्योऽतिष्ठानाय अरण्ये गत्वा तपश्चरति, परिव्रजति वा। यदि यजमानस्य शारीरिकी स्थितिररण्यगमनयोग्या परिव्रजनयोग्या वा न भवति चेत् स्वग्रामे निवसन्नेव तपश्चर्यया स्वात्मानमुत्कर्षाय प्रयतेत। अस्यैव पक्षस्य मनुस्मृतौ वेदसंन्यासनाम्नानिर्देश उपलभ्यते। तदुक्तम्—

संन्यस्य सर्वकर्माणि कर्मदोषान् अपानुदन्।
नियतो वेदमभ्यस्य पुत्रैश्वर्ये सुखं वसेत्॥ मनु० ६।९५॥

अनुबन्ध्याया गोरालभनम्—पुरुषमेधे अनुबन्ध्याया गोरालभनमुक्तम्। सा अनुबन्ध्या गौर्वर्तते **अफला अपुष्पा वाक्**—

अघेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम्। ऋ० १०।७१।५।

अस्य व्याख्यानं निरुक्तकारेण यास्केनैवं विहितम्—

"अघेन्वा ह्येष चरति मायया वाक्प्रतिरूपया। नास्मै कामान् दुग्धे वाग्दोहान् देवमनुष्यस्थानेषु। यो वाचं श्रुतवान् भवत्यफलामपुष्पामिति। अफलास्मा अपुष्पा वाग्भवतीति। निरुक्त १।२०॥

अत्र यास्केन वैदिकवाचः फले क्रमशो याज्ञदैवते, देवताध्यात्मे वेत्युक्तम्। इममेवमभिप्रायं प्रकारान्तरेण अपरा ऋगेवं वदति—

ऋचोऽक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥
ऋ० १।१६४।३९॥

शतपथब्राह्मणे (१४।७।२।२३) ऽप्युक्तम्—

नानुध्यायान् बहूञ्छब्दान् वाचो विग्लापनं हि तत्। अस्याभिप्रायं सायण एवमाह—**यदप्यसौ काव्यनाटकं शृणोति तथापि निरर्थकमेव तच्छ्रवणम्, तेन सुकृत्मार्गज्ञानाभावात्।**[1]

आधिदैविकपक्षे—गोशब्दः सूर्यस्य, तदीयरश्मीणां, पृथिव्या (= स्वयमप्रकाशितलोकानाम्) दीनामनेकेषां पदार्थानां नाम वर्तते। याज्ञिकग्रन्थेषु **वशाया एव गोरालभनं** निर्दिश्यते। **अयमेको रहस्यमयः संकेतो वर्तते**। वन्ध्या गौः सन्ततिं दुग्धं च नैव ददाति। अतः सानुपयोगिनीव भवति। आधिदैविक-पक्षे स्वर्भानुनाऽसुरेण (=प्रकाशकावरोधकेन मलेन) विद्ध आदित्य एव वशा गौरस्ति। सर्गारम्भे तमालभ्य दैवीभिः शक्तिभिः सूर्यः प्रकाशमानः कृतः। सूर्यस्य रश्मयोऽपि यदा वर्षाकाले मेघैराच्छादिता भवन्ति तदा ते अपि वशा गावो भवन्ति। अन्तरिक्षस्था देवगणाः सूर्यरश्मीणां वन्ध्यात्वदोषनिवारणाय मेघान् विच्छिद्य तान् पृथिवीं प्रापय्य ओषधिवनस्पतीनां प्रजननाय पाकाय च समर्थान् कुर्वन्ति। ऊषरभूमिरपि वशा गौः, यतः तस्यां धान्यादिकं न किमपि उत्पद्यते। कृषको गोमयादिरूपं खाद्यं तस्यां निपात्य ऊषररूपं वन्ध्यात्वकारणं निवारयति। इत्थमेव यज्ञेषु यत्रापि वशाया गोरालभनस्य निर्देशो वर्तते तत्र चिकित्सया गवां वशात्वधर्मस्य निर्वृत्तिरेव प्रयोजनं भवितुमर्हति।

वानप्रस्थसंन्यासाश्रमयोर्विधानस्य इदमेव प्रयोजनं यद् ब्रह्मचर्यगृहस्था-श्रमयोर्यत् पठितं यदाचरितं यदनुभूतं तस्य निदिध्यासनपूर्वकसाक्षात्कारं कुर्यात्। आत्मसाक्षात्कार एव मनुष्यजीवनस्यान्तिमसोपानं वर्तते। यमारुह्य मानवजीवनं कृतकृत्यं सम्पद्यते। इदमेव हि पुरुषमेधयज्ञस्य लक्ष्यम्। अत एव पुरुषाध्यायस्य विनियोगः शौनकाचार्येण मोक्षे विहितः (द्र०—पृ० ७३ उद्धृतम्, उव्वटभाष्यम्)।

पुरुषमेधे अजानामप्यालम्भनं भवति। तद् विषयेऽग्रेऽजमेधे वक्ष्यामः।

शतपथकारेण परमब्रह्मिष्ठेन याज्ञवल्क्येन पुरुषमेधप्रकरणस्यारम्भे (श०

---

१. द्रष्टव्या—सायणीय-ऋग्वेदभाष्योपक्रमणिका, वेदभाष्य-भूमिका-संग्रहः, पृष्ठम्—३९, काशी, संवत् १९९१।

१३।६।१।१-११) एव पुरुषमेधस्य आधिदैविकाध्यात्मिकस्वरूपं निरूपितम्, तदनन्तरं च याज्ञिकप्रक्रिया वर्णिता। एतेन पुरुषमेधयागस्य आधिदैविकजगतः आध्यात्मिकतत्त्वस्य च व्याख्याने तात्पर्यमिति स्पष्टं विज्ञायते। पुरुषमेधानन्तरम् अरण्यवासस्य निर्देशो (शत० १३।६।२।२०) ऽपि अस्यार्थस्यैव सम्पोषकः।

अधिदैवतं सृष्टियज्ञो वा—अधिदैवतपक्षे नारायण आदित्यः पुरुषः, इमे लोका एव च तस्य मेधाः (शत० १३।६।१।६) समस्तेषु पशुयज्ञेषु पशूनां बन्धनाय यूपो भवति। पुरुषमेधेऽपि पुरुषपशूनां कृते यूप-निर्देश उपलभ्यते। अश्वादिपशूनान्तु यूपे निबन्धनमुचितम्,यतस्ते यज्ञशालातः न पलायेरन्। पुरुषास्तु यथानिर्देशं कार्यकारिणो भवन्ति, अतस्तेषां अन्यपशूनामिव यूपे रज्ज्वादिना बन्धनं नोचितम्। पुरुषमेधस्य आधिदैविकस्वरूपे पुरुषो नारायण आदित्यः, लोकलोकान्तराण्येव तस्य मेधः (=अन्नम्) इत्युक्तम्। अतः सृष्टियज्ञे आदित्यरूपे यूपे तस्य रश्मिरूपिभी रज्जुभिर्लोकलोकान्तराणि बद्धानि सन्ति। अतोऽधियज्ञे पुरुषमेधेऽपि यूपस्य निर्देश उचितः, लोकलोकान्तररूपाणां पुरुषाणां बन्धनमपि। परन्त्विदं बन्धनं नान्यपशूनामिव, अपि तु साङ्केतिकं बन्धनम्। लोके यथा भगिनी रक्षाबन्धनपर्वणि भ्रातुर्हस्ते रक्षारूपं प्रेमसूत्रं बद्ध्वा तं प्रेम्णा बध्नाति, तथैव पुरुषमेधेऽपि पुरुषाणां बन्धनं यूपं निर्दिश्य तत्समीपे उपवेशमात्रं ज्ञेयम्। अश्वमेधेऽपि कपिञ्जलादीनाम् आरण्यानां यूपान्तराले नियोजनं विहितम्—**कपिञ्जलादीन् पुषतान्तांस्त्रयोदश त्रयोदश यूपान्तरेषु** (का० श्रौ० २०।६।६)। कपिञ्जलादयः कथं नियोजनीया इति विषये महीधर आह—**अत्र यूपान्तरालेष्वारण्यपशूनां बन्धनोपायः उक्तो मानवसूत्रे। नाडीषु प्लुषिमशकान् करण्डेषु सर्पान् पञ्जरेषु मृगव्याघ्रसिंहान् कुम्भेषु मकरमत्स्यमण्डूकान् जालेषु पक्षिणः कारासु हस्तिनो नौषु चौदकानि यथार्थमितरानिति** (महीधरभाष्य यजु० २४।२०)।

अश्वमेधस्याश्वः तस्य चालभनम्

पुरुषमेधानन्तरम् अश्वमेधविषये विचार्यते। अस्मिन् क्रतौ याज्ञिकसम्प्रदायो याज्ञिकप्रक्रियानुसारेण यज्ञीयं अश्वमालभ्य तस्याङ्गैः आहुतिप्रदानं मन्यते। अतः किंरूपोऽश्वमेधः कश्च तस्याश्व इत्यत्र विचारणाऽऽवश्यकी। प्रथमं वयम् अश्वमेधयज्ञस्य कांश्चिन्मुख्यांशान् निदर्शयामः—

अश्वमेधः प्रायेण संवत्सरैकसाध्यं कर्म। अस्य कर्मणोऽधिकारी अभिषिक्तः सार्वभौमो राजा भवति। फाल्गुनमासस्य शुक्लपक्षस्य अष्टम्या नवम्या

वा अस्यारम्भः क्रियते (कात्या० श्रौत २०।१।२) । अश्वमेधाय यस्य अश्वस्य वरणं क्रियते, तस्य पूर्वोऽर्धभागः कृष्णः, पश्चात्तनो भागः श्वेतः, ललाटे च शकटाकारं श्वेतं लक्ष्म अपेक्षितम् (द्र०—शत० ब्रा० १३।४।२।४) । अश्वमेधीयाश्वस्य द्वादशारत्निप्रमाणा त्रयोदशारत्निप्रमाणा वा रशना भवति । तां घृतेन अञ्जयन्ति । राज्ञ आभरणादिभिरलङ्कृताश्चतस्रः पत्न्यः (=महिषी=प्रथमपरिणीता, वावाता=वल्लभा, परिवृक्ता=अवल्लभा, पालागली=दूतपुत्री) सानुचर्यः शतेन शतेन (=४००) यजमानस्य समीपमुपयान्ति (कात्या० श्रौत २०।१।१२) वावातायाः (=वल्लभायाः) पत्न्या उर्वन्तरे शिरः कृत्वा ब्रह्मचर्यं पालयन् राजा रात्रौ शेते (कात्या० श्रौत २०।१।१७) । अश्वमेधीयोऽश्व ईशान्यां दिशि उत्सृजते । तेन सह शस्त्रास्त्रकवचधारिणः शतं राजपुत्राः, शतं क्षत्रियपुत्राः, शतं सूतपुत्राः, शतं क्षतारः (=४००) रक्षिणो अनुयान्ति (कात्या० श्रौत २०।२।१०) । वडवाभ्यः स्नानार्हादुदकादश्ववारणाय आदेशो दीयते (कात्या० श्रौत २०।२।१२,१३) । संवत्सरैकपर्यन्तमश्वं भ्रामयित्वा प्रत्यानयन्ति । मार्गे शस्त्रधारिणो रक्षकास्तमश्वं रक्षन्ति । अस्मिन्नन्तराले यदि कश्चिद् राजा स्वराज्ये भ्रमणं कुर्वन्तमश्वमवरोधते, तर्हि तं युद्धे पराजित्य स्वानुचरं विधायाग्रे प्रयान्ति । इत्थमश्वमेधस्याश्वो यस्य यस्य राज्ये भ्रमति ते सर्वे राजानोऽश्वमेधे उपहारानादायोपतिष्ठन्ति । संवत्सरपर्यन्तं भ्रमणं कृत्वाश्वस्य प्रत्यागमने अश्वमेधस्य अन्यत्कर्म सम्पद्यते । अश्वमेधीयस्याश्वस्य कृत्स्नं शरीरं रज्जुभिः परिवेष्टयन्ति । रज्जूनां पर्यन्तभागैर्विभिन्नदेवताकान् अजादीन् पशून् बध्नन्ति (द्र०—कात्या० श्रौतभूमिका पृष्ठ ६६ विद्याधरटीका) । सप्तविंशत्युत्तरं शतत्रयं ग्राम्याः पशवः, षष्ट्युत्तरद्विशतमारण्याः पशवः, द्वाविंशतिरेकादशिनीपशवः, आहृत्य नवोत्तराणि षट्शतानि (६०९) पशवो भवन्ति (द्र०—उव्वटमहीधरभाष्य यजु० २४।४०) । आरण्यानां पशूनामुत्सर्जनं भवति (कात्या० श्रौत २०।६।९), शिष्टा ग्राम्याः पशव आलभ्यन्ते ।

अश्वमेधविषये विचारः—सम्प्रति अश्वमेधक्रतोः सम्बन्धे विचार्यते । अश्वमेधस्य कर्मणो ये प्रमुखा अंशाः पुरस्तान् निदर्शिताः तैर्विस्पष्टं भवति यदिदम् आश्वमेधिकं कर्म आधिदैविकस्य जगतः कस्यचित् यज्ञस्य प्रतिरूपकं वर्तते । इह वयम् इदमेव तत्त्वं स्पष्टीकर्तुं प्रयतामहे—

सार्वभौमो राजा—लौकिकेऽश्वमेधे यद्यपि यजमानरूपः सार्वभौमो राजा अश्वश्च पृथक् पृथग् भवतः, तथापि अश्वस्य राज्ञस्तेजसः प्रतीकत्वाद्

उभौ परस्परं सम्बद्धौ स्तः। आधिदैविकेऽश्वमेधे सूर्य एव सार्वभौमो राजा, स एव चाश्वः। अश्वमेधसूक्तेषु (ऋ० १६२, १६३, १६४) क्वचिद् अश्व-शब्देन तत्पर्यायवाचिशब्देन च तत्साहचर्यात् तत्प्रसूतत्वाद्वा सूर्यरश्मीनामपि निर्देश उपलभ्यते।

अश्वः—अश्वमेधीयाश्वस्य यानि लक्षणानि निरूपितानि, तानि आधि-दैविकस्य जगतः सूर्यस्यैव सन्ति। सूर्योदयात् सार्धत्रिघटीपूर्वं (=सार्धघण्टा-पूर्वं) रात्रेः तमो भवति। पूर्वस्यां दिशि शकटाकारा ऊर्ध्वम् आकाशे व्याप्ता उषसः रश्मयो दृश्यन्ते। इदम् अश्वस्य पूर्वतने कृष्णभागः ललाटे च श्वेतं लक्ष्म विज्ञेयम्। उषसोऽनन्तरं सूर्योदये सति प्रकाशो भवति। अयम् अश्वस्यापरो-ऽर्धश्वेतभागः। अग्रेऽग्रे उषःकालयुक्ता रात्रिर्भवति, तदनु च सूर्यस्य प्रकाशः प्रचलति।

अश्वस्य रशना—अश्वस्य रशनायाः परिमाणं द्वादशारत्नयः, त्रयोदशा-रत्नयो वा उक्तम् (अरत्निशब्दः द्वाविंशत्यङ्गुलपरिमाणस्य वाचकः)। सूर्यस्य एकस्मिन् परिक्रमणे चन्द्रमसो द्वादश मासा भवन्ति[1], तृतीयवर्षे मलमासस्या-धिक्ये त्रयोदश मासाः सम्पद्यन्ते[2]। अनयैव द्वादशमासात्मिकया त्रयोदशमासा-त्मिकया वा रशनया बद्धः सूर्यो भवति। अश्वस्य रशनां घृतेन अञ्जन्ति। घृतं नाम दीपकस्य तेजस्विनः पदार्थस्योपलक्षणम्। (घृ क्षरणदीप्त्योः)। सूर्यस्येयं रशना प्रकाशेन दीप्ता तेजस्विनी च भवति।

राज्ञः चतस्रः पत्न्यः—सार्वभौमस्य सूर्यस्य राज्ञः चतस्रः पत्न्य उक्ताः, ताः पूर्वपश्चिमोत्तरदक्षिणरूपाः चतस्रो दिशः। पूर्वा दिक् महिषीनाम्नी प्रधाना पत्नी। यतोऽनया सार्धमेव सूर्यस्याभिषेको भवति। पश्चिमा दिक् वल्लभानाम्नी

---

१. सर्वमपि कर्मकाण्डं चान्द्रमासानुसारेणैव प्रवर्तते। चान्द्रमासः सौरमा-सात् किञ्चिन्न्यूनो भवति। अत एव रशनायाः पूर्णहस्तप्रमाणं (=२४ अङ्गुल्यात्मकम्) नोक्तम्, अपि तु द्वाविंशत्यङ्गुल्यात्मकम् अरत्निप्रमाण-मुक्तम्।

२. ऋग्वेदस्य **वेद मासो धृतव्रतो द्वादश प्रजावतः। वेदा य उपजायते** (१।२५।८) इति मन्त्रे द्वादशमासैः सह उपजायमानस्य त्रयोदशस्य मासस्यापि निर्देश उपलभ्यते। प्रतिवर्षं सौरवर्षापेक्षया चान्द्रवर्षे प्रायेण दश दिवसा न्यूना भवन्ति। इदमन्तरं दूरीकर्तुं चान्द्रवर्षस्य तृतीये वर्षे मासमेकमधिकं गण्यते। अयमधिकमासो मलमासो वोच्यते।

दिक्। अस्यामेव दिशि सूर्यो निम्रोचति (=विश्राम्यति)। अत एव अश्वमेधे राज्ञो वल्लभाया उर्वोरन्तराले शिरो निधाय शनयमुक्तम्। अस्मिन् काले यद् ब्रह्मचर्यस्य विधानमुक्तम्, तस्येदं कारणम्—अस्माकं दृष्टौ सूर्यो वल्लभायां पश्चिमस्यां दिशि यदा निम्रोचन् भवति, तदा तद्दिशः प्रजानां दृष्टौ सूर्य उद्यन् भवति। एवम् आस्माकीना पश्चिमा-दिक् तद्देशस्थानां प्राणिनां पूर्वा दिक् सम्पद्यते। अर्थात् वल्लभायां पश्चिमस्यां दिशि सूर्यस्य निम्रोचने सत्यपि न तया सह तस्य सम्बन्धो भवति। इत्थमेव अवल्लभादूत-पुत्रपत्न्यौ उत्तरदक्षिणे दिशौ स्तः, आभ्यां सह सूर्यस्य उत्तरायणे दक्षिणायने चैव संयोगो भवति, न सर्वदा।

इदमप्यत्रावधेयम्—एकपत्नीव्रतपरायणा दाशरथिरामादयो बहवो राजानोऽपि अश्वमेधं चक्रुः। याज्ञिकप्रक्रियानुसारेण राज्ञो न्यूनतमाश्चतस्रः पत्न्योऽपेक्षन्ते। सत्येवम्—एकपत्नीव्रतपरायणैः राजभिः कथमयं कटुः सम्पादितः स्यात्? अस्मन्मते तु आधिदैविकस्याश्वमेधस्य कृत्स्नं कर्म द्रव्यमयेऽश्वमेधे तावन्मात्रमेवानुक्रियते यावत्तत् सम्भवति।

अश्वस्य एकवर्षमितं परिभ्रमणम्—इदपि सूर्यस्य वार्षिक्या गतेरुपलक्षकम्।

कवचिनो रक्षकाः—अश्वस्य रक्षायै मार्गे प्राप्तां बाधां दूरीकर्तुं शतचतुष्टयं शस्त्रास्त्रसम्पन्नानां कवचिनां राजपुत्रादीनां विधानमपि सूर्यस्य रश्मीनामेव निदर्शकम्। ऋग्वेदे सूर्यस्य सहस्रविधा रश्मय उक्ताः—**युक्ता ह्यस्य हरयश्शतादश** (६।४७।१८)। एषां सहस्रविधानां रश्मीनां त्रयो भेदा वायुपुराणे (५३।१९-२३), ब्रह्माण्डपुराणे (पूर्वभाग २४।२६-३०), मत्स्यपुराणे (१२८।१८-२२) च निर्दर्शिताः सन्ति। तेषु चित्रमूर्तिनामानः शतचतुष्टयं रश्मयो वर्षयन्ति[1]। वर्षाकाले मेघानामवरोधात् सूर्यस्य रश्मयः प्रकाशो वा पृथिवीपर्यन्तं नाप्नोति। अश्वस्य विचरणे शत्रोः प्रतिरोधं दूरीकर्तुं शतचतुष्टयं शस्त्रास्त्रधारिणः कवचिनः सैनिका अनुयान्ति। सृष्टियज्ञेऽपि सूर्यस्य रश्मीनां प्रकाशस्य वा प्रसरणे मेघा अवरोधका भवन्ति, तान् विच्छिद्य वर्षकाः चित्रमूर्तिनामानो रश्मयोऽपि शतचतुष्टयमिता एव सन्ति। ऋग्वेदस्य **आणिं न रथ्यममृताधि तस्थुः** (१।३५।६) मन्त्रे सृष्टिसर्जका रश्मयोऽमृता उक्ताः।

---

१. तस्य रश्मिसहस्रं तु वर्षशीतोष्णनिस्रवम्। तासां चतुःशता नाड्यो वर्षन्ते चित्रमूर्तयः॥ वायुपुराण ५३।१९; मत्स्यपु० १२८।१८, ब्रह्माण्डपु० पूर्वभाग २४।२६॥

अश्वस्य सर्वाङ्गानां रज्जुभिर्बन्धनम्—अश्वमेधे अश्वस्य कृत्स्नं शरीरं रज्जुभिर्वेष्टयन्ति । तथा तत्तत्स्थानीयै रज्जूनामन्तभागैः केचन अन्ये पशवः बध्यन्त इत्युक्तम् । इदमपि कर्म सृष्टियज्ञीयमश्वमेधमेव सङ्केतयति । सूर्यमण्डलस्य सर्वतः सूर्यरश्मयः प्रसृता भवन्ति । एतै रश्मिभिरेव सूर्यमण्डलं कृत्स्नरूपेण बद्धम् अर्थाद् आच्छादितं वर्तते । एषां सूर्यरश्मीनामपरैरन्त्यभागैः सूर्यमण्डलस्य पशुरूपाः पृथिव्यादयो ग्रहोपग्रहा बद्धाः सन्ति ।

विजितेभ्यो राजभ्य उपहाराणां ग्रहणम्—इदमपि सृष्टियज्ञस्यैव घटनायाः स्मारकम् । सूर्यः स्वरश्मिभिरवरोधकान् मेघान् विच्छिद्य येन येन प्रदेशेन सम्बद्धो भवति, तस्मात् तस्मात् प्रदेशात् स स्वतेजसा रसान् गृह्णाति ।

एवमस्माभिर्विस्पष्टीकृतमेतद् यद् द्रव्यमयरूपस्य अश्वमेधस्य सम्बन्धः सृष्टियज्ञस्य अश्वमेधेन सह वर्तते । एतेन साकं लौकिकस्याश्वमेधस्य एकं राष्ट्रियरूपमप्यस्ति । तस्य व्याख्या शतपथ-तैत्तिरीयब्राह्मणयोः विस्तरेणोपलभ्यते, सा तत्रैव द्रष्टव्या ।

लौकिकेऽश्वमेधे ग्राम्यपशूनां हिंसाया यद् विधानं दृश्यते, तद्विषये अस्माभिः किञ्चित् पूर्वं लिखितम्, किञ्चिच्च पञ्चानां पशुमेधानामनन्तरं लेखिष्यते ।

ऋग्वेदीयानि अश्वसूक्तानि—ऋग्वेदस्य प्रथममण्डलस्य १६२, १६३, १६४ तमानि सूक्तानि अश्वमेधे विनियुक्तानि सन्ति । सम्प्रति एषां सूक्तानां विषय अतिसंक्षेपेण लिख्यते—

त्रिषष्ट्युत्तरशततमस्य सूक्तस्य प्रथममन्त्रे अश्वस्योत्पत्तिः समुद्रात् पुरीषाच्च उक्ता, द्वितीयमन्त्रे यमेन प्रदत्तस्य त्रितेन युक्तस्य अश्वस्योपरि इन्द्रः प्रथममध्यतिष्ठत्, गन्धर्व अस्य रशनामगृह्णात्, वसवः सूराद् अश्वमतक्षन् इति निर्दिश्यते । चतुर्थे मन्त्रे अश्वस्य दिवि अप्सु समुद्रे च त्रीणि बन्धनान्युक्तानि । षष्ठे मन्त्रे पतङ्गः (=गतिशीलोऽश्वः) द्युलोके गच्छन्निर्दिष्टः । **दशमस्य ईर्मान्तासः** मन्त्रस्य व्याख्या निरुक्तकारेण सूर्यरश्मिपरा व्यधायि (द्र०—निरुक्त ४।१३) । एकादशे मन्त्रे अश्वस्य जभुराणि देदीप्यमानानि शृङ्गाणि अरण्ये विचरन्तीत्युक्तम् । लौकिकस्याश्वस्य शृङ्गाण्येव न भवन्ति, पुनः कथं तेषां देदीप्यमानानाम् अरण्ये विचरणं सम्भवति ? सूर्यस्य तु देदीप्यमानानि गतिमन्ति शृङ्गाणि तस्य रश्मयः । एतैः सङ्केतैर्विस्पष्टं भवति यद्

अश्वमेधे क्रतौ विनियुक्ते त्रिषष्ट्युत्तरशततमे सूक्ते उक्तोऽश्वः सूर्य एव, न लौकिकः पशुः।

चतुष्षष्ट्युत्तरशततमस्य सूक्तस्यारम्भ **अस्य वामस्य पलितस्य** इत्येवं भवति। आदौ निर्दिष्टम् **अस्य** इति सर्वनामसंज्ञकम् । सर्वनामानि च पूर्वनिर्दिष्टस्य स्मारकानि उत वा अभिधायकानि भवन्ति। अनया दृष्टया पूर्वपठितयोः १६२, १६३ तमयोः सूक्तयोर्यस्याश्वस्य वर्णनमभूत् तमेव **अस्य**पदेन स्मारयित्वा तद्विषये विशेष उच्यते। अस्मिन् **अस्यवामीये** सूक्ते सूर्यस्य तद्रश्मीनां च वर्णनमुपलभ्यते। इदं च वर्णनं एतावत् स्पष्टं वर्तते, यदस्मिन् प्रकरणे सूर्यस्य तद्रश्मीनाञ्च वर्णनम् अतिरिच्य नान्यस्य कस्यचित् वर्णनं स्वीकर्तुं शक्यते। निरुक्तकारो यास्कोऽप्यस्य सूक्तस्यानेकेषां मन्त्राणां सूर्यपरामेव व्याख्यां निरुक्ते कृतवान्।

सम्प्रति द्वाषष्ट्युत्तरशततमस्य सूक्तस्य समस्यावशिष्यते। यद्यप्यस्मिन् सूक्ते अनेके मन्त्राः पदसमूहाश्च एतादृशः सन्ति ये आपाततोऽश्वमेधक्रतुसम्बन्धिन एव प्रतीयन्ते, तथाप्युत्तरयोः सूक्तयोः प्रकाशे तेषामप्याधिदैविकोऽर्थ एव कर्तव्यः। बृहदारण्यकोपनिषद आरम्भे द्वाषष्ट्युत्तरशततमे सूक्ते निर्दिष्टानाम् अश्वाङ्गानाम् आधिदैविकी व्याख्या द्रष्टव्या। एतद्विषये देवप्रकाशपातञ्जलस्य **'ए क्रिटिकल स्टडी आफ ऋग्वेद'** (१।१३७-१६३) ग्रन्थो द्रष्टव्यः।

वेदार्थपारिजातस्य लेखकेन करपात्रस्वामिना अश्वमेधक्रतौ अश्वस्यालम्भननिर्देशाय द्वाषष्ट्युत्तरशततमस्य सूक्तस्य केचन मन्त्रा उद्धृत्य व्याख्याताः (द्वितीयभाग पृष्ठ २०४०—२०४४)। वस्तुतस्तु यद्यस्मिन् सूक्ते अश्वस्यालम्भनं तदवयवानां पाचनादिमेव स्यात् तर्हि न केवलम् उत्तराभ्यां सूक्ताभ्यां विरोध आपद्यते, अपि त्वस्यैव सूक्तस्य या एकविंशा ऋक्— **'न वा उ एतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः सुगेभिः'** इत्यनया सार्धं दृष्टविरोधः प्रत्यक्ष एव। अश्वमेधे आलभ्यमानोऽश्व म्रियते। अस्यामृचि तु **न वा उ एतन्म्रियसे** इति पदैः स्पष्टमेव अश्वस्य मृत्योरभाव उक्तः। वस्तुतस्त्वस्यामृचि सूर्यरूपस्याश्वस्यैव वर्णनं विद्यते। यतो हि सोऽस्तङ्गतोऽपि न स्वरूपं जहाति, न च रिष्यति। अपरदिने स एव पुनरुदीयमानः प्रत्यक्षमुपलभ्यते। अयमेवाभिप्रायः प्रकारान्तरेण ब्राह्मणग्रन्थेषु प्रकटीकृतः। तथाहि—

स वा एष न कदाचनास्तमेति नोदेति.....स वा एष न कदाचन निम्लोचति (ऐ० ब्रा० अ० १४। ख० ६)।

स वा एष न कदाचनास्तमयति, नोदयति.....स वा एष न कदाचनास्तमयति नोदयति। न ह वै कदाचन निम्लोचति (गो० ब्रा० उत्तरार्द्धे ४।१०) इति।

गोमेधस्य गौः, तस्याश्चालभनम्

यथा याज्ञिकग्रन्थेषु साक्षाद् अश्वमेधयोर्निर्देश उपलभ्यते, न तथा गोमेधसंज्ञकस्य कस्यचित् कर्मणः सम्पूर्णेऽपि याज्ञिकवाङ्मये साक्षान्निर्देशो विद्यते। एकं गवामयननामकं संवत्सरसाध्यं सत्रं विधीयते। अस्मिन् गोपशोरालभनस्य विधानं नास्ति। ऐतरेयब्राह्मणे (४।१७) गवामयनसत्रस्य विधानं वर्तते। तस्यारम्भ एवमुक्तम्—**"गवामयनेन यन्ति। गावो वा आदित्याः। आदित्यानामेव तदयनेन यन्ति। गावो वै सत्रमासत।"**

अस्मिन् निर्दिष्टा गाव आदित्याः। यद्यपि आदित्य एक एव, तथापि कालभेदेन कर्मभेदेन च स द्वादशधा भिन्नः। अयनं नाम तस्या गतेर्वाचकं यतः सा प्रारभते तत्रैव चावृत्य परिसमाप्तिमेति।[1] आदित्यानां गतिरेव गवामयनम्। आदित्यस्य दक्षिणायनोत्तरायणे गती[2] प्रसिद्धे स्तः। अनयोरेव गत्योरनुकरणं षट्सु षट्सु मासेषु गवामयनसत्रे भवति। इत्थं गवामयनसत्रं मूलत आधिदैविकमेव।

कतिपयेषु क्रतुषु अङ्गरूपेण काम्यकर्मरूपेण वा गोरालभनं दृश्यते। यथा —पुरुषमेधे अङ्गरूपोऽनुबन्ध्याया यागः। महाभाष्ये (१।१। आ० १) उद्धृतम्—**'स्थूलपृषतीमनड्वाहीमालभेत'** इति काम्यं कर्म। पूर्वत्र (पृष्ठ ७४) पुरुषमेध प्रकरणेऽस्माभिरुक्तम्—यत्र क्वचिदपि गोरालभनमुपलभ्यते, तत्र प्रायेणानुबन्ध्या वशा शब्दाभ्यामेव निर्देशः क्रियते। अनुबन्ध्याशब्दस्यार्थो

---

१. यथा रामोऽयोध्यातो निर्गत्य तत्रैवागतस्तेन रामस्यायनं पूर्तिमगात्। अत एव तस्य वर्णको ग्रन्थोऽपि रामायणेति नाम्ना प्रसिद्धः। रामायणस्य परिसमाप्तिर्युद्धकाण्डान्त एव भवति, तत्रैव फलश्रुतिदर्शनात्। केचनाधुनिका हिन्दीभाषायाः कवयः 'कृष्णायन' इत्यादीनि ग्रन्थनामानि लिखन्ति, तान्ययनगतेर्मुख्यार्थस्यापरिज्ञानमूलकान्येव। नहि कृष्णो मथुरातो निर्गत्य पुनर्मथुरामागतः। द्वारकायामेव स निधनं लेभे।

२. यद्यप्यादित्यस्य वार्षिकी एकैवायनाख्या गतिः, तथापि लोकव्यवहारमनुसृत्य दक्षिणोत्तरभेदेन विभज्येह द्विर्वचनेन निर्देशः कृतः।

वर्तते—यज्ञस्य अनु=पश्चात् (=अन्ते) बध्यते इत्यनुबन्ध्या।[1] एवं वशा-शब्दस्यार्थोऽस्ति **बन्ध्या गौः**। महाभाष्योद्धृते पाठे 'अनड्वाही'शब्देन निर्देशो दृश्यते। अनड्वान् शकटवाहको बलीवर्दः। स्त्रीलिङ्गेन अनड्वाहीशब्देन सा गौरुच्यते, या अनसि योज्यते। यद्यपि गोरनसि योजनं धर्मशास्त्रे प्रतिषिद्धम्, परन्तु तदपवादरूपेण वन्ध्याया गोरनसि योजनमुक्तम्। अतोऽनड्वाहीशब्द-स्यापि बन्ध्या गौरेवार्थः। वशाया गोर्विषये तदालभने च अस्माभिः पूर्वम् (पृ० ७५) अलेखि।

इदमप्यत्रावधेयम्—पाराशरस्मृतिनाम्नैकः श्लोकः प्रसिद्धो वर्तते—

अश्वालम्भं गवालम्भं संन्यासं पलपैत्रकम्।
देवराच्च सुतोत्पत्तिं कलौ पञ्च विवर्जयेत्॥[2]

एतद्वचनानुसारेण कलियुगे गोमेधाश्वमेधयोः, गवाश्वयोरालम्भनं प्रति-षिद्धम्। अश्वमेधस्य कलियुगे प्रतिषेधे सत्यपि पुष्यमित्रादिभिरनेकै राजभिर-श्वमेधानुष्ठानं कृतमितीतिहासे प्रसिद्धम्। श्रौतसूत्रादिषु यत्र क्वचिदपि गवा-लम्भनं विहितं तत्र प्रायेण सर्वत्रैव गोः स्थाने आमिक्षया पयस्यया घृतेन[3] वा तत्कर्मसमापनमुक्तम्। आयुर्वेदीयचरकसंहितायाः चिकित्सास्थाने (१९।४) अतिसाररोगोत्पत्तिविषये एवं विहितम्—

"आदिकाले खलु यज्ञेषु पशवः समालभनीया बभूवुः, नालम्भाय प्रक्रियन्ते स्म। ततो दक्षयज्ञप्रत्यवरकालं मनोः पुत्राणां नरिष्यन्ताभागेक्ष्वाकुनृगशर्यात्या-दीनां च क्रतुषु 'पशूनामेवाभ्यनुज्ञानात्' पशवः प्रोक्षणमापुः। अतश्च प्रत्यवर-कालं पृषध्रेण दीर्घसत्रेण यजता पशूनामभावात् गवालम्भः प्रवर्ततः..... अतिसारः पूर्वमुत्पन्नः पृषध्रयज्ञे।"

अस्मिन् पाठे **'आदिकाले खलु यज्ञेषु पशवः समालभनीया बभूवुः, नाल-म्भाय प्रक्रियन्ते स्म'** इति वाक्येन विस्पष्टं प्रतीयते यद् आदिकाले कस्यचिदपि पशोरालम्भनं न भवति स्म। उत्तरवर्तिना गवालम्भनम् अन्यपशूनामालम्भना-नन्तरं प्रचलितम्।

---

१. द्र०—कात्या० श्रौत १०।९।१३ विद्याधरटीका।

२. अयं श्लोकः पाराशरस्मृतिनाम्ना निबन्धकारा उद्धरन्ति। अस्माभिस्तु पाराशरस्मृतेर्लघुवृद्धगठयोर्नायं श्लोक उपलब्धः।

३. मैत्रावरुणीमामिक्षामनूबन्ध्यायाः स्थाने बह्वृचाः समामनन्ति। आप० श्रौत १३।२५।१०। उभयाभावे पयस्या। कात्या० श्रौत १०।९।१६॥ अत्र विद्याधरटीका द्रष्टव्या।

अविमेधस्य अविः, तस्याश्चालभनम्

अविमेधनाम्नः कस्यचित् स्वतन्त्रस्य कर्मणो याज्ञिकसम्प्रदाये निर्देशो नोपलभ्यते। केषुचित् क्रतुषु अङ्गरूपेण अवेरालम्भनं दृश्यते। अस्माभिः पूर्वत्र (पृष्ठ ६८-७०) वशाया अवेरालम्भनप्रकरणे का नाम अविः, किञ्च तस्या वशात्वं, कथं च देवैः तस्या आलम्भनं कृतम् इति निर्दर्शितम्। अतः कर्मकाण्डीयग्रन्थेषु यत्रापि अवेरालभनं विहितं, तस्य मूले पूर्वनिर्दर्शिता आधिभौतिकी अविरेव ज्ञेया।

अविमेधस्य सम्बन्धे एकः प्रसङ्गो ज्ञातुमर्होऽस्ति—चातुर्मासान्तर्गते वरुणप्रघाससंज्ञके द्वितीये पर्वणि निस्तुषानां यवानां पिषाणेन मेषमेष्योः शरीराकृत्योर्निर्माणमुक्तम् (शत० ब्रा० ५।५।२।१५-१६)। तयोः शरीराकृत्योरुपरि च एडक-पशोर्भिन्नस्य पशोर्लोमानां श्लेषणं विहितम् (कात्या० श्रौत ५।३।७)। यज्ञकाले मारुत्यां पयस्यायां मेषाकृतिः, वारुण्याञ्च पयस्यायां मेष्याकृतिर्निधीयते (कात्या० श्रौत ५।५।२-३) उभयोः पयस्ययोराहुतिकाले पयस्याभ्यां सह मेषमेष्योराकृती अपि हूयेते (कात्या० श्रौत ५।५।१६-१९)।

इदमप्यत्रावधेयम्—समस्तेऽपि वैष्णवसम्प्रदाये तत्तद्यागेषु साक्षात् पशूनां विधाने सत्यपि यवानां पिषाणेनैव तत्तत्पशोराकृतिं विधाय तदवयवैरेव पशुयागः क्रियते। अयं पिष्टपशुरित्युच्यते। संभाव्यते पिष्टपशोर्मूले वरुणप्रघासस्थयोः पिष्टमय्योः मेषमेष्योः होम एव स्यात्।

अजमेधस्याजः, तस्यालभनञ्च

अजमेधनामकं न किञ्चित् स्वतन्त्रं कर्म विद्यते। याज्ञिके कर्मकाण्डे प्रायेण पशुयागेषु अज एवालभ्यते। अतोऽजशब्दविषये प्रथमं विचारः क्रियते।

वैदिकशाखानां ब्राह्मणग्रन्थानां चानुसारेण समस्तपशुयागानां प्रकृतिः सोमयागस्याग्नीषोमीयः पशुयागो विद्यते। श्रौतसूत्रप्रवक्तृभिः वैदिकशाखासु ब्राह्मणेषु चाग्नीषोमीये पशुयागे विहितः समस्तोऽपि धर्मो निरूढपशुबन्धे निर्दिष्टः। अतः श्रौतसूत्राणामनुसारेण निरूढपशुबन्धः पशुयागानां प्रकृतिर्भवति। प्रकृतिभूतस्य अग्नीषोमीयपशुयागस्य प्रकृतिः दर्शेष्टेः साऩ्नाय्ययागः; तत्रापि च पयोयाग एव प्रकृतिः (द्र०—कात्या० श्रौत ४।३।१४-१६)।

अजशब्दार्थः—अजशब्दस्य व्युत्पत्तिभेदेन द्वावर्थौ सम्भवतः। एकः—अजति सातत्येन गच्छतीति अजः। द्वितीयः—न जायते इति अजः अर्था-

दुत्पत्तिधर्मशून्यो नित्यं वर्तमानः। यथा आत्मा परमात्मा प्रकृतिश्च। एतेषां कृते अजशब्दस्य प्रयोगो वैदिकवाङ्मये बहुधा उपलभ्यते। उभयार्थकस्यापि अजशब्दस्य स्वरो वैदिकवाङ्मये अन्तोदात्त एवोपलभ्यते।

पशुयागविधायकानां वचनानां पुरस्तात् परस्ताच्च बहुधा पुराकल्पसंज्ञकानामर्थवादानां निर्देश उपलभ्यते इत्युक्तं प्राक् (द्र०—पूर्व पृष्ठ ५०)। पुराकल्परूपेष्वर्थवादेषु जगतः सर्गस्य निर्देशः प्राप्यते। अतः सम्पूर्णपशुयागानां पशवोऽपि प्राकृतानामाधिदैविकतत्त्वानामेव प्रतिनिधयः सन्ति। अनया दृष्ट्या कृत्स्नपशुयागानां प्रकृतेरग्नीषोमीययागस्य पशुरजः, सूर्यस्याभितः सततं भ्रमणशीलः पृथिवीलोकः। यथा—अविः पृथिव्याः पिलिप्पिल्या (=अदृढायाः) अवस्थाया वाचकः (द्र०—पृ० ६९), तथैवाग्नीषोमीयो योऽजः सोऽपि अग्नीषोमगुणवत्यः प्रारम्भिकाया अकृष्टपच्यायाः पृथिव्या वाचकः। वर्तमानकालेऽपि कृषियोग्या अनूषरभूमिरपि न्यूनाधिकरूपेणाग्नीषोमीयोऽज एव। मूलतो लौकिकोऽजपशुरग्निप्रधानः, तस्य दुग्धमप्यग्नितत्त्वप्रधानम्। एतेन 'अज' नाम अग्नितत्त्वप्रधानाया ऊषरभूम्या वाचकः। गोमयादीनां सोमप्रधानानां द्रव्याणां संयोगेन ऊषरभूम्यामग्नीषोमीयगुणवत्त्वमाधाय तस्याः कृषियोग्यत्वसम्पादनमेवाग्नीषोमीयपशोरालभनम्। वसन्तर्तुः, यस्मिन् अग्नीषोमीयस्य पशुयागस्य विधानमुक्तम्, स्वयमग्नीषोमगुणप्रधानः। तस्मिन् काले पत्रविहीनासु ओषधिवनस्पतिषु नवाः पल्लवाः प्रादुर्भवन्ति। महाभारतस्य, वायुमत्स्यपुराणयोः, पञ्चतन्त्रस्य, स्याद्वादमञ्जर्याश्च वचनैः (एतानि वचनानि अग्रे उद्धरिष्यामः) प्रतीयते यद् 'अज' इति नाम प्रजननशक्तिरहितानां त्रिवर्षपुराणानां सप्तवर्षपुराणानाञ्चान्नानां वाचकः। एतादृशैरजसंज्ञकैर्बीजैरेव यज्ञस्य विधानं वेदेषु विहितमिति महाभारत उक्तम्।

पशुयज्ञसम्बन्धिनि एकार्थवादे विचारः

ऐतरेयब्राह्मणे (२।८-९) पशुयज्ञसम्बन्धी एकोऽर्थवाद इत्थं पठ्यते—

"पुरुषं वै देवाः पशुमालभन्त। तस्मादालब्धान्मेध उदक्रामत्। सोऽश्वं प्राविशत्। तस्मादश्वो मेध्योऽभवत्। अथैनमुत्क्रान्तमेधमत्यार्जत स किंपुरुषोऽभवत्। तेऽश्वमालभन्त। सोऽश्वादालब्धादुदक्रामत्। स गां प्राविशत्। तस्माद् गौर्मेध्योऽभवत्। अथैनमुत्क्रान्तमेधमत्यार्जत स गौरमृगोऽभवत्। ते गामालभन्त। स गोरालब्धादुदक्रामत्। सोऽविं प्राविशत्। तस्मादविर्मेध्योऽभवत्। अथैनमुत्क्रान्तमेधमत्यार्जत स गवयोऽभवत्। तेऽविमालभन्त। सोऽवेरालब्धादुदक्रामत्।

सोऽजं प्राविशत् । तस्मादजो मेध्योऽभवत् । अथैनमुत्क्रान्तमेधमत्यार्जत स उष्ट्रोऽभवत् । सोऽजे ज्योक्तमामिवारमत । तस्मादेष एतेषां पशूनां प्रयुक्ततमो यदजः। तेऽजमालभन्त । सोऽजादालब्धादुदक्रामत् । स इमां प्राविशत्। तस्मादियं मेध्याऽभवत् । अथैनमुत्क्रान्तमेधमत्यार्जत स शरभोऽभवत् । त एत उत्क्रान्तमेधा अमेध्याः पशवः । तस्मादेतेषां नाश्नीयात् । तमस्यामन्वगच्छन् सोऽनुगतो व्रीहिरभवत् । तद्यत् पशौ पुरोडाशमनुनिर्वपन्ति समेधेन नः पशुनेष्टमसत्··· ····॥८॥ स वा एष पशुरेवालभ्यते यत्पुरोडाशः ॥"

अर्थात्—कदाचिद् देवाः पुरुषं पशुमालभन्त । तस्मादालब्धात् पुरुषात् मेधो निर्गत्याश्वं प्रविष्टः,तेनाश्वो मेध्योऽभूत् । देवा अश्वमालभन्त । तस्मादालब्धाद् अश्वान्मेधो निसृत्य गवि प्रविष्टः, तेन गौर्मेध्याऽभूत् । देवा गामालभन्त । तस्या आलब्धाया गोर्मेधो निर्गत्य अवि प्रविष्टः, साऽविर्मेध्याभूत् । देवा अविमालभन्त । तस्या मेधो निसृत्य अजं प्रविष्टः, तेनाजो मेध्योऽभूत् । देवा अजमालभन्त । तस्मादालब्धादजान्मेधो निसृत्येमां पृथिवीं प्रविष्टः, तेन सा पृथिवी मेध्याभूत् । तस्मादेत उत्क्रान्तमेधाः पशवः । देवा अजादुत्क्रान्तं मेधं पृथिव्यां प्रविष्टमन्वगच्छन् । स मेधः देवैरनुगतो व्रीहिरभवत् । यत् पशुयागे पुरोडाशमनुनिर्वपन्ति, तेन समेधः पशुरिष्टो भवति । स वा एष पशुरेवालभ्यते यत्पुरोडाशः ।

एतस्य पुराकल्परूपस्य अर्थवादस्य प्रयोजनं याज्ञिकानां मते पशुयागानन्तरं क्रियमाणस्य पशुपुरोडाशस्य प्रशंसनमस्ति । सत्यप्येवमेतेनार्थवादेनेदं स्पष्टं भवति, यत् पुरुष-अश्व-गो-अवि-अजा अमेध्या अर्थाद् यज्ञयोग्या न सन्ति । पुरोडाश एव यज्ञीयः ।

पशुयागेषु पशुपुरोडाशस्य विधानम्

पशुयागे **'यद्देवत्यः पशुस्तद्देवत्यः पुरोडाशः'** इति नियमेन पशुदेवतायै पुरोडाशस्यापि विधानं क्रियते । याज्ञिकाः पशुपुरोडाशं छिद्रापिधानार्थं मन्यन्ते । तेषां कथनमस्ति यदा यज्ञे हिंसितः पशुः स्वर्गे जीवितो भवति, तदा तस्य पशोः शरीरात् निष्क्रान्तानामङ्गानां यानि छिद्राणि सन्ति तेषां पूर्णताऽनेन पशुपुरोडाशेन भवति । वस्तुत इदं कल्पनामात्रम् । यतो हि यज्ञे हुतः पशुर्यज्ञप्रभावात् स्वर्गं प्राप्नोति, तर्हि किं तस्यैव यज्ञस्य प्रभावात् स सर्वाङ्गपूर्णो न भवितुमर्हति ? तथा इदमप्यत्र विचारणीयम्—यदि यज्ञे हुतः पशुः स्वर्गेऽपि-पशुयोनिमेव प्राप्नोति, तर्हि किमत्र तस्य यज्ञस्य माहात्म्यम् ? सा पशुयोनिस्तु

इह प्राप्तैवास्ति। तथा इदमप्यत्र चिन्त्यं किं याज्ञिकानां स्वर्गे पशवोऽपि भवन्ति ?

पश्वालम्भनस्याभावे यज्ञस्य पूर्तिः

पूर्वत्र (पृ० ८३) चरकसंहिताया यत् प्रमाणं निर्दिष्टम्, उपरिष्टाच्च महाभारतादीनां यानि प्रमाणानि उपस्थापयिष्यामः, तैरिदं स्पष्टं भवति—आदिकाले पशूनामालम्भनं न भवति स्म, केवलमालभनम्=स्पर्शमात्रमेव बभूव। यस्य यस्य पशोर्या या देवता अभवत् तां तां निर्दिश्य पशुं स्पर्शयित्वा स यज्ञीयः पशुरुत्सृज्यते स्म। अस्माभिर्वैदिकशाखानां ब्राह्मणग्रन्थानाञ्चानुसारेण इदमपि स्पष्टीकृतं यद् यज्ञीयाः पशव आधिदैविके सृष्टियज्ञ अग्निवाय्वादित्यपृथिव्यादयो विशिष्टाः पदार्था एव सन्ति। तेषां सृष्टियज्ञ आलम्भनं (=वधः=नाशः) नैव भवति स्म, अपि तु भौतिकानां देवानां स्पर्शेन (=सहयोगेन) तेषु गुणाधानमेव बभूव। अतः सृष्टियज्ञानुकृतिरूपेषु पशुयागेषु लौकिकपशूनामालम्भनं कथं भवितुमर्हति ? वस्तुतस्तु यथा सम्प्रत्यपि पुरुषमेधे पुरुषपशूनामश्वमेधे चारण्यपशूनां तत्तद्देवतानिर्देशपूर्वकमुत्सर्जनं भवति, तथैवादिकाल अन्यपशूनामपि उत्सर्ग एव भवति स्म। कस्यचिदपि प्रारम्भस्य कर्मणो मध्ये परित्यागोऽनुचितो भवति। अतः पुरुषयागेषु पशूनामुत्सर्गे कृते यज्ञकर्मपूर्त्यै आज्य-पुरोडाश-पयस्या-आमिक्षादीनां[1] द्रव्याणां विधानं

---

१. **आज्येन**—'तस्मिंस्त्वाष्ट्रं साण्डं लोमशं पिङ्गलं पशुमुपाकृत्य पर्यग्निकृतमुत्सृज्याज्येन शेषं संस्थापयेत्। यावन्ति पशोरवदानानि स्युस्तावत्कृत्व आज्यस्यावद्येत्। पशुधर्माज्यं भवति'। (आप० श्रौत १४।७।१३-१५)। अत्र त्वाष्ट्रस्य पात्नीवतः पशोरुत्सर्जनं विधाय आज्येन तत्कर्मसमाप्तिरुक्ता।

पुरुषमेधेऽपि 'स्विष्टकृद् वनस्पत्यन्तरे पुरुषदेवताभ्यो जुहोति' (कात्या० श्रौत २१।१।१३)। 'पुरुषाणां या ब्रह्मादयो देवताः.....ताभ्यः प्रत्येकं सकृद् गृहीतमाज्यं ब्रह्मणे स्वाहा क्षत्राय स्वाहा इत्येवं पदं चतुर्थ्यन्तमुच्चार्य स्वाहाकारेण जुहुयात्' (विद्याधरीया व्याख्या)।

पुरोडाशेन—अभिचाररूपे 'गो'संज्ञके सोमयागे अग्नीषोमीयपशोरालम्भनं न भवति। तत्र 'अग्नीषोमीयस्य स्थानेऽग्नीषोमीय एकादशकपालः' (आप० श्रौत २२।३।१०) इत्यनेन अग्नीषोमीयस्य एकादशकपालस्य पुरोडाशस्य विधानं क्रियते।

पयस्यया—'उभयाभावे पयस्या' (कात्या० श्रौत १०।६।१६)। वशाया

तत्तत्प्रकरणेषु दृश्यते। संभवतः **यद्देवत्यः पशुस्तद्देवत्यः पुरोडाशः** इत्यस्य विधानमप्यारम्भे अनया दृष्ट्यैव कृतं स्यात्। सत्येवं, पशुदेवत्यस्य पुरोडाशस्य **छिद्रापिधानार्थं**रूपोऽर्थवादोऽप्युपपद्यते। उत्तरकाले यदा यज्ञेषु पशूनामालम्भनं प्राचलत्, तदापि पौर्वकालिकं पुरोडाशविधानमपि सम्बद्धमेवातिष्ठत्।

पुरस्तादस्माभिरैतरेयब्राह्मणस्य यत्सुदीर्घमर्थवादवचनम् अलेखि। तेनापीदमेव ध्वन्यते यत् पुरुषादीनां पशूनामङ्गैर्यज्ञो न भवितुमर्हति। यतस्ते उत्क्रान्तमेधाः सन्ति। तेषां मेधाः पृथिवीं प्रविश्य व्रीहिरूपेण प्राकाट्यमलभन्त। अतो व्रीहिरेव मुख्यं यज्ञीयं द्रव्यं वर्तते। सत्येवं यदि पुरुषादिभिः पशुभिरेव यज्ञः क्रियते, तर्हि स उत्क्रान्तमेधेन (=अमेध्येन) पदार्थेन कृतं स्यात्। इदमप्यत्रास्ति विचारणीयम्—देवैः पुरुषादीनामालम्भने कृते, यदा पुरुषादय उत्क्रान्तमेधा बभूवुस्तदा पुनरेतेषु मेध्यत्वं कथम् उदपतत्? एतद् वैदिकवाङ्मयस्य नहि कस्मिंश्चिदपि ग्रन्थ उक्तम्।

वस्तुत ऐतरेयब्राह्मणस्य पूर्वोक्तोऽर्थवादोऽपि पुराकल्परूप एव। अत एतस्मिन् निर्दिष्टाः **'पुरुष-अश्व-गो-अवि-अजा'** अपि सृष्टिगता विभिन्ना लोकलोकान्तरा एव। **एभ्यो मेधस्य** (=शक्तेः) उत्सर्जनं सर्वदा भवति, तच्च मेधोत्सर्जनं रश्मिभिर्वर्षाजलैर्वा इमां भूमिं प्राप्नोति। तेनैव व्रीहियवादय ओषधिवनस्पतय उत्पन्ना भवन्ति। द्रव्यमयस्य यज्ञस्य एते व्रीह्यादय ओषधय एव मेध्याः पदार्थाः सन्ति।

शास्त्रकाराणामिदं कथनमस्ति—**यदन्नः पुरुषो भवति तदन्नास्तस्य देवता**[1] इति। एवं सति निरामिषभोजिनाम् ऋषिमुनीनां ब्राह्मणवर्णस्थानां यजमानानां च देवता अपि निरामिषा एव भवन्ति। सत्येवं कथं ताभ्यो देवताभ्यो यज्ञेषु पश्वङ्गानां प्रदानं भवितुमर्हति? वेदार्थपारिजाते करपात्रस्वामिना गवालम्भनस्य निराकरणन्तु प्रयत्नपूर्वकमकारि, परं साहसिकेन स्वामिनोत्तर-

---

गोः उष्णीरप्यभावे पयस्या कार्या। कलौ गवालम्भनस्य निषिद्धत्वात् पयस्यायाग एव तत्स्थाने कार्यः (विद्याधरीया व्याख्या)।

आमिक्षया—मैत्रावरुणीमामिक्षामनूबन्ध्यायाः स्थाने वट्वृचाः समामनन्ति' (आप० १३।२४।१०)। अनूबन्ध्याया वपायां हुतायाम् आमिक्षाया वा प्रधाने इष्टे.....' (आप० श्रौत १४।७।१२ रुद्रदत्तवृत्तिः)। अनूबन्ध्यास्थाने मैत्रावरुण्यामिक्षा।' (आप० श्रौत २२।३।११)।

१. द्र०—यदन्नः पुरुषस्तदन्ना स्याद् देवता। निदानसूत्र १०।६॥

रामचरितादिग्रन्थेषु प्रत्यक्षम् उल्लिखितस्य गोवत्सस्य गवां चालम्भनमपि न स्वीकृतम्। तेन स्वामिनेदमपि प्रतिज्ञातं यद् कदाचिदपि गवालम्भनं न भवति स्म। इदं सर्वमपि करपात्रस्वामिनः कथनं**'गतानुगतिको लोको न लोकः पारमार्थिकः'** इत्याभाणकानुसारमेव। यदि करपात्रस्वामी ब्राह्मणश्रौतादिषु निर्दिष्टं गवालम्भनं स्वीकुर्याच्चेत् समस्ता अपि वैदिकधर्मानुयायिनः तस्य स्वामिनो ब्राह्मणश्रौतादिग्रन्थानाञ्च विरोधिनो भवेयुः। अनेनैव भयेन सः संन्यस्तोऽपि स्वामी 'कस्मिन्नपि काले गवालम्भनं न भवति स्म' इति मिथ्याडम्बरं रचितवान्। यदि भूतकाले पुराणपन्थिनो गवालम्भनं नाचरन्ति स्म, तर्हि श्रौतगृह्यादिषु महाभारते पुराणेषु च गवालम्भनस्योल्लेखः कथङ्कारमुपलभ्यते। इमे करपात्रस्वाम्यादयः श्रौतगृह्यादिषु न तु प्रक्षेपं मन्तुमर्हन्ति, न च वेदविरुद्धत्वाद् एषामप्रामाण्यमपि वक्तुं शक्नुवन्ति। अतो नास्ति करपात्रस्वामिनः सकाशे किमपि शरणमिति कृत्वा मिथ्याप्रलापैः श्रद्धालून् जनान् वञ्चयन्ति। नैतावदेव, कलिवर्जप्रकरणे पठितम्—

अश्वालम्भं गवालम्भं संन्यासं पलपैत्रिकम्।
देवराच्च सुतोत्पत्तिं कलौ पञ्च विवर्जयेत्॥

इति वचनं करपात्रस्वामिना प्रमाणभूतं स्वीकृतम्[1]। सत्येवं यदि गोरालम्भनं भूतकाले न कदापि समाचरितम्, तर्ह्युक्तवचने कलौ गवालम्भनस्य निषेधः कथङ्कारं विहितः? प्रतिषिद्धमश्वालम्भनमपि, कलौ पुष्यमित्रादिभिरनेकैः राजभिः, जयपुरमहाराजेन जयसिंहेन च समाचरितोऽश्वमेधो भवन्मतानुयायिभिर्याज्ञिकैः कथं सम्पादितम्? नैतावदेव, कलौ तु संन्यासोऽपि वर्जितः, तथा सति भवत्सदृशां परसहस्राणां कलियुगे संन्यासधारणं किं धर्मविरुद्धं नास्ति[2]?

---

१. अश्वालम्भं..... पञ्च विवर्जयेत् इति वचनं बहुनिबन्धकृच्चर्चितत्वात् प्रमाणभूतमेव। वेदार्थपारिजात, भाग २, पृष्ठ २०४६।

२. प्रश्नोऽयं करपात्रस्वामिनो हृदयेऽप्युदितः। अत एवास्य समाधानाय **'यावद् वर्णविभागः स्याद् यावद्वेदः प्रवर्तते। अग्निहोत्रं च संन्यासं तावत्कुर्यात् कलौ युगे॥'** इत्यनिर्दिष्टग्रन्थस्य वचनान्तरमुपस्थाप्य यथाकथंचित् सन्तोषमलभत (द्र०—वेदार्थपारिजात, भाग २, पृष्ठ १६७६)। करपात्रस्वामिनो मतानुसारेण कलौ वित्तैषणायाः पुत्रैषणाया लोकैषणाया निवृत्तेर्दुष्करत्वात् संन्यासस्य प्रतिषेध उक्तः (द्र०—वे० पा० भाग २, पृष्ठ १६७६)। सत्येवं

अपि च, गवातिरिक्तैरजाश्वमेषादिभिरन्यैः पशुभिः करपात्रस्वामिनः किमपराद्धम्, यत्तेषां यज्ञ आलम्भनविधानाय बहूनि पृष्ठानि कृष्णानि कृतानि । तथा चोक्तं करपात्रस्वामिना—

याज्ञिकपशुवधोऽपि पशूनां स्वर्गप्रापकत्वात् पशुयोनिनिवारणपूर्वकहिरण्यशरीरप्राप्तिहेतुत्वात् पशूपकारक एव।··· ·····यज्ञे पशूपयोगस्तु पशुकल्याणाय भवति ।·····यस्मात् पशुरपकृष्टयोनेर्विमुक्तो देवयोनौ जायते । वेदार्थपारिजात भाग २,पृष्ठ १९७७,१९७८ ।

करपात्रमहोदय ! 'किं भवान् गां पशुयोनिं मन्यत उत देवयोनिम् ? यदि पशुयोनिः स्वीक्रियते तर्हि तस्या अपकृष्टयोनेर्गां विमुच्य दिव्यहिरण्यशरीरस्य प्राप्तिपूर्वकं स्वर्गप्रापणस्य श्रेयसा कथं भवान् आत्मानं वञ्चयति ? तामपि श्रौतसूत्रग्रन्थानुसारं यज्ञेष्वालम्भ्यापकृष्टयोनेर्विमुक्तेरवसरं कथं न ददाति ? **गोरालम्भनं नहि क्वचिद् विहितमिति** कुतो मिथ्याप्रपञ्चं विदधाति, तदर्थं च सर्वत्र गोशब्दस्यार्थान्तरं कल्पयति' ।

अभ्युपगमसिद्धान्तेन पशुयागेषु विचारः

यद्यभ्युपगमसिद्धान्तेन दुर्जनसन्तोषन्यायेन वापि पशुयागविषये विचारः क्रियेत, तथापीदं स्वीकर्तव्यमेव भवति यद् यज्ञेषु पशुहिंसा वर्जितास्ति । समस्ता अपि द्रव्यमया यज्ञा आधिदैविकान् सृष्टियज्ञान् प्रत्यक्षवत् परिज्ञापनाय रूपका नाटकानि वा सन्ति । यज्ञानां विषये सम्पूर्णस्य वैदिकवाङ्मयस्यायमेव सारः । एतस्मिन् विषये आरम्भ एवास्माभिर्विस्तरेण लिखितम् । अतो यदि सृष्टियज्ञे केषाञ्चित् पशूनां (=द्रव्याणां) आलम्भनं (=हिंसनम्) भवति, तेषां च वर्णनं मन्त्रेषूपलभ्यते, तथा सत्यपि यदा सृष्टियज्ञस्य परोक्षां प्रक्रियां प्रत्यक्षरूपेण विज्ञापयितुं तां द्रव्यमययज्ञेषु नाटकरूपेण प्रस्तुमः, तदा नाट्यसम्प्रदायस्य यथावत् परिपालनमावश्यकम् । भारतीये नाट्यसम्प्रदाये नाटकप्रस्तुतिकाले हिंसा प्रतिषिद्धा वर्तते ।

किं संन्यासस्य प्रतिप्रसवात्मकेन **'यावद् वर्णविभागः स्याद्'** इति वचनम् एषणात्रययुक्तस्य पुरुषस्य संन्यासविधानार्थमस्ति? संभाव्यते पौराणिकसम्प्रदायानां लक्षपतीनां मठाधीशानां करपात्रस्वामिसदृशानाम् एषणात्रयाभिभूतानां जनानां संन्यासविधानायैव वचनमिदं कल्पितं स्यात् । वैदिकमर्यादानुसारं तु एकयाऽप्येषणया ग्रस्तः पुरुषः संन्यासस्याधिकारी न भवति, किमु एषणात्रयग्रस्ताः पुरुषाः ।

काव्यानि श्रव्य-दृश्यभेदेन द्विविधानि। श्रव्यकाव्यानि रामायणमहाभारतादीनि, दृश्यकाव्यानि विक्रमोर्वशी-अभिज्ञानशाकुन्तलादीनि। श्रव्यकाव्येषु रामायणमहाभारतादिषु रामरावणयुद्धस्य कौरवपाण्डवयुद्धस्य च यथावद् वर्णनं कृतम्। तस्मिन् घातप्रत्याघातादीनामेतादृग् वर्णनं प्रस्तुतम्, येन पठतां सहृदयानां पाठकानां पुरस्ताद् युद्धस्य घातप्रत्याघातरूपा घटना हस्तामलकमिव उपतिष्ठन्ति। परन्तु यदा ईदृशान् प्रसङ्गान् आधारीकृत्य नाटकानां रचना भवति, तदा एषु घातप्रत्याघातादीनां वर्णनं न क्रियते। अत एव रंगमञ्चेऽपि तासां निदर्शनं न भवति। अस्यैव लौकिकस्य नाट्यधर्मस्य यज्ञीयनाटकेष्वपि परिपालनमावश्यकम्। सत्येवं, यज्ञेषु पशोः साक्षात् हिंसाया निदर्शनं न भवितुमर्हति। यज्ञार्थं सम्पादितानां पशूनां कर्मणो मध्य एव पर्यग्निकरणसंस्कारानन्तरमुत्सर्जनं भवति। अवशिष्टस्य नाटकरूपस्य कर्मणः परिपूर्तिः पुरोडाशादिद्रव्यैः सम्पाद्यते।

वैष्णवसम्प्रदाये पशुयागः

वैष्णवसम्प्रदायः पूर्णतो निरामिषभोजी वर्तते। सोऽपि वेदान् अन्यसम्प्रदायवत् स्वतःप्रमाणान् मन्यते। तस्य पुरस्ताद् यदा यज्ञेषु पश्वालम्भनस्य समस्या समुत्पन्ना, तदा तेन पश्वालम्भनात् स्वात्मानं रक्षणाय पिष्टपशुयागस्य कल्पना कृता। माध्वसम्प्रदायस्य आचार्यैः पिष्टपशोः सिद्धयर्थं बहु प्रयतितम्। साक्षात् पशोः स्थाने प्रतिनिधिरूपेण पिष्टपशोर्विधानमपि याज्ञिकपरम्पराया अनुरूपं नास्ति। प्रतिनिधिद्रव्यस्य ग्रहणं सर्वत्र प्रधानद्रव्यस्य नाशे तदप्राप्तौ चोपदिश्यते। पिष्टपशुवादिनां कृते वयमेकमेतादृग् वचनम् उद्धरामः, यत् सम्भवतः तेषामज्ञातमेव स्यात्।

चातुर्मास्यवरुणप्रघासपर्वणि यवानां पिषाणेन मेषमेष्योर्विधानं शतपथब्राह्मण इत्थमुपलभ्यते—

"तद्यन्मेषश्च मेषी च भवतः। एष वै प्रत्यक्षं वरुणस्य पशुर्यन्मेषः। तत्प्रत्यक्षं वरुणपाशात् प्रजाः प्रमुञ्चति। यवमयौ भवतः।" (शत० ब्रा० ३। ५।२।१६)।

वैष्णवसम्प्रदायस्य पिष्टपशुयागपक्षे तदपि प्रमाणमुपस्थापयितुं शक्यते यदस्माभिः पूर्वत्र (पृ० ८६-८७) उद्धृतम्। तदनुसारेण पुरुषादिभ्य मेधो उत्क्रम्य पृथिवीं प्रविश्य व्रीहिरूपेण प्रकटितो बभूव। पशुभ्यो मेधस्योत्क्रमणात् ते अमेध्या अभवन्। अमेध्यपदार्था यज्ञे प्रयोगार्हा न भवन्ति। अतः साक्षा-

त्पशवो यज्ञेषु अप्रयोगार्हाः, तेषां स्थाने पशुपुरोडाशा एव प्रयोगार्हाः। एवं पशुपुरोडाशमेव वैष्णवसम्प्रदायस्याचार्याः पश्वाकृतिरूपेण निर्माय पिष्टपशुयागं प्रयुञ्जते। इत्थं पशुयागसम्बन्ध अस्माभिः पुरस्ताद्यद् लिखितम्, तस्यायं संक्षेपः—

१—वेदप्रतिपादिताः पशुयज्ञाः सृष्टियज्ञस्यैव भागाः सन्ति (पृष्ठ ४५)।

२—आधिदैविकपदार्थानां कृते पशुशब्दस्य व्यवहारः (पृष्ठ ४८)।

३—आलते आलभेत पदयोः सम्बन्धे विचारः (पृष्ठ ५५)।

४—आलभ आलम्भ द्वौ स्वतन्त्रौ धातू (पृष्ठ ५७)।

५—लभलम्भयोर्विभिन्नार्थाः (पृष्ठ ५९)।

६—अग्निपशोरालम्भनं, तेन च यजनम् (पृष्ठ ६१)।

७—वायुपशोरालभनं, तेन च यजनम् (पृष्ठ ६४)।

८—सूर्यपशोरालभनं, तेन च यजनम् (पृष्ठ ६५)।

९—वशाया अवेरालभनम् (पृष्ठ ६८)।

१०—प्रसिद्धाः पशुयागाः (पृष्ठ ७०)।

११—पुरुषमेधस्य पुरुषः, तस्य चालम्भनम् (पृष्ठ ७१)।

१२—अश्वमेधस्याश्वः, तस्य चालम्भनम् (पृष्ठ ७६)।

१३—गोमेधस्य गौः, तस्याश्चिचालम्भनम् (पृष्ठ ८२)।

१४—अविमेधस्याविः, तस्याश्चिचालम्भनम् (पृष्ठ ८४)।

१५—अजमेधस्याजः, तस्य चालभनम् (पृष्ठ ८४)।

१६—पशुयज्ञसम्बधिन एकस्यार्थवादस्य सम्बन्धे विचारः (पृष्ठ ८५)।

१७—पशुयागेषु पशुपुरोडाशस्य विधानम् (पृष्ठ ८६)।

१८—पश्वालम्भनस्याभावे यज्ञपूर्तिः (पृष्ठ ८७)।

१९—अभ्युपगमसिद्धान्तेन पशुयागेषु विचारः (पृष्ठ ९०)।

२०—वैष्णवसम्प्रदाये पशुयागाः (पृष्ठ ९१)।

यज्ञेषु पुराकाले पशूनामालम्भनं न भवति स्म, तस्यारम्भस्तूत्तरकाले बभूव इत्यस्माभिः पुरस्ताद् निदर्शितम्। यज्ञेषु पशुहिंसा कस्मिन् काले कथं प्रारब्धा इत्यस्य निदर्शनायेदमपि विचारणीयम्—यद् आदिमानवा निरामिषभोजिन

आसन्, उत वा मांसाहारिणः। साम्प्रतिकाः तथाकथिता वैज्ञानिका मानवशरीरविज्ञानं मानवमानसविज्ञानञ्चावहेल्य कथयन्ति यद् आदौ मानवा आरण्यानां पशूनामाखेटं कृत्वा तेषां मांसैः स्वक्षुधां शमयन्ति स्म। फलमूलैर्निर्वहणं कृष्या चान्नोत्पादनं तैर्बहुकालानन्तरं समधिगतम्।

कल्पनाया अपेक्षयेतिहासस्य प्रामाण्य दृढतरं भवति। तदर्थमिदं द्रष्टव्यं यदेतस्मिन् सम्बध इतिहासः किं ब्रवीति ? अनेनैव साकं मानवशरीररचनायाः सम्बन्धेऽपि विचारणा अत्यन्ताऽऽवश्यकी वर्तते।

आदिमानवा निरामिषभोजिनः

न केवलं भारतीयवाङ्मयमिदं तथ्यं प्रकटयति, अपि तु सर्वसम्प्रदायानामादिग्रन्था अपीदमेव तथ्यं प्रतिपादयन्ति यत् सृष्टेरादौ मानवाः कन्दमूलफलैरकृष्टपच्यैरर्थात् स्वयमुत्पन्नैरन्नैर्निर्वाहं चक्रुः[1]। मांसाहारिणाम् ईसाई-मुसलमानानां बाइबल-कुरानग्रन्थयोरुल्लिखिता हव्वाऽऽदमयोः कथा इदमेव तथ्यं प्रकाशयति। ईश्वरेणैतावादिमानवौ 'अदनस्य' उद्याने रक्षयित्वा एकं फलं परित्यज्य समेषां फलानां भक्षणस्यानुज्ञा प्रत्ताऽऽसीत्।

विकासमतानुयायिनोऽनुमानाभासस्याधारेण आदिमानवान् असभ्यान् आखेटजीविनो मन्यन्ते। एतस्य प्रामाण्ये विविधस्थानेषु उत्खननेनोपलभ्यमानानि पाषाणानां कतिपयानि कल्पितशस्त्राण्यपि विकासवादिनां मतानुसारेण पञ्च-सप्तवर्षसहस्रेभ्यः पुरातनानि न सन्ति। भारतीयैतिह्यग्रन्थैरन्यदेशीयग्रन्थैश्च परिज्ञायमानं मानवैतिह्यमतिपुरातनं वर्तते। भारतीय-इतिहासस्तु न्यूनातिन्यूनम् अष्टादशवर्षसहस्राणां क्रमबद्धरूपेणोपलभ्यते। सत्येवं, सत्येतिहासस्य विद्यमाने वृथानुमानस्योदय एव न भवति। भारतीयैतिह्यस्यानुसारेणादिमानवाः कन्दमूलफलानि अकृष्टपच्यानि चान्नानि बुभुजिरे। मानवसमाजे मांसाहारस्य प्रचलनम् उत्तरकाले बभूव (एतस्मिन् विषय अग्रे वक्ष्यते) आधुनिकानामैतिहासिकानामनुसारेण सर्वप्राचीन ऋग्वेदाख्ये धर्मग्रन्थे स्पष्टमुक्तम्—**अजीजन ओषधीर्भोजनाय** (ऋ० ५।८३।१०) इत्थमेवाथर्ववेदेऽपि दन्तानुद्दिश्योक्तम्—

व्रीहिमत्तं यवमत्तमथो माषमथो तिलम्।
एष वां भागो निहितो रत्नधेयाय·····।। (६।१४०।२)

---

१. द्र०—पं० भगवद्दत्तकृत 'भारतवर्ष का बृहद् इतिहास' भाग १, पृष्ठ २१०-२१२ (द्वि० सं०)।

अस्मिन् मन्त्रे स्पष्टरूपेण दन्तानां भागा व्रीहि-यव-माष-तिला निर्दिष्टा न तु मांसम् ।

शरीरविज्ञानस्य साक्ष्यम्—भारतीयाः पाश्चात्याश्च सर्वेऽपि चिकित्सकाः समानरूपेण स्वीकुर्वन्ति यन्मानवानां दन्तानामुदरस्थानामान्त्राणाञ्च रचना मांसाहारिणां जीवानामिव नास्ति,अपि त्वेषां कन्दफलमूलभक्षिणां वानराणामिव वर्तते । अत एव सम्प्रत्यनेके पाश्चात्याश्चिकित्सकाः नीरोगजीवनाय मांसाहारस्य त्यागमावश्यकं मन्यन्ते ।

नैतावदेव, घासतृणफलमूलभक्षकाः पशवो बुभुक्षया म्रियमाणा अपि न कदाचिन्मांसं भक्षयन्ति । नैव केनापि वानरा मृगादिपशवश्च मांसं भक्षयन्तो दृष्टाः । मानवोऽपि स्वभावेन निरामिषभोजी वर्तते । अतः स आदिकाले मांसाहारे स्वभावतः प्रवृत्तो नैव भवितुमर्हति ।

मांसाहारस्यारम्भः

पूर्वमस्माभिरुक्तम् यत् प्रजापतेः कश्यपस्य दितिसंज्ञकाया भार्याया उत्पन्ना दैत्या अर्थाद् असुरा अस्याः पृथिव्याः प्रथमशासका आसन्[1] । त अत्यन्तं बलवन्तोऽभूवन् । अत एव ते असुरा (असु=प्राण+र=युक्तः[2]) इति नाम्नः प्रसिद्धि गताः[3] । एते दैत्या आदौ श्रेष्ठाचारसम्पन्ना अभूवन् । अत एव ते देवशब्देन प्रसिद्धिमगच्छन् । उत्तरकाले एषामसुराणामाचाराद् भ्रष्टेषु सत्सु अदितिसुतेभ्यो भेदनिदर्शनायेमे असुराः पूर्वदेव शब्देन प्रसिद्धा अभूवन्[4] ।

यूनानदेशीयग्रन्थेषु देवानां त्रिस्रः कोटयो निर्दिष्टः[5] । तत्र प्रथमकोटिस्था देवा एतेऽसुरा एव । हरक्यूलिसः (सुरकुलेशः=विष्णुः) द्वितीयकोट्या देवः,

---

१. द्र०—पूर्वत्र पृष्ठ ५२ । तथा 'भारतवर्ष का बृहद् इतिहास' भाग १, पृष्ठ २१३-२१५ (द्वि० सं०) ।

२. मत्वर्थीयो 'र' प्रत्ययः । यथा—पाण्डुरः, पांसुरः, नगरः ।

३. तस्य वा असुरेवाजीवत्, तेनासुना सुरान् असृजत । तदसुराणामसुरत्वम् । मै० सं० ४।२।१॥

४. अमरकोश १।१।१२ । स पूर्वदेव-चरितम्·····महा० सभा० १।१७॥ पूर्वदेवो वृषपर्वा दानवः (नीलकण्ठटीका)। देवान् यज्ञमुषश्चान्यान् असृजत् । द्र०—महा० वनपर्व २२०।१०। अत्र देवानां विशेषणं 'यज्ञमुषः' निर्दिष्टम् । अत एते पूर्वदेवा असुरा ज्ञेयाः । द्र०—असुरसृष्टिमाह—देवान् । नीलकण्ठटीका ।

५. भारतवर्ष का बृहद् इतिहास, भाग १, पृष्ठ २१३-२१५ (द्वि० सं०)।

तथा वेक्कसः (=विप्रचित्तिः=दानवः) तृतीयकोट्या देवः । दैत्यानां पृथिव्यां निष्कण्टकाधिपत्यात् शनैः शनैस्तेष्वहङ्कारः समुत्पन्नः । तेन च कामक्रोधलोभमोहादयो दुर्गुणाः प्रादुर्बभूवुः । तैः सह सुरापानमांसाहारयोः प्रवृत्तिरभूत् । तथा सति शरीरपोषणमेव तेषां लक्ष्यमभवत्[1] । अस्यामवस्थायाम् असुरशब्दः 'असुषु रमते' इति निर्वचनानुसारं निन्दार्थस्य वाचकः समजायत । अदितेः सुता इन्द्रादयोऽसुरेभ्यः कनीयांसा आसन् । तेभ्योऽसुराः पृथिव्याः भागं (=राज्यम्) नैव प्रददुः[2] । अतो दायभागं निमित्तीकृत्यासुरेषु देवेषु च विरोध उदपद्यत । तद्धेतुका द्वादश महान्तो दैवासुरसङ्ग्रामा बभूवुः[3] । अन्ते च देवा असुरान् पराजित्य तान् स्वर्गान्निर्गमयामासुः[4] । अनन्तरं महता विजयेनैश्वर्यस्य च मदेन देवेष्वपि तामसी प्रवृत्तिः प्रावर्धत । तेऽपि आचारादिषु उच्छृंखलाः सन्तो मांसाहारादिषु च प्रावर्तन्त । देवेषु विष्णुरेक एव मांसाहारदोषान्निर्मुक्त आसीत्[5] । निवृत्तिमार्गानुयायिनः स्कन्दादयः केचन अन्येऽपि देवा मांसाहारदोषान्निर्मुक्ता आसन् ।

त्रेतायुगस्यारम्भपर्यन्तम् ऋषिमुनीनां महत्याऽनुकम्पया आर्या आचारविचारेषु सर्वथा पवित्रा आसन् । तदनन्तरं भिन्नमर्यादानां देवानां विशेषसंसर्गेणार्यराजेष्वपि मांसाहारस्य प्रवृत्तिरुद्भूयोत्तरोत्तरं प्रावर्धत । सत्यप्येवम्, ऋषिमुनयः तां प्रवृत्तिं मर्यादायां स्थापनाय समये समये 'वृथा मांसं नाश्नीयात्' इत्यादिप्रतिबन्धान् विदधिरे । एतेन प्रयत्नेनोच्चवर्गीया उच्चकुलीनाश्च मद्यमांसादिदोषेभ्यो मुक्ता अतिष्ठन्त ।

---

१. छान्दोग्योप० ८।८।२-५ ॥

२. असुराणां वा इयं पृथिव्यासीत्, ते देवा अब्रुवन् दत्त नोऽस्याः पृथिव्याः । मै० सं० ४।१।१० । तुलना कार्या—काठकसंहिता ३१।८ ॥

३. तेषां दायनिमित्तं वै संग्रामा बहवोऽभवन् । वराहेऽस्मिन् दश द्वौ च षण्डामर्कान्तिगाः स्मृताः । वायुपु० ९७।७२॥

४. ततो वै देवा इमामसुराणामविन्दत, ततो देवा असुरान् एभ्यो लोकेभ्यो निरभजन् । मै० सं० ४।१।१० । तु० कार्या—काठक सं० ३१।८॥

५. इदमेव कारणं यत् समस्ता अपि वैष्णवा निरामिषभोजिनः सन्ति । लोकेऽपि 'वैष्णव-भोजनालय' 'वैष्णव ढाबा' इत्यादिनामपट्टप्रयोगेण निरामिषभोजनालयः प्रतीयते ।

यज्ञेषु पशुहिंसायाः प्रवृत्तिः

पूर्वमस्माभिर्वर्णितं यद् यज्ञानां प्रादुर्भावः प्रथममसुरेष्वजायत, तदनन्तरञ्च देवा यज्ञान् प्रावर्तयन्[1]। इन्द्रः शतं महाक्रतून् समाहृत्य 'शतक्रतुः' नाम लेभे। अनन्तरञ्च यज्ञानां प्रचारो मानवेषु समजायत। मानवेषु यज्ञप्रवर्तनं त्रेतायुगस्यारम्भे कृतयुगस्य वान्ते बभूव[2]। शनैः शनैर्मानवेषु यज्ञानां प्रवृत्तिः प्रावर्धत। तथा च शतशः काम्यानां नैमित्तिकानाञ्च यज्ञानां सृष्टिरभूत्।

कृतयुगे यदा यज्ञानां प्रवृत्तिर्देवेष्वेवासीत् तस्मिन् काले कदापि यज्ञेषु पशूनामालम्भनं नाभवत्। उत्तरकाले यदा देवेषु मांसाहारस्य प्रवृत्तिर्जनिं लेभे, तदा इन्द्रेण यज्ञेषु पशुहिंसा प्रावर्ति। ऋषिभिरस्यानर्थरूपस्य कर्मणो महान् विरोधः कृतः। इन्द्रादिभिर्देवैरहङ्कारमदमत्तैर्ऋषीणां वचनं न स्वयकारि। इत्थं यज्ञेषु पश्वालम्भनं देवैः प्रारम्भि।

एतस्मिन् विषये कानिचिद् ऐतिहासिकानि प्रमाणान्युपस्थापयाम:—

(१) महाभारतस्याश्वमेधिकपर्वणः ९१ तमेऽध्याये, शान्तिपर्वणः ३३७ तमेऽध्याये, अनुशासनपर्वणः ११५ तमेऽध्याये, मत्स्यपुराणस्य १४२ तमेऽध्याये, वायुपुराणस्य च ५७ तमेऽध्याये; **उपरिचरस्य वसोः** कथा विस्तरेणोपलभ्यते। तस्यायं संक्षेपः—

"इन्द्रेण सर्वप्रथममश्वमेधयागे पशूनामालम्भनमकारि। **दीर्घदर्शिण ऋषय इमं नूतनमनर्थं दृष्ट्वोद्विग्ना बभूवुः**। तैरुक्तो **वेदेषु पशुहिंसाया विधानं नास्ति**। यदि आगमस्थविधिना यजनीयं चेत् त्रिवर्षाधिकपुराणैरजसंज्ञकैः (= **अप्ररोहिभिः**) बीजैर्यज। मदमोहयोर्वशीभूय इन्द्रेण ऋषीणां वचनं न स्वीकृतम्। इन्द्रेण देवैश्चास्य निर्णयार्थमुत्तानपादस्य पुत्रः उपरिचरो वसुः मध्यस्थत्वेन स्वीकृतः। उपरिचरेण वसुना देवानाम् ऋषीणां च बलाबलं विचार्य

---

१. द्र०—पूर्वत्र पृष्ठ ५१।

२. द्र०—पूर्वत्र पृष्ठ २७, टि० ३।

३. अयं पृषध्रो न मनोः पुत्र इति चरकसंहिताया उक्तवचनेन स्पष्टम्। यतश्चरकस्य वचने मनुपुत्रेभ्यः पृषध्र औत्तरकालिको निर्दिष्टः। अस्मन्मतेऽयं पृषध्रः पुरुरवसः पौत्रो **नहुष** एवेत्युपरिष्टात् स्पष्टं भविष्यति। अयमेव किञ्चित् कालाय इन्द्रपदे प्रतिष्ठापितोऽभूत्।

देवानां पक्षे स्वनिर्णयः प्रदत्तः। ऋषिभिः पक्षपातेन मिथ्यानिर्णयप्रदानहेतोरुपरिचरो वसुः शप्तः।"

(२) अग्निवेशकृतायाः (विक्रमात् पञ्चवर्षसहस्रपूर्वभाविन्याः) वैशम्पायनेन चरकनाम्ना प्रसिद्धेन प्रतिसंस्कृतायाः (विक्रमात् त्रिवर्षसहस्रपूर्वभाविन्याः) चरकसंहितायाः चिकित्सास्थाने (१९।४) एकं महत्त्वपूर्णं वचनमस्माभिः पूर्वत्र (पृ० ५७) उद्धृतम्। तेन वचनेन पञ्च तथ्यानि स्पष्टी भवन्ति—

(क)—आदिकाले (=कृतयुगे) यज्ञेषु पशूनामालम्भनं न भवति स्म।

(ख)—[मानवेषु] सर्वप्रथमं मनोः पुत्रैः यज्ञेषु पशूनामालम्भनं प्रावर्ति।

(ग)—वेदेषु पशूनामालम्भनस्य विधानमस्ति इति मिथ्याज्ञानकारणादेव यज्ञेषु पशुहिंसारूपा निन्दनीया प्रवृत्तिः प्रारब्धा।

(घ)—आङ्पूर्वकौ लभलम्भौ द्वौ स्वतन्त्रौ धातू स्तः।[1]

(ङ)—गवालम्भस्य प्रवृत्तिः पृषध्रस्य (अयं मनुपुत्रात् पृषध्रादौत्तरकालिकः पुरूरवसः पौत्रः) काले अभूत्।

(३) पूर्वोद्धृतस्य चरकवचनस्य संपुष्टिः 'वसिष्ठधर्मसूत्रस्य' वचनेन भवति तदुक्तम्—

त्रय एव पुरा रोगा ईर्ष्या अनशनं जरा।
पृषध्रस्तनयं हत्वा अष्टानवतिमाहरेत् ॥(२१।१३)

अत्र उत्तरार्धस्य पाठो भ्रष्टो वर्तते। शुद्धः पाठः 'पृषध्रस्त्वघ्नियां हत्वा अष्टानवतिमाहरत्' इति ज्ञेयः (द्र०—अग्रिममुद्धरणम्)।

वसिष्ठधर्मसूत्रस्यायं भावः—पुरा [मानवेषु] केवलं त्रय एव रोगा आसन्—ईर्ष्या, क्षुधा, जरा च। पृषध्रो गवामालम्भनं विधाय अष्टानवतिसंख्याकान् नूतनान् रोगानुत्पादितवान्।

(४) पूर्वं वसिष्ठधर्मसूत्रस्य यद् वचनमुद्धृतम्, तस्य सर्वथा समाना प्रतिच्छाया ब्राह्मणधम्मिकसुत्तस्य[2] अष्टाविंशे वचन उपलभ्यते। तत्रोक्तम्—

तयो रोगा पुरे आसुं इच्छा अनशनं जरा।
पसूनं च समारम्भा अट्ठनावुतिमाण गमुं॥

(५) जैनाचार्येण उग्रादित्येन स्वविरचिते 'कल्याणकारक'नामके वैद्यक-

---

१. द्र०—पूर्वत्र पृष्ठ ५७। २. खुद्दकनिकायान्तर्गते सुत्तनिपाते।

ग्रन्थे २७४ तमे पृष्ठेऽप्ययं प्रसङ्ग उपलभ्यते। यथा—

अवन्तिषु तथोपेन्द्रः पृषध्रो नाम भूपतिः।
विनयं समतिक्रम्य गोश्चकार वृथा वधम्॥

अर्थाद् अवन्तिषु कश्चिद् उपेन्द्रः पृषध्रनामा[1] भूपतिरभूत्, तेन विनयं समतिक्रम्य गोर्वृथा वधः कृतः।

(६) महाभारते शान्तिपर्वणः २६५ तमेऽध्यायेऽपि गवालम्भनेनैकशतं रोगाणामुत्पत्तेर्वर्णनमुपलभ्यते। यथा—

अघ्न्या इति गवां नाम क एता हन्तुमर्हति।
महच्चकाराकुशलं वृषं गां वाऽऽलभेत्तु यः॥४७॥

ऋषयो यतयो ह्येतन्नहुषे प्रत्यवेदयन्।
गां मातरं चाप्यवधीर्वृषभं च प्रजापतिम्॥४८॥

अकार्यं नहुषाकार्षीर्लप्स्यामहे त्वकृते व्यथाम्।
शतं चैकं च रोगाणां सर्वभूतेष्वपातयन्॥४९॥

ऋषयस्ते महाभागाः प्रजास्वेव हि जाजले।
भ्रूणहं नहुषं त्वाहुर्न ते होष्यामहे हविः॥५०॥

अयं भावः—"अघ्न्या (=हिंसितुमनर्हा) इति गवां नाम, क एता हिंसितुं समर्थः? त्वं गोर्वृषभस्य चालम्भनं रूपं महदकुशलं (=हानिप्रदम्) कर्माकार्षीः। पुनर्ऋषय ऊचुः—गां मातरं वृषभं च प्रजापतिं त्वमवधीः, तवानेनाकार्यकर्मणा वयं दुःखं लप्स्यामहे। अनेन कार्येण सर्वभूतेष्वेकशतं रोगाः प्रवर्त्स्यन्ति। महाभागा ऋषयः प्रजानां मध्य एव नहुषं **भ्रूणहणमूचुः**, तथा च न वयं तव यज्ञं कारिष्यामहे इति निरणयन्त।

महाभारते शान्तिपर्वणः २६८ तमेऽध्यायेऽपि 'नहुषः प्रथमो गवालम्भकः' इत्युक्तम्। महाभारतस्यास्य प्रसङ्गस्य पूर्वलिखितैर्द्वित्रिचतुःसंख्यकैर्वचनैः तुलनया स्पष्टं भवति—यत् **नहुषः पृषध्रश्चैकस्यैव** राज्ञो नाम स्तः। महाभारतस्य टीकाकारेण नीलकण्ठेन पूर्वोद्धृतस्य ४७ तमस्य श्लोकस्य चतुर्थचरणस्य

---

१. न मनोः पुत्रस्य पृषध्रस्य, न च पुरुरवसः पौत्रस्य पृषध्रस्य **अवन्तेरर्थाद्** उज्जयिन्याः कश्चित् सम्बन्ध आसीत्। जैनाचार्यस्योग्रादित्यस्य लेखेऽवन्तेरुल्लेखः कथमभूदिति विचाराहं वर्तते।

पाठान्तरं "पृषध्रो गां लभन्निव" इति निर्दिष्टम् । अनेनाप्युक्तमतस्यैव सम्पुष्टिर्भवति (अस्य पाठान्तरस्य नीलकण्ठकृता व्याख्याशुद्धा वर्तते)। महाभारते एकशतस्य[1] रोगाणामुत्पादको नहुष इत्युक्तम् । वसिष्ठधर्मसूत्रे अष्टनवतिरोगाणां प्रवर्तयिता पृषध्र कथितः ।[2] महाभारतोक्तेषु एकशतेषु रोगेषु वसिष्ठधर्मसूत्रोक्तानाम् ईर्ष्या-क्षुधा-जराणाम् त्रयाणां प्राचीनरोगाणामपि संख्या सङ्कलितास्ति । चरकसंहितायाः चिकित्सास्थानस्य (१९।४) अनुसारेणाष्टनवतिषु नवीनेषु रोगेषु 'अतिसार' नामाप्येको महान् रोग आसीत् ।

पृषध्र इति कस्य नहुषो नाम ?

एकः पृषध्रो मनुपुत्राणां नाभागेक्ष्वाकुशर्यात्यादीनां भ्राता अभूत् । अयं पृषध्रो गवामालम्भनस्य प्रवर्तयिता न भवितुमर्हति । यतः चरकसंहितायामुक्तोद्धरणे (पृ० ५७) गवालम्भप्रवर्तयितारं पृषध्रं मनोः पुत्रेभ्यो नाभागेक्ष्वाकुशर्यातिभ्योऽवरकालिकम् इत्युक्तम् । गवालम्भप्रसङ्गे पृषध्रनहुषौ पर्यायौ स्त इति पूर्वोक्तैः प्रमाणैः स्पष्टं भवति । इतिहासे नहुषनामकौ द्वौ राजानौ प्रसिद्धौ । एकश्चन्द्रवंश्यः, अपरः सूर्यवंश्यः (बाल्मीकीयरामायणानुसारेण) ।

महाभारतस्य **'नहुषः पूर्वमालेभे त्वष्टुगामिति नः श्रुतम्'** (शान्ति० ३६८। ६) इति श्लोके श्रुतः त्वष्टा द्वादशादित्येष्वन्यतमः । अतः त्वष्ट्रा सह श्रुतो नहुषश्चन्द्रवंश्यो नहुष (पुरूरवसः पौत्रः) एव सम्भवति । सूर्यवंश्यो नहुषो बह्वीत्तरकालिकः, स त्वष्टुः समकालिको न भवितुमर्हति । अस्य पुष्टिरुग्रादित्यस्य पूर्वनिर्दिष्टेन (सख्या ५) श्लोकेनापि भवति । तस्मिन् नहुषस्य **'उपेन्द्र'** इति विशेषणं निर्दिष्टमस्ति । महाभारतस्योद्योगपर्वणि लिखितमस्ति—'ब्रह्महत्याभयेन इन्द्रे अन्तर्हिते सति देवाः पूरूरवसः पौत्रं नहुषम् इन्द्रस्य स्थानेऽधिस्थापयामासुः (अ० ११) । एतेन सम्मानमदेन हतबुद्धिर्नहुषः इन्द्राणीं स्वभार्यां भावयितुं चेष्टयामास (अ० ११।१७-१९) । ऋषिभिश्च

---

१. एकं च शतं च=एकशतम् एकोत्तरशतमित्यर्थः । द्र०—महाभाष्ये (१।१। आ० १) **एकशतमध्वर्यु शाखाः** प्रयोगः । अत्र पञ्चदश शुक्लयजुर्वेदस्य, षडशीतिः कृष्णयजुर्वेदस्य । आहत्य १५+८६=१०१ शाखा उक्ताः।

२. ब्राह्मणधम्मसूत्ते (२७-२८) इक्ष्वाकुः पशुयज्ञप्रवर्तको गवालम्भप्रवर्तकश्च निर्दिष्टः । तेनैव च गोघातेन अष्टानवतिरोगाणां समुत्पत्तिरुल्लिखिता । अस्मन्मते ब्राह्मणधम्मसुत्ते इक्ष्वाकोर्निर्देशे काचिद् भ्रान्तिः कारणं स्यात् ।

स्त्रीयां शिविकामुत्थापयामास (अ० १७।२५) एतादृशस्य हतबुद्धेः पुरुषस्य गवालम्भप्रवर्तनं सम्भवति।

सम्प्रति यज्ञेषु पश्वालम्भनप्रवृत्तेः किं कारणमभूद् इति विचार्यते—

यज्ञेषु पश्वालम्भविधायकभ्रान्तेर्द्वे प्रधानकारणे

प्रथमं कारणम्—'वेदेषु पशुहिंसाया विधानमस्ति' इति भ्रान्त्यैव यज्ञेषु हिंसा प्रवृत्ता। इदं चरकसंहिताया: पूर्वोद्धृते वचने **'पशूनामेवाभ्यनुज्ञानात्'** इति पाठेन, उपरिचरवसोश्च **'संहितामन्त्रा हिंसालिङ्गाः'** (वायुपुराण ५७, १०७) कथनेन स्पष्टम्। अस्य भ्रमस्यापि द्वे कारणे स्तः। एकम्—अजादि-शब्दानामनेकार्थत्वम्, द्वितीयम्—**'आलभ आलम्भ'** क्रिययोः साङ्कर्यम्।

अजशब्दार्थे भ्रमः

अजशब्दस्य द्वावर्थौ स्तः। एकः **छागः**, अपरः **'प्ररोहणसामर्थ्यरहितः'**। प्राचीनागमग्रन्थेषु **अजैर्यष्टव्यम्** इत्यादिवाक्येषु अजशब्दः छागस्य वाचकः, अथवा **'प्ररोहणसामर्थ्यरहितस्य'** अर्थस्य वाचकः, अस्य मीमांसामकृत्वा **'योगाद् रूढिर्बलीयसी'** इति न्यायेन 'अजशब्दस्य छागार्थग्रहणेन यज्ञेषु पशुहिंसा प्रावर्तत'। अत्र कानिचित् प्रमाणानि उद्धरामः—

(क) महाभारतस्य शान्तिपर्वणः ३३७ तमेऽध्याये देवानां ऋषीणाञ्चैकः संवाद उपलभ्यते। तत्रोक्तम्—

अजेन यष्टव्यमिति प्राहुर्देवा द्विजोत्तमान्।
